न संधारयितुं सक्ता तव सेना नराधिप ॥ तदा मूर्छान्विता मा हुयुष्मदेवाध्वनि रस्यता ॥६१॥ ते भियाप महेष्वासास्तु वर्णा विकृतध्वजाः ॥ परीप्संतोभ्यधावंत धृष्टद्युम्नवृकोदरौ ॥६२
तौ च दृष्ट्वा महेष्वासानभिमन्युपुरोगमान् ॥ बभूवतुर्मुदा युधा निघ्नंतौ तावकवाहिनीं ॥६३॥ दृष्ट्वा च सहसा यांतं पांचालो गुरुमात्मनः ॥ नाशंसत वधं वीरः पुत्राणां तव पार्षतः ॥६४॥
ततो रथं समारोप्य कैकेयस्य वृकोदरः ॥ अभ्यधावत संक्रुद्धो द्रोणमिष्वस्त्रपारगं ॥ तस्याभिपततस्तूर्णं भारद्वाजः प्रतापवान् ॥ क्रुधश्चिच्छेद भल्लेन धनुः शत्रुनिषूदनः ॥६६॥
अन्यांश्च शतशो बाणान् प्रेषयामास पार्षते ॥ दुर्योधनहितार्थाय भर्तुः पिंडमनुस्मरन् ॥६७॥ अथान्यद्धनुरादाय पार्षतः परवीरहा ॥ द्रोणं विव्याध समरे रुक्मपुंखैः शिलाशितैः ॥६८॥
तस्य द्रोणः पुनश्चापं चिच्छेदामित्रकर्षणः ॥ हयांश्च चतुरस्तूर्णं चतुर्भिः सायकैः शुभैः ॥६९॥ वैवस्वतक्षयं घोरं प्रेषयामास भारत ॥ सारथिं चास्य भल्लेन प्रेषयामास भारत ॥७०॥ न

॥भा॰ भी॰॥
॥२०६॥

हताश्वान्नरव्याघ्रान्नर्गमिवपुत्रमहारथा ॥ आतुरो हम हा बाहुरभिमन्योमहारथं ॥ ७१ ततः सरथनागाश्वा समं कं पततवाहिनी पश्यतो भीमसेनस्य पार्थस्य च पश्यतः ॥ ७२ ॥
तन्नभग्नं बलं दृष्ट्वा द्रोणेनामिततेजसा ॥ नाशक्नुवन्वारयितुं समस्तास्ते महारथं ॥ ७३ वध्यमानं तु तत्सैन्यं द्रोणेन निशितैः शरैः अभ्रमत तत्र तत्रैव क्षोभ्यमाणामिवार्णवः ॥ ७४ ॥
तथा दृष्ट्वा च तत्सैन्यं जहृषे च बलं तव ॥ दृष्ट्वाचार्यं च संक्रुद्धं तत्र तेरिपुवाहिनीं ॥ ७५ ॥ चक्रुशुः सर्वतो योधाः साधु साध्विति भारत ॥ इति श्रीमहाभारते भीष्मपर्वणि॰ ॥ सं
जय उ॰ ततो दुर्योधनो राजा मोहात्प्रत्यागतस्तदा पाण्डवेषु पुनर्भीष्मं प्रत्यवारयदच्युत ॥ १ एकीभूताः पुनश्चैव तव पुत्रा महारथाः ॥ समेत्य समरे भीमं योधयामासुरुद्यताः ॥ २ ॥
भीमसेनोप्यसमरे संप्राप्य स्वरथं पुनः ॥ समारुह्य महाबाहुर्ययौ येन तवात्मजः ॥ ३ प्रगृह्य च महावेगं परासुकरणं दृढं ॥ चित्रं शरासनं संख्ये शरैर्विव्याध ते सुतं ॥ ४ ॥
ततो दुर्योधनो राजा भीमसेनं महारथं ॥ नाराचेन सुतीक्ष्णेन भृशं मर्मण्यताडयत ॥ ५ सोतिविद्धो महेष्वासस्तव पुत्रेण धन्वना ॥ संरक्तनयनः क्रोधाद्वेगादुत्कृष्य कार्मुकं
दुर्योधनं त्रिभिर्बाणैरुरसि चार्पयत ॥ स तथाभिहतो राजन्न चाचलद्गिरिराडिव ॥ ७ ॥ तौ दृष्ट्वा समरे क्रुद्धौ विनिघ्नन्तौ परस्परं दुर्योधनानुजाः सर्वे शूराः संसक्तजीवनाः ॥ ८ ॥
संस्मृत्य मंत्रितं पूर्वं निग्रहे भीमकर्मणः ॥ निश्चयं परं कृत्वा निग्रहीतुं प्रचक्रमुः ॥ ९ ॥ तानापतत एवाजौ भीमसेनो महाबलः ॥ प्रत्युद्ययौ महाराज गजः प्रतिगजानिव ॥ १०
भृशं संक्रुद्धो धनेजस्वी नाराचेन समार्पयत ॥ चित्रसेनं महाराज तव पुत्रं महायशाः ॥ ११ तस्यैव तास्तव सुतो स्ताडयामास मारत ॥ शरैर्बहुविधैः संख्ये रुक्मपुंखैः सुवेगितैः ॥ १२ ॥

॥राम॥
॥२०६॥

ततः संस्थाप्य समरे स्वान्यनीकानि सर्वशः ॥ अभिमन्युप्रभृतयस्ते दृष्ट्वा महारथाः ॥ प्रेषिता धर्मराजेन भीमसेनपदानुगाः ॥ धृष्टद्युम्नमः
हाराज राजपुत्रान्महारथान् ॥ १४ ॥ दृष्ट्वा रथस्थांस्ताञ्छूरान्सूर्याग्निसमतेजसः ॥ सर्वानेव महेष्वासान्भ्राजमानान्श्रिया वृ
तान् ॥ १५ ॥ महाहवे दाप्यमानान्सुवर्णविकृतोज्ज्वलान् ॥ तत्यजुः समरे भीमं तव पुत्रा महाबला ॥ १६ ॥ तानामृष्यत कौ
न्तेयो जीवमाना गता इति ॥ इति भीष्मपर्वणि ॥ संजय उवाच ॥ अन्वीय च पुनः सर्वांस्तव पुत्रान पीडयन् ॥ अभिमन्युश्च स
मरे भीमसेनेन संयुतः ॥ १ ॥ पार्षतेन च संप्रेक्ष्य तावकेन्ये महारथाः ॥ दुर्योधनप्रभृतयः प्रगृहीतशरासनाः ॥ २ ॥ भृशमश्वैः प्रज
वितैः प्रययुर्यत्र ते रथाः ॥ अपराह्णे ततो राजन्प्रावर्तत महान्रणः ॥ ३ ॥ तावकानां च बलिनां परेषां चैव भारत ॥ अभिमन्यु
र्विकर्णस्य हयान्हत्वा महाहवे ॥ ४ ॥ अथैनं पंचविंशत्या क्षुद्रकाणां समाचिनोत् ॥ हताश्वं रथमुत्सृज्य विकर्णस्तु महा
रथः ॥ ५ ॥ आरुरोह रथं राजंश्चित्रसेनस्य भास्वरम् ॥ स्थितावेकरथे तौ तु भ्रातरौ कुरुवर्द्धनौ ॥ ६ ॥ आर्जुनिः शरवर्षेणाच्छादयामास
भारत ॥ दुर्जयोथ विकर्णश्च कार्ष्णिं पंचभिरायसैः ॥ ७ ॥ विव्याध तेन नाकंपत्कार्ष्णिर्मेरुरिवास्थितः ॥ दुःशासनस्तु समरे केकया
न्पंच मारिष ॥ ८ ॥ योधयामास राजेन्द्र तदद्भुतमिवाभवत् ॥ द्रौपदेया रणे क्रुद्धा दुर्योधनमवारयन् ॥ ९ ॥ एकैकं त्रिभिरानर्छन्पुत्रस्तव
विशांपते ॥ पुत्रोपि तव दुर्मर्षणो द्रौपदेयांस्ततो रणे ॥ सायकैर्निशितै राजन्नाजघान पृथक्पृथक् ॥ तैश्चापि विद्धः शुशुभे रुधिरेण स

॥भा०भी०॥ ॥२९१॥ गिरिप्रस्रवरौर्यद्वद्गैरिधातुविमिश्रितैः॥ भीष्मोपि समरे राजन्पांडवानां वरूथिनी॥१२॥ कालयामास बलवान्पालः पशुगणानिव
ततो गांडीवनिर्घोषः प्रादुरासीद्दिशांपते॥१३॥ दक्षिणेन वरूथिन्याः पार्थस्यारीन्विनिघ्नतः॥ उत्तस्थुः समरे तत्र कबंधानि सहस्रशः
१४॥ कुरूणां चापि सैन्येषु पांडवानां च भारत॥ शोणितोदः शरावर्तो गजद्वीपो हयोर्मिणा॥१५॥ रथनौभिर्नरव्याघ्राः प्रतेरुः सैन्यसा
गरं॥ छिन्नहस्ता विकवचा विदेहाश्च नरोत्तमा॥१६॥ पतितास्तत्र दृश्यंते शतशोथ सहस्रशः॥ निहतैर्मत्तमातंगैः शोणितौघपरि
प्लुतैः॥१७॥ भूर्भाति भरतश्रेष्ठ पर्वतैराचिता यथा॥ तत्राद्भुतमपश्याम तव तेषां च भारत॥१८॥ न तत्रासीत्पुमान्कश्चिद्यो यो
द्धुं नाभिकांक्षति॥ एवं युयुधिरे वीराः प्रार्थयाना महद्यशः॥१९॥ तावकाः पांडवैः सार्द्धं कांक्षमाणा जयं युधि॥२०॥ इति श्रीमा
हाभारते भीष्मपर्वणि ०॥ संजय उवाच॥ ततो दुर्योधनो राजा लोहितायति भास्करे॥ संग्रामरभसो भीमं हंतुकामोभ्यधावत॥१॥
तमायांतमभिप्रेक्ष्य नरवीरं दृढवैरिणं॥ भीमसेनः सुसंक्रुद्ध इदं वचनमब्रवीत॥२॥ अयं स कालः संप्राप्तो वर्षपूगाभिकांक्षितः अद्य
त्वां निहनिष्यामि यदि नोत्सृजसे रणं॥३॥ अद्य कुंत्याः परिक्लेशं वनवासं च कृत्स्नशः॥ द्रौपद्याश्च परिक्लेशं प्रणोत्स्यामि हते त्वयि४ ॥राम॥
यत्पुरा मत्सरो भूत्वा पांडवानवमन्यसे॥ तस्य पापस्य गांधारे पश्य व्यसनमागतं॥५॥ कर्णस्य मतमास्थाय सौबलस्य च यत्पुरा॥ अचिंत्य पांड ॥२९१॥
वान्कामान्यथेष्टं कृतवानसि॥६॥ याचमानं च यन्मोहाद्दाशार्हमवमन्यसे॥७॥

उलूकस्यसमादेशंयद्दृष्टासिचहस्तवत॥७॥तेनत्वांनिहनिष्यामिसहितंसर्वबांधवैः॥अथकुंतीसुतःक्लेशंयस्पुराकृतवानसि॥८॥एवमु
क्त्वासमाकृष्यधनुरादायचासकृत्॥समादायशरान्घोरान्महाशनिसमप्रभान्॥९॥षड्विंशत्तरसाक्रुद्धोमुमोचाशुसुयोधने॥ज्व
लिताग्निशिखाकारान्वज्रकल्पानजिह्मगान्॥१०॥ततोस्यकार्मुकंद्वाभ्यांसूतंद्वाभ्यांचविव्यधे॥चतुर्भिर्जवनानश्वाननयद्यमसाद
नं॥११॥द्वाभ्यांचसुविकृष्टाभ्यांशराभ्यामरिमर्दन॥चिच्छेदसमरेछत्रंराज्ञस्तस्यरथोत्तमात्॥१२॥त्रिभिश्चतस्यचिच्छेदज्वलंतंध्वजमु
त्तमं॥छित्वातंचननादोच्चैस्तवपुत्रस्यपश्यतः॥१३॥रथाच्चसध्वजःश्रीमान्नानारत्नविभूषितः॥पपातसहसाभूमौविद्युज्जलध
रादिव॥१४॥ज्वलंतंसूर्यसंकाशंनागंमणिमयंशुभं॥ध्वजंकुरुपतेश्छिन्नंददृशुःसर्वपार्थिवाः॥१५॥अथैनंदशभिर्बाणैःस्तो
त्त्रैरिवमहागजं॥आजघानरणेभीमःस्मयन्निवमहारथः॥१६॥ततस्तुराजासिंधूनांरथश्रेष्ठोमहाबलः॥दुर्योधनस्यजग्राहपार्ष्णिं
सत्पुरुषैर्वृतः॥१७॥कृपश्चरथिनांश्रेष्ठःकौरव्यममितौजसं॥आरोपयद्रथंराजन्दुर्योधनममर्षणं॥१८॥सगाढविद्धोव्यथितो
भीमसेनेनसंयुगे॥निषसादरथोपस्थेराजादुर्योधनस्तदा॥१९॥परिवार्यरणेभीमंहंतुकामोजयद्रथः॥रथैरनेकसाहस्रैर्भीमस्यावा
रयद्दिशः॥२०॥धृष्टकेतुस्ततोराजन्नभिमन्युश्चवीर्यवान्॥केकयाद्रौपदेयाश्चतवपुत्रानयोधयन्॥२१॥चित्रसेनःसुचित्रश्चचित्राग
श्चित्रदर्शनः॥सुचारुश्चारुचित्रश्चतथानंदोपनंदकौ॥२२॥अष्टावेतेमहेष्वासाःसुकुमारायशस्विनः॥४॥

अभिमन्युरथे राजन्समन्तात्पर्यवारयन् ॥२३॥ आजघान ततस्तूर्णमभिमन्युर्महामनाः ॥ एकैकं पंचभिर्विध्वा शरैः सन्नतपर्वभिः ॥२४॥
वज्रमस्यप्रतीकाशैर्विचित्रायुधनिःस्वनैः ॥ अभ्यघ्नमाणास्ते सर्वे सौभद्रं रथसत्तमं ॥२५॥ ववर्षुर्मार्गणैस्तीक्ष्णैर्गिरिं मेरुमिवांबुदाः ॥ स
पीड्यमानः समरे कृतास्त्रो युद्धदुर्मदः ॥२६॥ अभिमन्युर्महाराज तावकान्समकंपयत् ॥ यथा देवासुरे युद्धे वज्रपाणिर्महासुरान् ॥२७
विकर्णाय ततो भल्लान्प्रेषयामास भारत ॥ चतुर्दश रथश्रेष्ठो घोरानाशीविषोपमान् ॥२८॥ स तैर्विकर्णस्य रथात्पातयामास वीर्य
र्यवान् ॥ ध्वजं सूतं रथाश्वांश्च पिन्नत्पमान इवाहवे ॥२९॥ ततश्चान्यान्छरान्पीतान्कुंठाग्रान्जिह्मगान् ॥ प्रेषयामास सौभद्रो विक
र्णाय महाबलः ॥३०॥ ते विकर्णं समासाद्य कंकबर्हिणवाससः ॥ भित्वा देहं गताभूमिं ज्वलंत इव पन्नगाः ॥३१॥ ते शरा हेमपुंखाग्रा
व्यदृश्यंत महीतले ॥ विकर्णरुधिरक्लिन्ना वमंत इव शोणितं ॥३२॥ विकर्णं वीक्ष्य निर्भिन्नं तस्यैवान्ये सहोदराः ॥ अभ्यद्रवंत सम
रे सौभद्रप्रमुखान्रथान् ॥३३॥ अभियाय तथैवाशु रथांस्तान्सूर्यवर्चसः ॥ सविध्य समरेन्योन्यं संरब्धा युद्धदुर्मदाः ॥३४॥ दुर्मु
खः श्रुतकर्माणं विध्वा सप्तभिराशुगैः ॥ ध्वजमेकेन विच्छेद सारथिं चास्य सप्तभिः ॥३५॥ अश्वान्जांबूनदैर्जालैः प्रच्छन्नान्वा
तरंहसः ॥ जघान षड्भिः साधस्ता सारथिं चाभ्यपातयत् ॥३६॥ स हताश्वे रथे तिष्ठन् श्रुतकर्मा महाबलः ॥ शक्तिं चिक्षेप संक्रुद्धो ल्कां
ज्वलितामिव ॥ सा दुर्मुखस्य विपुलं वर्म भित्वा यशस्विनः ॥ विदार्य प्राविशद्भूमिं दीप्यमाना स्वतेजसा ॥३७॥ तं दृष्ट्वा विरथं तत्र सु
तसोमो महाबलः ॥ पश्यतां सर्वसैन्यानां रथमारोपयत्स्वकं ॥३८॥ श्रुतकीर्तिर्महावीरो जयत्सेनं सुतं तव ॥ अभ्ययात्समरे राजन्हं

तस्याविक्षिपतश्चापं भुजकीर्त्तेर्महात्मनः ॥ चिच्छेद समरे राजन् जयसेनः सुतस्तव ।४०। क्षुरप्रेण सुतीक्ष्णेन प्रहसन्निव भारत । तं दृष्ट्वा छिन्नध
न्वानं शतानीक सहहोदरं ।४१। अभ्यपद्यत तेजस्वी सिंहवद्विनदन्मुहुः ॥ शतानीकस्तु समरे दृढं विस्फार्य कार्मुकं ।४२। विव्याध दशभिस्तू
र्णं जयसेनं शिलीमुखैः ॥ अथान्येन सुतीक्ष्णेन सर्वावरणभेदिना ।४३। जयसेनं शतानीको विव्याध समरेऽभृशं तथा तस्मिन्वर्त्तमाने दु
ष्कर्णो भ्रातुरंतिके चिच्छेद समरे चापं नाकुले ॥ क्रोधमूर्छितः अन्यान्यद्धनुरादाय भारसाहमनुत्तमं ।४६। ततोऽस्य धनुरैकेन ह्याभ्यां ।
सूतं च मारिषं ॥ चिच्छेद समरे तूर्णं तं च विव्याध सप्तभिः ॥ अश्वान्मनोजवांश्चास्य कल्मषान्वीतकल्मषः ॥४७॥ जघान निशितैः ।
स्तूर्णं सर्वान्द्वादशभिः शरैः ॥ अथापरेण भल्लेन संयुक्तेणारिघातिना ।४८। दुष्कर्णं समरे राजन्क्रुद्धो विव्याध पत्रिणा ॥ स पपात
ततोभूमौ वज्ररुग्णाद्रुवद्रुमः ॥४९॥ दुष्कर्णं निहतं दृष्ट्वा पंच राजन्महारथाः ॥ जिघांसंतः शतानीकं समंतात्पर्यवारयन् ॥५०॥ छाद्यमा
नं शरव्रातैः शतानीकं यशस्विनं ॥ अभ्यधावंत संक्रुद्धाः केकयाः पंच सोदराः ।५१। तानभ्यापततः प्रेक्ष्य तव पुत्रा महारथान् ॥ प्रत्युद्य
युर्महाराज गजा इव महागजान् ॥५२॥ दुर्मुखो दुर्जयश्चैव तथा दुर्द्धर्षणो युवा शत्रुंजयः । शत्रुसहः ॥ सर्वे क्रुद्धा यशस्विनः ॥ प्रत्युद्याता महा
राज केकयान्भ्रातरः समं ॥ रथैर्नगरसंकाशैर्हयैर्युक्तैर्मनोजवैः ॥५४॥ ७ ॥

तेषां सुतुमुलं युद्धं व्यतिशक्तरथद्विपं ॥ अवर्त्तत महारौद्रं निघ्नतामितरेतरं ॥५५॥ अन्योन्यागस्कृतां राजन् यमराष्ट्रविवर्द्धनं ॥ मुहूर्त्तात्तामिते
सर्व्ये चक्रुर्युद्धं सुदारुणं ॥ रथिनः सादिनश्चात्र व्यकीर्यंत सहस्रशः ॥ ततः शांतनवः क्रुद्धः शरैः सन्नतपर्वभिः ॥ नाशयामास तां सेनां भीष्मस्ते
षां महात्मनां ॥ पांचालानां च सैन्यानि शरैर्निन्ये यमक्षयं ॥५८॥ एवं भित्वा महेष्वासः पांडवानामनीकिनीं ॥ कृत्वावहारं सैन्यानां ययौ
स्वशिबिरं प्रति ॥५९॥ धर्मराजोपि संप्रेक्ष्य धृष्टद्युम्नवृकोदरौ ॥ मूर्द्धि चैतानुपाघ्राय प्रविष्टः शिबिरं ययौ ॥६०॥ इति श्री महाभारते भी-
ष्मपर्व्वणि षष्ठदिवसयुद्धसमाप्तं ॥ संजय उवाच ॥ अथ श्रुत्वा महाराज परस्परकृतागसः ॥ जग्मुः स्वशिबिराण्येव रुधिरेण समुक्षि-
ताः ॥१॥ विश्रम्य च यथान्यायं पूजयित्वा परस्परं ॥ सन्नद्धाः समदृश्यंत भूयो युद्धचिकीर्षया ॥२॥ ततस्तव सुतो राजंश्चिंतयाभि-
परिप्लुतः ॥ विस्रवच्छोणिताक्तांगः पप्रच्छेदं पितामहं ॥३॥ सैन्यानि घोराणि भयानकानि व्यूढानि सम्यग्बहुलध्वजानि ॥ विदार्य
हत्वा च निपीड्य शूरास्ते पांडवानां त्वरिता महारथाः ॥४॥ संमोह्य सर्वान् युधि कीर्त्तिमंतो व्यूहं च तं मकरं वज्रकल्पं ॥ प्रविश्य भीम
नेनिवर्हितोस्मि घोरैः शरैः शरैर्मृत्युदंडप्रकाशैः ॥५॥ क्रुद्धं समुद्वीक्ष्य भयेन राजन् संमूर्छितो नलभे शांतिमद्य ॥ इच्छे प्रसादात्तव सत्
यसंध प्राप्तुं जयं पांडवेयांश्च हंतुं ॥६॥ तेनैवमुक्तः प्रहसन्महात्मा दुर्योधनं जातमन्युं विदित्वा ॥ तं प्रत्युवाचाविमना मनस्वी गंगासु
तः शस्त्रभृतां वरिष्ठः ॥७॥ परेण यत्नेन विगाह्य सेनां सर्वात्मनाहं तव राजपुत्र ॥ ८॥

इच्छमि दातुं विजयं सुरवं चनचात्मानं च्छादयेयत्वदर्थे ॥ ९ एतेतु रौद्रा वहवो महारथाय शस्विनः भरतमाः कृतास्त्राः ॥ ये पांडवानां समरे सहाया

जितक्लमा ॥ क्रोधविषंवमंतः ॥ तेनेह शक्रा सहसा विजेतुं वीर्यान्विताः कृतवैरास्त्वयाव ॥ अहं हितेतान्प्रति योत्स्यामि राजन्सर्वात्मनाजीवि

तं त्यज्यवीर ॥ १० ॥ रणेतवार्थाय महानुभावनजीवितं रक्षितमं मयाघ ॥ सर्वांस्तवार्थाय सदेव दैत्यांल्लोकान्दहेयं किमु शत्रूंस्तवेह ॥ ११ ॥

तान्पांडवान्योधयिष्यामि राजन्प्रियं च ते सर्वमहं करिष्ये ॥ श्रुत्वैवं चैतत्परमप्रतीतो दुर्योधनः शांतनवं बभूव ॥ सर्वाणि सैन्यानि ततः

प्रहृष्टो निर्गच्छतेत्याह नृपांश्च सर्वान् ॥ तदा तु यानानि विनिर्ययुर्द्रुतं रथाश्वपादातगजायुतानि ॥ १३ प्रहर्षयुक्तानि तु तानि राजन्महां

ति नानाविध शस्त्रवंति ॥ स्थितानि नागाश्वपदातिमंति विरेजुराजौ तव राजन्बलानि ॥ १४ ॥ वृंदैः स्थितास्ताश्च पिसुसंप्रयुक्ताश्चकाशि

रे दंतिगणाः समंतात् ॥ शस्त्रास्त्रवद्भिर्नरदेव योधैरवस्थिताः ॥ सोन्यगणास्त्वदीया ॥ १५ ॥ तथा च पादातगजाश्वसंघैः प्रयाद्भिराजौ विधि

वत्प्रणुन्नैः ॥ समुद्धतं वैतरुणार्कवर्णं रजोवभौच्छादयन्सूर्यरश्मीन् ॥ १६ ॥ रेजुः पताकारथदंतिसंस्था वातेरिताभ्राम्यमाणाः ॥ समंता

त् ॥ नानारंगाः समरेतत्र राजन्मेघैर्युता विद्युतः खेयथैव ॥ १७ ॥ धनूंषि विस्फारयतां नृपाणां बभूव शब्दस्तुमुलोतिघोरः ॥ किंमथ्यतो

देवमहासुरौघैर्यथार्णवस्यादियुगेतदानीं ॥ १८ ॥ दुतोयनागवहुवर्णरूपं तवात्मजानां समुदीर्णवर्णं ॥ वभूव सैन्यं रिपुसैन्यहंतृ युगांत

मेघौघनिभंतदानीं ॥ १९ ॥ इति श्रीमहाभारते भीष्मपर्वणि ॥ संजय उवाच ॥ तथात्मजं तव पुनर्गांगेयो ध्यानमास्थितं अब्रवीद्भरतश्रेष्ठ सं

भीष्मप ॥ ९ ॥

 अहंद्रोणश्चशल्यश्चकृतवर्माचसात्वतः॥१॥अश्वत्थामाविकर्णश्चभगदत्तश्चसौबलः॥२॥विंदानुविंदावावंत्यौवाल्हीकःसहवाल्हिकैः
 त्रिगर्तराजश्चबलीमागधश्चसुदुर्जयः॥३॥बृहद्बलश्चकौशल्यश्चित्रसेनोविविंशतिः॥रथाश्चबहुसाहस्राःशोभमानामहाध्वजाः
॥४॥नानादेशसमुत्पन्नास्त्वदर्थेयोद्धुमुद्यताः॥एतेचान्येचबहवस्त्वदर्थेत्यक्तजीविताः॥५॥देवानपिरणेजेतुंसमर्थाइतिमेमतिः॥अव
श्यंतुमहाराजतववाच्यंसदा॥६॥अवशक्याःपांडवाजेतुंदेवैरपिसवासवैः॥वासुदेवसहायाश्चमहेंद्रसमविक्रमाः॥७॥सर्वथाहं
तुराजेंद्रकरिष्येवचनंतव॥पांडवान्वारणेजेष्येमांवाजेष्यंतिपांडवाः॥८॥एवमुक्त्वाददौचास्मैविशल्यकरणींशुभां॥ओष
धिंवीर्यसंपन्नांविशल्यश्चाभवत्तदा॥९॥ततःप्रभातेविमलेस्वेनानीकेनवीर्यवान्॥अव्यूहतात्स्वयंवीरोव्यूहंव्यूहविशारदः॥
॥१०॥मंडलंभरतश्रेष्ठनानाशस्त्रसमाकुलं॥संपूर्णंयोधमुख्यैश्चतथादंतिपदातिभिः॥११॥रथैरनेकसाहस्रैःसमंतात्परिवारितं
अश्ववृंदैर्महद्भिश्चप्रासतोमरधारिभिः॥१२॥नागेनागेरथाःसप्तसप्ताश्वाश्चरथेरथे॥अश्वेश्वेचवर्मिणःसप्तधानुष्काःसप्तचर्मिणः
॥१३॥एवंव्यूहंमहाराजतवसैन्यंमहारथैः॥स्थितंरणायमहतेभीष्मेणपरिवारितं॥१४॥दशाश्वानांसहस्राणिदंतिनांचतथैवच
रथानामयुतंचापिपुत्राश्चतवदंशिताः॥१५॥चित्रसेनादयःशूराअभ्यरक्षन्पितामहं॥रक्षमाणाश्चतैःशूरैर्गोप्यमानाश्चतेनते।
सन्नद्धाःसमदृश्यंतराजानस्तेमहाबलाः॥दुर्योधनस्तुसमरेदंशितोरथमास्थितः॥१६॥

मराजन्नश्रियाजुष्टोयथाशक्रस्त्रिविष्टपे ।ततःशब्दोमहानासीत्पुत्राणांतवभारत ।१८। रथघोषश्चविपुलोवादित्राणांचनिस्वनः ॥
भीष्मेणधार्त्तराष्ट्राणांव्यूढःप्रत्यङ्मुखोयथो ।१९। मंडलःसमहाव्यूहोदुर्भेद्योमित्रघातिनः ॥ शुशुभेराजन्नरीणांचदुरासदः ।२०॥
मंडलंतुसमालोक्यव्यूहंपरमदारुणं ॥ स्वयंयुधिष्ठिरोराजन्व्यूहंवज्रमथाकरोत् ॥२१॥ तथाव्यूढेष्वनीकेषुयथास्थान
मवस्थिताः ॥ रथिनःसादिनश्चैवसिंहनादमथानदन् ॥२२॥ बिभित्सवस्ततोव्यूहंनिर्ययुर्युद्धकांक्षिणः ॥ इतरेतरतःशूराःसहसेनाः
प्रहारिणः ॥२३॥ भारद्वाजोययौमत्स्यंद्रौणिश्चापिशिखंडिनं ॥ स्वयंदुर्योधनोराजापार्षतंसमुपाद्रवत् ॥२४॥ नकुलःसहदेवश्चराजन्म
द्रेशमीयतुः ॥ विंदानुविंदावावंत्यौयुधामन्युमरिंदमौ ॥२५॥ सर्वेन्नृपास्तुसमरेधनंजयमयोधयन् ॥ भीमसेनंरणेयत्तोहार्दिक्यःस
मवारयत् ॥२६॥ चित्रसेनंविकर्णंचतथादुर्मर्षणंविभो ॥ आर्जुनिःसमरेराजंस्तवपुत्रैरयोधयत् ॥२७॥ प्राग्ज्योतिषंतुराजानंहैडिंबो
राक्षसोत्तमः ॥ अभिदुद्राववेगेनमत्तोमत्तमिवद्विपं ॥२८॥ अलंबुषस्तदाराजन्सात्यकिंयुद्धदुर्मदं ॥ ससैन्यंसमरेक्रुद्धोराक्षसःसमभ्यद्र
वत् ॥ भूरिश्रवारणेयत्तोधृष्टकेतुमयोधयत् ॥ श्रुतायुषंतुराजानंधर्मपुत्रोयुधिष्ठिरः ॥३०॥ चेकितानस्तुसमरेकृपमेवान्वयोधय
त् ॥ शेषाःप्रतिययुस्तात्काभीमसेनंमहारणे ॥३१॥ ततोराजसहस्राणिपरिवव्रुर्धनंजयं ॥ शक्तितोमरनाराचगदापरिघपाणयः ॥३२
अर्जुनस्तुभृशंक्रुद्धोवार्ष्णेयमिदमब्रवीत् ॥ पश्यमाधवसैन्यानिधार्त्तराष्ट्रस्यसंयुगे ॥३३॥

व्यूढानि व्यूढविदुषा गांगेयेन महात्मना॥ युद्धाभिकामाश्छूराश्च पश्यमाधदंशितान्॥३४॥ त्रिगर्त्तराजं सहितं भ्रातृभिः पश्य केशव॥ य
धेतान्घातयिष्यामि पश्यतस्ते जनार्दन॥३५॥ यइमेमार्यं दुश्रेष्ठ योद्धुकामा रणाजिरे॥ एतावदुक्त्वा कौंतेयो धनुर्ज्यामवमृज्य च॥३६
ववर्ष शरवर्षाणि नराधिपगणांप्रति॥ ते पि तं परमेष्वासाः शरवर्षैरपूरयन्॥३७॥ तडागमिव धाराभिर्यथा प्रावृषि तोयदाः॥ हाहा
कारो महानासीत्तव सैन्ये विशांपते॥३८॥ छाद्यमानो भृशं कृष्णो शरैर्दृष्ट्वा महारणे॥ देवा देवर्षयश्चैव गंधर्वाश्च महोरगाः॥३९
विस्मयं परमं जग्मुर्दृष्ट्वा कृष्णौ जथाचितौ॥ ततः क्रुद्धोर्जुनो राजन्नैंद्रमस्त्रमुदीरयत्॥४०॥ तत्राद्भुतमपश्याम विजयस्य पराक्रमं॥ श
स्त्रवृष्टिं परैर्मुक्तां शरौघैर्यद्वारयत्॥४१॥ न च शस्त्रैरनिर्भिन्नः कश्चिदासीद्विशांपते॥ एषां राजसहस्राणां हयानां दंतिनां तथा॥४२
द्वाभ्यां शरैस्त्रिभिश्चान्यान् पार्थो विव्याध मारिष॥ ते हन्यमानाः पार्थेन भीष्मं शांतनवं ययो॥४३॥ अगाधे मज्जमानानां भीष्मस्त्रा
तात दाभवत्॥ आपतद्भिश्च तैस्तत्र प्रभग्नं तावकं बलं संचुक्षुभे महाराज वातैरिव महार्णवः॥४४॥ इति भीष्मपर्वणि ०॥ संजय उवा
च॥ तथा प्रवृत्ते संग्रामे निवृत्ते च सुशर्मणि॥ प्रभग्नेषु च वीरेषु पांडवेन महात्मना॥१॥ क्षुभ्यमाणे बले तूर्णं सागरप्रतिमे तव॥ प्रत्यु
द्याते च गांगेये त्वरितं विजयं प्रति॥२॥ दृष्ट्वा दुर्योधनो राजन् रणे पार्थस्य विक्रमं॥ त्वरमाणः समभ्येत्य सर्वास्तानब्रवीन्नृपान्॥३॥ ते
षां च प्रमुखे शूरं सुशर्माणं महाबलं मध्ये सर्वस्य सैन्यस्य भृशं संहर्षयन् वच॥४॥ एष शांतनवो भीष्मो योद्धुकामो धनंजय॥ सर्वात्मना कुरु
श्रेष्ठ

त्यक्त्वा जीवितमात्मन ॥५॥ तं प्रयांतं परान् वीरान् सर्वसैन्येन भारत ॥ संयत्ताः समरे सर्वे पालयध्वं पितामहं ॥६॥ बाढमित्येवमुक्त्वा तु ता
न्यनीकानि सर्वशः ॥ नरेंद्राणां महाराज अनुजग्मुः पितामहं ॥७॥ ततः प्रयातः सहसा भीष्मः शांतनवोऽर्जुनं ॥ रणे भारत मायांतमा
ससाद महाबलं ॥८॥ महाश्वेताश्वयुक्तेन भीमवानरकेतुना ॥ महता मेघनादेन रथेनातिविराजता ॥९॥ समरे सर्वसैन्यानामुपा
यांतं धनंजयं ॥ अभवत्तुमुलो नादो भयाद्दृष्ट्वा किरीटिनं ॥१०॥ अभीषुहस्तं कृष्णं च दृष्ट्वादित्यमिवापरं ॥ मध्यंदिनगते सूर्ये न शेकु
रभिवीक्षितुं ॥११॥ तथा शांतनवं भीष्मं श्वेताश्वं श्वेतकार्मुकं ॥ न[illegible] शेकुः पांडवा द्रष्टुं श्वेतग्रहमिवोदितं ॥१२॥ स सर्वतः परिवृ
तस्त्रिगर्तैः सुमहात्मभिः ॥ भ्रातृभिः सह पुत्रैश्च तथा सैन्यैर्महारथैः ॥१३॥ भारद्वाजस्तु समरे मत्स्यं विव्याध पत्रिणा ॥ ध्वजं चास्य शरे
णाजौ धनुश्चैकेन चिच्छिदे ॥१४॥ तदपास्य धनुश्छिन्नं विराटो वाहिनीपतिः ॥ अन्यदादत्त वेगेन धनुर्भारसहं दृढं ॥१५॥ शरांश्चाशी
विषाकारान् ज्वलितान् पन्नगानिव ॥ द्रोणं त्रिभिः प्रविव्याध चतुर्भिश्चास्य वाजिनः ॥१६॥ ध्वजमेकेन विव्याध सारथिं चास्य प
चभिः ॥ धनुश्चैकेषुणा विध्यत्तत्राक्रुध्यद्द्विजर्षभः ॥१७॥ तस्य द्रोणो वधीदश्वाञ्छरैः सन्नतपर्वभिः ॥ अष्टाभिर्भरतश्रेष्ठ सूतमे
केन पत्रिणा ॥१८॥ स हताश्वादवप्लुत्य स्यंदनाद्धतसारथिः ॥ आरुरोह रथं तूर्णं पुत्रस्य रथिनां वरः ॥१९॥ ततस्तु तौ पितापुत्रौ भारद्वाजं र
थास्थितौ ॥ महता शरवर्षेण वारयामासतुर्बलात् ॥२०॥ भारद्वाजस्ततः क्रुद्धः शरमाशीविषोपमं ॥ चिक्षेप समरे तूर्णं शंखं प्रति जने
श्वर ॥२१॥ स तस्य हृदयं भित्वा पीत्वा ॥

॥भा०भी०॥
॥२९५॥

शोणितमाहवे ॥ जगामधरणींचापि लोहितार्द्रीकृतच्छविः ॥ २१ ॥ सपपातरणेतूर्णं भारद्वाजशराहतः ॥ छित्वाधनुः शरांश्चैव पितुरेवसमी
पतः ॥ २३ ॥ हतेस्वमात्मजंसदृष्ट्वाविराटः प्राद्रवद्भयात् ॥ उत्सृज्यसमरेद्रोणं व्यात्ताननमिवांतकं ॥ २४ ॥ भारद्वाजस्ततस्तूर्णं पांडवानांमहा
चमूं ॥ वारयामाससमरे शतशोथसहस्रशः ॥ २५ ॥ शिखंडिमपिमहाराज द्रोणिमासाद्यसंयुगे ॥ आजघानभ्रुवोर्मध्ये नाराचैस्त्रिभिराशुगैः
॥ २६ ॥ सबभौनरशार्दूलोललाटसंस्थितैस्त्रिभिः ॥ शिखरैः कांचनमयैर्मेरुस्त्रिभिरिवोच्छ्रितैः ॥ २७ ॥ अश्वत्थामाततः क्रुद्धोनिमेषा
र्द्धाच्छिखंडिनः ॥ सूतंरथंमथाराजंस्तुरगानायुधध्वजं ॥ २८ ॥ शरैर्बहुभिरुच्छिद्यपातयामाससंयुगे ॥ सहताश्वादवप्लुत्यरथाद्
रथिनांवरः ॥ २९ ॥ खड्गंसुनिशितंगृह्य विमलंचशरावरं ॥ श्येनवद्व्यचरत्क्रुद्धः शिखंडीशत्रुतापनः ॥ ३० ॥ सखड्गस्यमहाराजचरतस्तस्य
संयुगे ॥ नांतरंददृशेद्रोणिस्तदद्भुतमिवाभवत् ॥ ३१ ॥ ततःशरसहस्राणि बहूनिभरतर्षभ ॥ प्रेषयामाससमरेद्रौणिःपरमकोपनः ॥ ३२ ॥
तामापतंतींसमरे शरवृष्टिंसुदारुणां ॥ असिनातीक्ष्णधारेण चिच्छेदबलिनांवरः ॥ ३३ ॥ ततोस्यविमलंद्रौणिः शतचंद्रंमनोरमं ॥
चर्माच्छिनदसिंचास्य खंडयामाससंयुगे ॥ ३४ ॥ शरैश्चबहुशोराजंस्तंचविव्याधपत्रिभिः ॥ शिखंडीतुततःखड्गंखंडितंतेनसायकैः ३५
आविध्यव्यसृजत्तूर्णं ज्वलंतमिवपन्नगं ॥ तमापतंतंसहसावज्राशनिसमंत्वरन् ॥ ३६ ॥ चिच्छेदसमरेद्रौणिः शतचंद्रमनोरमं ॥ शिखंडि
नंचविव्याधशरैर्बहुभिरायसैः ॥ ३७ ॥ शिखंडीतुभृशंराजंस्ताड्यमानःशितैःशरैः ॥ आरुरोहरथंतूर्णंमाधवस्यमहात्मनः ॥ ३८ ॥

॥राम॥
॥२९५॥

सात्यकिश्चिपिसंक्रुद्धोराक्षसेंद्रंमहाहवे॥ अलंवुषंशरैर्घोरैरभ्याकिरतसर्वशः॥३९॥ राक्षसेंद्रस्ततस्तस्यधनुश्छित्छेदभारत॥ अर्द्धचं
द्रेणसमरेतंचविव्याधसायकैः॥४०॥ मायांचराक्षसींकृत्वाशरवर्षैरवाकिरत्॥ तत्राद्भुतमपश्यामशैनेयस्यपराक्रमं॥ नासंभ्रम
द्यत्समरेवध्यमानःशितैःशरैः॥ ऐंद्रमस्त्रंचवार्ष्णेयोयोजयामासभारत॥४२॥ विजयाद्यमनुप्राप्तंमाधवेनमहात्मना॥ तदस्त्रंभ
स्मसात्कृत्वामायांताराक्षसींतदा॥४३॥ अलंवुषंशरैर्घोरैरभ्याकिरतसर्वशः॥ पर्वतंवारिधाराभिः प्रावृषीवबलाहकः॥४३॥ ततस्तथापी
ड्तिंतेनमाधवेनयशस्विना॥ प्रदुद्रावभयाद्रक्षोहित्वासात्यकिमाहवे॥४४॥ तमजेयंराक्षसेंद्रंसंख्येमघवताअपिशैनेयः॥ प्राणद
र्जित्वायोधानांतवपश्यतां॥४५॥ अवधीत्तावकांश्चापिसात्यकिःसत्यविक्रमः॥ निघ्नंतेर्वृष्णिभिर्वाणैस्तेद्रवंतभयार्दिताः॥४६॥ एतस्मि
न्नेवकालेतुद्रुपदस्यात्मजोवली॥ धृष्टद्युम्नोमहाराजतवपुत्रंजनेश्वर॥४७॥ छादयामाससमरेशरैःसन्नतपर्वभिः॥ सच्छाद्यमानोवि
श्रितैर्धृष्टद्युम्नेनमारिष॥४८॥ विव्यथेनचराजेंद्रतत्सुतोजनेश्वरः॥ धृष्टद्युम्नंचसमरेतूर्णंविव्याधपत्रिणा॥४९॥ षष्ट्याचत्रिंशता
चैवतदद्भुतमिवाभवत्॥ तस्यसेनापतिःक्रुद्धोधनुश्छिच्छेदमारिष॥५०॥ हयांश्चचतुरःशीघ्रंनिजघानमहावलः॥ शरैश्चैनंसुनिशितैः
शीघ्रंविव्याधसप्तभिः॥ सहताश्वान्महावाहुरवप्लुत्यरथाद्बली पदातिरसिमुद्यम्यप्राधावत्पार्षतंप्रति॥५२॥ शकुनिस्तुसमभ्येत्यसरा
जग्राहमहावलः॥ राजानंससर्वलोकस्यपश्यमानोपयत्स्वकं ५३ ततोन्नृपपराजित्यपार्षतःपरवीरहा॥७॥

शोणितमाहवे॥ जगाम धरणीं बाणो लोहिताङ्गीकृतच्छविः॥२१॥ स पपात रणे तूर्णं भारद्वाजशराहतः॥ छित्वा धनुः शरांश्चैव पितुरेव समी
पतः॥२३॥ हतं स्वमात्मजं सदृष्ट्वा विराटः प्राद्रवद्द्रुतम्॥ उत्सृज्य समरे द्रोणं व्यात्ताननमिवान्तकं॥२४॥ भारद्वाजस्ततस्तूर्णं पाण्डवानां महा
चमूं॥ वारयामास समरे शतशोथ सहस्रशः॥२५॥ शिखंड्यपि महाराज द्रोणिमासाद्य संयुगे॥ आजघान भ्रुवोर्मध्ये नाराचैस्त्रिभिराशुगैः॥
॥२६॥ स बभौ नरशार्दूलो ललाटसंस्थितैस्त्रिभिः॥ शिखरैः काञ्चनमयैर्मेरुस्त्रिभिरिवोच्छ्रितैः॥२७॥ अश्वत्थामा ततः क्रुद्धो निमेषा
र्द्धाच्छिखण्डिनः॥ सूतं रथं मेघाराज स्तुरगानायुधध्वजं॥२८॥ शरैर्बहुभिरुच्छिद्य पातयामास संयुगे॥ स हताश्वादवप्लुत्य रथाद्वै
रथिनां वरः॥२९॥ खड्गं सुनिशितं गृह्य विमलं च शरावरं॥ श्येनवद्व्यचरत्क्रुद्धः शिखण्डी शत्रुतापनः॥३०॥ स खड्गस्य महाराज चरतस्तस्य
संयुगे॥ नान्तरं ददृशे द्रौणिस्तदद्भुतमिवाभवत्॥३१॥ ततः शरसहस्राणि बहूनि भरतर्षभ॥ प्रेषयामास समरे द्रौणिः परमकोपनः॥३२॥
तामापतन्तीं समरे शरवृष्टिं सुदारुणां॥ असिनातीक्ष्णधारेण चिच्छेद बलिनां वरः॥३३॥ ततोस्य विमलं द्रौणिः शतचन्द्रं मनोरमं॥
चर्माच्छिनदसिं चास्य खण्डयामास संयुगे॥३४॥ शरैश्च बहुशो राजंस्तं च विव्याध पत्रिभिः॥ शिखण्डी तु ततः खड्गं खण्डितं तैः स सायकैः॥३५॥
आविध्य व्यसृजत्तूर्णं ज्वलन्तमिव पन्नगं॥ तमापतन्तं सहसा वज्राशनिसमस्वनं॥३६॥ चिच्छेद समरे द्रौणिः शतचन्द्रं मनोरमं॥ शिखण्डि
नं च विव्याध शरैर्बहुभिरायसैः॥३७॥ शिखण्डी तु भृशं राजंस्ताड्यमानः शितैः शरैः॥ आरुरोह रथं तूर्णं माधवस्य महात्मनः॥३८॥

1938

सात्यकिश्चपिसंक्रुद्धो राक्षसेंद्रं महाहवे ॥ अलंवुषं शरैर्घोरैरभ्याकिरत सर्वशः ॥३९॥ राक्षसेंद्रस्ततस्तस्य धनुश्छिछेद भारत ॥ अर्द्धचं
द्रेण समरे तं च विव्याध सायकैः ॥४०॥ मायां च राक्षसीं कृत्वा शरवर्षैरवाकिरत ॥ तत्राद्भुतमपश्याम शैनेयस्य पराक्रमं ॥ नासंभ्रम
द्यत्समरे वध्यमानः शितैः शरैः ॥ ऐंद्रमस्त्रं च वार्ष्णेयो योजयामास भारत ॥४२॥ विजयाद्यदनुप्राप्तं माधवेन महात्मना ॥ तदस्त्रं भ
स्मसात्कृत्वा मायां तां राक्षसीं तदा ॥४३॥ अलंवुषं शरैर्घोरैरभ्याकिरत सर्वशः ॥ पर्वतं वारिधाराभिः प्रावृषीव वलाहकः ॥४३॥ तत्तथापी
डितं तेन माधवेन यशस्विना ॥ प्रदुद्राव भयाद्रक्षो हित्वा सात्यकिमाहवे ॥४४॥ तमजेयं राक्षसेंद्रं संख्ये मघवता अपि ॥ शैनेयः प्राणद
र्जित्वा योधानां तव पश्यतां ॥४५॥ अवधीत्तावकांश्चापि सात्यकिः सत्यविक्रमः ॥ निशितैर्वहुभिर्वाणैस्तेद्रवंत भयार्द्दिताः ॥४६॥ एतस्मि
न्नेव काले तु द्रुपदस्यात्मजो वली ॥ धृष्टद्युम्नो महाराज तव पुत्रं जनेश्वर ॥४७॥ छादयामास समरे शरैः सन्नतपर्वभिः ॥ संछाद्यमानो वि
शिखैर्धृष्टद्युम्नेन मारिष ॥४८॥ विव्यथे न च राजेंद्र तव पुत्रो जनेश्वरः ॥ धृष्टद्युम्नं च समरे तूर्णं विव्याध पत्रिणा ॥४९॥ षष्ट्या च त्रिंशता
चैव तदद्भुतमिवाभवत् ॥ तस्य सेनापतिः क्रुद्धो धनुश्चिच्छेद मारिष ॥५०॥ हयांश्च चतुरः शीघ्रं निजघान महावलः ॥ शरैश्चैनं सुनिशितैः
शीघ्रं विव्याध सप्तभिः ॥ स हताश्वान्महावाहुरवप्लुत्य रथाद्वली ॥ पदातिरसिमुद्यम्य प्राधावत्पार्षतं प्रति ॥५१॥ शकुनिस्तु समभ्येत्य रा
जगृद्धी महावलः ॥ राजानं स सर्वलोकस्य रथमारोपयत्स्वके ५२ ततो नृपं पराजित्य पार्षतः परवीरहा ॥७॥

सावध्यमानासमरेधार्त्तराष्ट्रीमहाचमू ॥ वेगान्बहुविधांश्चक्रेविषंपीत्वेवमानव: ॥ यथावज्रधर:पूर्वंसंग्रामेतारकामये ॥ तत्रदेवा:स
गंधर्वा:ऋषयश्चसमागता: ॥२५॥ विशेषंनस्मविविदुर्हैडिंबभगदत्तयो: ॥ यथासुरपति:शक्रस्त्रासयामासदानवान् ॥२६॥ तथैव
समरेराजन्द्रावयामासपांडवान् ॥ तेनविद्राव्यमाणास्तेपांडवा:सर्वतोदिशं ॥ त्रातारंनाभ्यविंदंतस्वेष्वनीकेषुभारत ॥ भैमसेनिं
रथस्थंतुतत्रापश्याममारत ॥२७॥ शेषाविमनसोभूत्वाप्राद्रवन्तमहारथा: ॥ निवृत्तेषुतुपांडूनांपुन:सैन्येषुभारत ॥२८॥ आसीन्निष्टानको
घोरस्तवसैन्यस्यसंयुगे ॥ घटोत्कचस्ततोराजन्भगदत्तंमहारणे ॥३०॥ शरै:प्रच्छादयामासमेरुंगिरिमिवांबुद: ॥ निहत्यताञ्छरान्रा
जाराक्षसस्यधनुश्छुत्तान् ॥३१॥ भैमिसेनरणेतूर्णंसर्वमर्मस्वताडयत् ॥ सताड्यमानोबहुभि:शरै:सन्नतपर्वभि: ॥३२॥ नविमथे
राक्षसेंद्रोभिद्यमानोऽद्रिवाचल: ॥ तस्यप्राग्ज्योतिष:क्रुद्धस्तोमरान्सचतुर्दश ॥३३॥ प्रेषयामाससमरेतांश्चचिच्छेदराक्षस: ॥ सतांश्छित्वा
महाबाहुस्तोमरान्निशितै:शरै: ॥३४॥ भगदत्तंचविव्याधसप्तत्याकंकपत्रिभि: ॥ तत:प्राग्ज्योतिषोराजाप्रहसन्निवभारत ॥ तस्याश्वां
श्चतुरोराजन्पातयामाससायकै: ॥ सहताश्वेरथेतिष्ठन्राक्षसेंद्र:प्रतापवान् ॥३६॥ शक्तिंचिक्षेपवेगेनप्राग्ज्योतिषगजंप्रति ॥ तामा ॥राम॥
पतंतींसहसाहेमदंडांप्रवेगितां ॥३७॥ त्रिधाचिच्छेदनृपति:साव्यकीर्यतमेदिनौ ॥ शक्तिंविनिहतांदृष्ट्वाहैडिंब:प्राद्रवद्भयात् ॥३८॥ ॥२२७॥

पेथद्रेणरणोपूर्वंनमुचिर्देवसत्तमः॥तंविजित्यरणोशत्रुंविक्रांतंख्यातपोडषं॥३९॥अजेयंसमरेराजन्यमेनवरुणेनचपांडवींसमरेसे
नांसंममर्दसकुंजरः॥४०॥यथावनगजोराजन्मृद्गंश्चरतिपद्मिनी॥मद्रेश्वरस्तथासमरेयमाभ्यांसहसंगतः॥४१॥स्वस्त्रीयौछादयांचक्रे
शरौघैःपांडुनंदनौ॥सहदेवस्तुसमरेमातुलंदृश्यसंगतं॥४२॥अवारयच्छरौघेणमेघोयद्वद्दिवाकरं॥छाद्यमानाःशरौघेणहृष्टरू
पतरोभवत्॥४३॥नयोश्चापिभवत्प्रीतिरतुलामातृकारणात्॥ततःप्रहस्यसमरेनकुलस्यमहारथ॥अश्वानुरोहततोयानश्चातुरश्चयश
स्विनः॥एकस्थौतुरणेशूरौदृढेविक्षिप्तकार्मुकौ॥४५॥मद्रराजरथंक्रुद्धौछादयामासतुःक्षणात्॥सछाद्यमानोबहुभिःशरैःसन्नतपर्व
भिः॥४६॥स्वस्त्रीयाभ्यांनरव्याघ्रोनाकंपतयथाचलः॥प्रहसन्निवतांचापिशरवृष्टिंजघानह॥४७॥सहदेवस्ततःक्रुद्धःशरमुद्यम्यवी
र्यवान्॥मद्रराजमभिप्रेक्ष्यप्रेषयामाससभारत॥सशरःप्रेषितस्तेनगरुत्मानिववेगवान्॥मद्रराजंविनिर्भिद्यनिपपातमहीतले॥४८॥
सगाढविद्धोव्यथितोरथोपस्थेमहारथः॥निषसादमहाराजकश्मलंचजगामह॥५०॥तंविसंज्ञंनिपतितंसूतःसंप्रेक्ष्यसंनिर्जितंमातु
लंयुगे॥अपोवाहरथेनाजौयमाभ्यामतिपीडितं॥दृष्ट्वामद्रेश्वररथंधार्तराष्ट्राःपराङ्मुखाः॥सर्वेविमनसोभूत्वानेदमस्तीत्यचिंतयन्
निर्जित्यमातुलंसंख्येमाद्रीपुत्रौमहारथौ॥दध्मतुर्मुदितौशंखौसिंहनादंविनेदतुः॥अभ्यद्रवेतांसंहृष्टौतवसैन्यंविशांपते॥यथादेवौच
मृराजन्निंद्रोपेंद्राविवामरौ॥५४इतिश्रीमहाभारतेभीष्मपर्वणि॰॥संजयउवाच॥छ॥

ततोयुधिष्ठिरोराजामध्यंप्राप्तेदिवाकरे॥श्रुतायुषमभिप्रेक्ष्यचोदयामासवाजिनः॥१॥अभ्यधावत्ततोराजाश्रुतायुषमरिंदमं॥विनिघ्नन्
सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः॥२॥ससंवार्यरणेराजन्प्रेषितोधर्मसूनुना॥शरान्सप्तमहेष्वासःकौंतेयान्समार्पयत्॥३॥तेतस्यकव
चंभित्वापपुःशोणितमाहवे॥असूनिवविचिन्वंतोदेहेतस्यमहात्मनः॥४॥रथश्रेष्ठोरथान्गर्भमोपार्थोन्यपातयत्॥केतुंनियंतिनंद
ष्ट्वाश्रुतायुःसचपार्थिवः॥५॥पांडवेनिशितैस्तीक्ष्णैराजन्विव्याधसप्तभिः॥ततःक्रोधात्प्रजज्वालधर्मराजोयुधिष्ठिरः॥६॥यथा
युगांतेभूतानिधक्ष्यन्निवहुताशनः॥क्रुद्धंतुपांडवंदृष्ट्वादेवगंधर्वराक्षसाः॥७॥प्रविव्यथुर्महाराजव्याकुलंचाप्यभूज्जगत्॥सर्वेषां
चैवभूतानामिदमासीन्मनोगतं॥८॥त्रीन्लोकानद्यसंक्रुद्धोनृपोयंधक्ष्यतीतिवै॥ऋषयश्चैवदेवाश्चचक्रुःस्वस्त्ययनंमहत्॥९॥
लोकानांत्वपशांत्यर्थंक्रोधितेपांडवेतदा॥सचक्रोधसमाविष्टःसृक्किणीपरिसंलिहन्॥१०॥दधारात्मवपुर्घोरंयुगांतादित्यसन्निभं॥
ततःसर्वाणिसैन्यानितावकानिविशांपते॥११॥निराशान्यभवंस्तत्रजीवितंप्रतिभारत॥सतुधैर्येणतंकोपंसंनिवार्यविशांपते॥१२॥
श्रुतायुषःप्रचिच्छेदमुष्टिदेशेमहद्धनुः॥अथैनंछिन्नधन्वानंनाराचेनस्तनांतरे॥निर्बिभेदरणेराजासर्वसैन्यस्यपश्यतः॥सत्व
रंचरणेराजंस्तस्यवाहान्महात्मनः॥१४॥निजघानशरैःक्षिप्रंसूतंचसुमहाबलं॥हताश्वंतुरथंत्यक्त्वादृष्ट्वाराज्ञस्तुपौरुषं॥१५॥

विप्रदुद्राववेगेनशुनापःसमदन्तदन्तस्मिन्जितेमहेष्वासेधर्मपुत्रेणसंयुगे ।१६। दुर्योधनबलंराजन्सर्वमासीत्पराङ्मुखं ॥ एतं
ष्कृत्वामहाराजधर्मराजोयुधिष्ठिरं ॥१७॥ आतानतोयथाकालंस्तवसेनांजघानह ॥ चेकितानस्त्ववार्ष्णेयोगौतमंरथिनांवरं
।१८॥ वृष्णस्तोसर्वसैन्यानोछादयामाससायके ॥ संनिवार्यशरांस्तांस्तुकृपःशारद्वतोयुधि ।१९॥ चेकितानंरणेयत्तंराजन्विव्याधं
पत्रिभिः ॥ अथापरेणभल्लेनधनुश्छित्वेदमारिष ।२०। सारथिंचास्यभल्लेनक्षिप्रहस्तोन्वपातयत् ॥ हयांश्चास्यावधीद्राजन्उभौ
तौपार्ष्णिसारथी ।२१॥ सोवपुत्सरथात्तूर्णंगदांजग्राहसात्वतः । सतयावीरघातिन्यागदयागदिनांवरः ॥२२ गौतमस्यहयान्हत्वा
सारथिंचास्यपातयत् ॥ भूमिष्ठोगौतमस्तस्यशरांश्चिक्षेपषोडश ।२३। तेशराःसात्वतंभित्वाप्रविशंतधरणीतलं ॥ चेकितानस्त
तःक्रुद्धःपुनश्चिक्षेपतांगदां ।२४। गौतमस्यवधाकांक्षीवृत्रस्येवपुरंदरः ॥ तामापतंतींविपुलामश्मगर्भांमहागदां ।२५। शरैरने
कसाहस्रैर्वारयामासगौतमः ॥ चेकितानस्ततःखड्गंकोशादुद्धृत्यभारत ॥२६। लाघवंपरमास्थायगौतमंसमुपाद्रवत् । गौतमो
पिधनुस्त्यक्त्वाप्रगृह्यासिंसुसंयुतः ॥२७॥ वेगेनसमहाराजचेकितानमुपाद्रवत् ॥ तावुभौबलसंपन्नौनिस्त्रिंशवरधारिणौ ।२८॥
निस्त्रिंशाभ्यांसुतीक्ष्णाभ्यामन्योन्यंसंततक्षतुः ॥ निस्त्रिंशवेगाभिहतौततस्तौपुरुषर्षभौ ।२९। धरणीमनुसंप्राप्तौसर्वभूतनिषे
वितौ ॥ मूर्छयाभिपरीतांगौव्यायामेनविमोहितौ ॥३०॥ ७॥

॥भा०भी०॥
॥२९६॥

ततोभ्यधावद्वेगेन पतोत्कर्षा सहिस्सुतया॥ चेकितानं तथाभूतं दृष्ट्वा समरदुर्जये॥ रथमारोपयच्चैनं सर्वसैन्यस्य पश्यतः॥ तथैव शकु
निः भ्रातः भूपालस्तव विशांपते॥३२॥ आरोपयद्रथं तूर्णं गोत्तमरथिनां वरः॥ सोमदत्तिं तथा क्रुद्धो धृष्टकेतुर्महाबलः॥३३॥ नवत्या नि
शितैर्बाणै राजन्विव्याध वक्षसि॥ सोमदत्तिरुरस्थैस्तैर्भृशं वाणैरशोभत॥३४॥ मध्यंदिने महाराज रश्मिभिस्तपनो यथा॥ भूरिश्र
वास्तु समरे धृष्टकेतुं महारथं॥३५॥ हतसूतहयं चक्रे विरथं सायकोत्तमैः॥ विरथं चैनमालोक्य हताश्वं हतसारथिं॥३६॥ महता
शरवर्षेण छादयामास संयुगे॥ स च तं रथमुत्सृज्य धृष्टकेतुर्महामनाः॥३७॥ आरुरोह ततो यानं शतानीकस्य मारिष॥ चित्रसेनो
विकर्णश्च राजन्दुर्मर्षणस्तथा॥३८॥ रथिनो हेमसन्नाहाः सौभद्रमभिदुद्रुवुः॥ अभिमन्योस्ततस्तेस्तु घोरं युद्धमवर्त्तत॥३९॥ शरी
रस्य यथा राजन्वातपित्तकफैस्त्रिभिः॥ विरथांस्तव पुत्रांस्तु कृत्वा राजन्महाहवे॥४०॥ न जघान नरव्याघ्रः स्मरन्भीमवचस्तदा॥ ततो
राज्ञां बहुशतैर्गजाश्वरथपायिभिः॥४१॥ संवृतं समरे भीष्मं देवैरपि दुरासदं॥ प्रायात्तु शीघ्रमुद्दीक्ष्य परित्रातुं सुतांस्तव॥४२॥ अभिम
न्युं समुद्दिश्य बालमेकं महारथं॥ वासुदेवमुवाचेदं कौन्तेयः श्वेतवाहनः॥४३॥ चोदय पार्थान्हृषीकेश यत्रैते बहुला रथाः॥ एते ॥राम॥
हि बहवः शूराः कृतास्त्रा युद्धदुर्मदाः॥४४॥ यथा न हन्युर्नः सेनां तथा माधव चोदय॥ एवमुक्तः सवार्ष्णेयः कौन्तेयेनामितौजसा॥४५॥ ॥२९६॥

रथंध्वजैर्हयैर्युक्तैःप्रेषयामाससंयुगे॥ निघ्नानकोमहानासीत्तवसैन्यस्यमारिष।४६।यदर्जुनोरणेक्रुद्धःसंयातस्तावकान्प्रति॥समा
साधनुकोत्रेयोरणेत्रस्तान्भीष्मरक्षिताः॥सुशर्माणमथोराजन्निदंवचनमब्रवीत्॥जानामित्वांयुधिश्रेष्ठमन्येतेपूर्ववैरिणो
४८॥अनयस्याद्यसंप्राप्तंफलंपश्यसुदारुणं॥अद्यत्वांदर्शयिष्यामिपूर्वप्रेतान्पितामहान्॥एवंब्रुवतस्तस्यबीभत्सोःश
त्रुतापनः॥श्रुत्वापिपरुषंवाक्यंसुशर्मारथयूथपः।५०॥नचैनमब्रवीत्किंचिच्छुभंवायदिवाशुभं॥अभिगत्वार्जुनंवीरराजभि
र्बहुभिर्वृतः॥५१॥पुरस्तात्पृष्ठतश्चैवपार्श्वतश्चैवसर्वशः॥परिवार्यार्जुनंसंख्येतवपुत्रामहारथाः॥५२॥शरैःसंछादयामासुर्मे
घाइवदिवाकरं॥ततःप्रववृतेघोरःसंग्रामःशोणितोदकः॥५३॥तावकानांचसमरेपाडवानांचभारत॥इतिश्रीमहाभारतेभीष्मपर्व
णि०॥संजयउवाच॥सतुद्यमानस्तुशरैर्धनंजयःपदाहतोनागइवश्वसन्बली॥बाणेनबाणेनमहारथानांचिच्छेदचापानिरणेप्रस
ह्य॥१॥चिच्छेदचापानिचतानिराज्ञांतेषांरणेवीर्यवतांक्षणेन॥विव्याधबाणैर्युगपन्महात्मानिःशेषतांतेष्वथमन्यमानः॥२॥
निपेतुराजौरुधिरप्रदिग्धाःसंताडिताःशक्रसुतेनराजन्॥विभिन्नगात्राःपतितोत्तमांगागतासवश्छिन्नतनुत्रकायाः॥३॥मही
गताःपार्थबलाभिभूताविचित्ररूपायुगपद्विनेशुः॥दृष्ट्वाहतांस्तान्युधिराजपुत्रांस्त्रिगर्तराजःप्रययौरथेन॥४॥

॥भा०भी०॥ तेषां रथानामथ पृष्ठगोपाद्वात्रिंशदभ्यपतंत पार्थं ॥ तथैव तेषां परिवार्य पार्थं विकृष्य चापानि महारवाणि ॥ अवीवृषन्बाण
॥२२०॥ महौघवृष्ट्या यथा गिरिं तोयधरा जलौघैः ॥ सपीड्यमानस्तु शरौघवृष्ट्या धनंजयस्तान् युधि जाततरोष ॥ ६ षष्ट्या शरैः संयति तैलधौतै
र्जघान तानप्यथ पृष्ठगोपान् ॥ षष्टिं रथांस्तान् विजित्य संख्ये धनंजयः प्रीतिमनाय शस्वी ॥ ७ ॥ अथात्वरद्भीष्मवधाय जिष्णुर्बलानि रा
ज्ञां समरे निहत्य ॥ त्रिगर्तराजो निहतान् समीक्ष्य महात्मनानानथ बंधुवर्गान् ॥ ८ रणे पुरस्कृत्य नराधिपांस्तान् जगाम पार्थं त्वरितो वधाय
अभिद्रुतं चास्त्रविदां वरिष्ठं धनंजयं वीक्ष्य शिखंडिमुख्याः ॥ ९ ॥ अभ्युद्ययुस्ते शितशस्त्रहस्ता रिरक्षिषंतो रथमर्जुनस्य पार्थोपि ता
नापततः समीक्ष्य त्रिगर्तराज्ञा सहितान्नृवीरान् ॥ १० विध्वंसयित्वा समहाधनुष्मान् गांडीवमुक्तैर्निशितैः पृषत्कैः ॥ भीष्मं यिया
सुर्युधि संददर्श फाम्महो २ दुर्योधनं सैंधवादींश्च शत्रु ॥ ११ आवारयित्वा तु नथ स जयाय मुहूर्तमायोध्य रथेन वीरः ॥ उत्सृज्य राजान
मनंतवीर्यो जयद्रथादींश्च नृपान्महौजाः ॥ १२ ययौ ततो भीमबलो मनस्वी गांगेयमाजौ शरचापपाणिः ॥ युधिष्ठिरश्चोग्रबलो महात्मा
समाययौ त्वरितो जातकोपः ॥ १३ मद्राधिपं समभित्यज्य संख्ये स्वभागप्राप्तमनंतकीर्तिः ॥ सार्द्धं समाद्रीसुतभीमसेनैर्भीष्मं ययौ शांतन ॥राम॥
वं रणाय ॥ १४ ते संप्रयुक्तैः समहारथाग्र्यैर्गंगासुतः स समरे चित्रयोधी न विव्यथे शांतनवो महात्मा समागतैः पांडुसुतैः समस्तैः ॥ १५ ॥२२०॥
अथैत्य राजा युधि सत्यसंधो जयद्रथोत्युग्रबलो मनस्वी ॥ १६ ॥

चिछेद चापानि महारथानां प्रसह्य तेषां धनुषा रवेण ॥१६॥ युधिष्ठिरं भीमसेनं यमौ च कृष्णं च पार्थं युधि जातकोप ॥ दुर्योधनो वैरि विघोम
हात्मा जघान वाणैरनलप्रकाशैः ॥१७॥ कृपेण शल्येन नृपालेन चैव तथा विभो विन्नतसेनेन चासौ जौ ॥ विद्धः शरैस्तैर्निविड्ह्य को
पैर्द्वीय यथा दैउरगैः समन्तैः ॥१८॥ छिन्नायुधं शान्तनवेन राजा शिखण्डिनं प्रेक्ष्य प्रजातकोपः ॥ अजातशत्रुः समरे महात्मा शिखं
डिनं क्रुद्धमुवाच वाक्यं ॥१९॥ उक्तास्तथा त्वं पितुरग्रतो मामहं हनिष्यामि महाव्रतं तं ॥ भीष्मं शरौघैर्विमलार्कवर्णैः सत्यं वदामीति कृ
ताप्रतिज्ञा ।२०॥ त्वयानचैनासफलां करोषि देवव्रतं यन्न निहंसि युद्धे ॥ मिथ्याप्रतिज्ञो भव मा नरवीर रक्षस्व धर्मं च यशः कुलं च ॥२१॥ प्रेक्ष
स्व भीष्मं युधि भीमवेगं सर्वांस्तपन्तं मम सैन्यसंघान् ॥ शरौघजालैरतितिग्मतेजाः कालो यथा कालकृतः क्षणेन ॥२२॥ निकृत्तचापः समरे
नयेक्षः पराजितः ॥ शान्तनवेन राज्ञा ॥ विहाय बन्धूनथ सोदरांश्च क्व यासि सेनानुरूपं तवैव ॥२३॥ दृष्ट्वा हि भीष्मं तममन्तवीर्यं भग्नं च सै
न्यं द्रवमाणमेतत् ॥ भीतोसि नूनं द्रुपदस्य पुत्र तथा हि ते मुखवर्णोप्रहृष्टः ॥२४॥ अज्ञायमानेन धनंजयेन महाहवे प्रप्रयुक्तेन्द्र वीरं
कथं हि भीष्मात्प्रथितः पृथिव्यां भयं त्वमद्य प्रकरोषि वीर ॥२५॥ स धर्मराजस्य वचो निशम्य रूक्षाक्षरं विप्रलापापविद्धं ॥ प्रत्यादेशं स
न्यमानो महात्मा व्रतत्वरो भीष्मवधाय राजन् ॥२६॥ तमापतन्तं महता जवेन शिखण्डिनं भीष्ममभिद्रवन्तं ॥ आवारयामास हि शल्य एनम
स्त्रेण घोरेण सुदुर्जयेन ॥२७॥ सं चापि दृष्ट्वा समुदीर्यमाणमस्त्रं युगान्ताग्निसमप्रकाशं ७॥

नसंग्रामुख्यद्रुपदस्यपुत्रोराजन्महेंद्रप्रतिमप्रभाव ॥२८॥ तस्योचतत्रैवमहाधनुष्माञ्छरैस्तदास्त्रंप्रतिवाध्यमानः ॥ अथाद्रदेवारुणामन्यदस्त्रमु
ग्रंशिखंडीप्रतिघातमस्य ॥२९॥ तदस्त्रमस्त्रेणनिवार्यमाणारवस्याः सुसदृहशुः पार्थिवाश्चभीष्मस्तुराजन्समरेमहात्माधनुःसचित्रंध्वज
मेवचापि ॥३०॥ छित्वानदत्पांडुसुतस्यवीरोयुधिष्ठिरस्याजमीढस्यराजन्ः ततःसमुत्सृज्यधनुःसबाणंयुधिष्ठिरोवीक्ष्यभयाभिभूतं ॥३१॥
गदांप्रगृह्याथपपातसंख्येजयद्रथंभीमसेनःपदातिः ॥ तमापतंतंमहताजवेनजयद्रथःसगदंभीमसेनं ॥३२॥ विव्याधघोरैर्यमदंडक
ल्पैः ॥ शितैःशरैर्नवभिःसमंतात् ॥ अचिंतयित्वासशरांस्तरस्वीवृकोदरःक्रोधपरीतचेताः ॥३३॥ जघानवाहान्समरेसमस्तान्पार
शजान्सिंधुराजस्यसंख्ये ॥ ततोभिवीक्ष्याप्रतिमप्रभावस्तवात्मजस्त्वरमाणोमारथेन ॥३४॥ अभ्याययौभीमसेनंनिहंतुंसमुद्यतास्त्रः
सुरराजेकल्पः ॥ भीमोप्यथैनंसहसाविनद्यप्रत्युद्ययौगदयातर्जमानः ॥३५॥ समुद्यतांतांयमदंडकल्पांदृष्ट्वागदांतेकुरवः ॥ समंतात्
विहायसर्वेतवपुत्रमुग्रंभैमींगदांतांपरिहर्तुकामाः ॥३६॥ अपाक्रामंस्तुमुलेतेविमर्देसुदारुणेभारतमोहनीये ॥ अमूढचेतास्त्वथ
चित्रसेनोमहागदामापतंतींनिरीक्ष्य ॥३७॥ रथंसमुत्सृज्यपदातिराजौप्रगृह्यखड्गंविपुलंचचर्म ॥ अवप्लुतःसिंहइवाचलाग्राज्जगाम
तंभूमिपभूमिदेशं ॥३८॥ गदापिसाप्राप्यरथंसुचित्रंसाश्वंससूतंविनिहत्यसंख्ये ॥७॥

जगाम भूमिं ज्वलिता महोल्का भ्राजोवराज्ञामिव संचरंती ॥ ३९ ॥ आश्चर्यरूपं सुमहत्त्वदीया दृष्ट्वैव ते भ्रातरः संप्रहृष्टाः सर्वे विनेदुः सहिता ॥
समंतात् पुपूजिरे त्वत्पुत्रं सुसैन्या ॥ ४० ॥ इति श्रीमहाभारते भीष्मपर्वणि ० ॥ संजय उ० ॥ विराटस्तु समासाद्य चित्रसेनं मनस्विनं रथमारो
पयामास विकर्णस्तनपस्तव ॥ १ ॥ तस्मिंस्तथा वर्त्तमाने तुमुले संकुले भृशं ॥ भीष्मः शांतनवस्तूर्णं युधिष्ठिरमुपाद्रवत् ॥ २ ॥ ततः सर
थनागाश्वाः समकंपंत संजयाः ॥ मृत्योरास्यमनुप्राप्तं मेनिरे च युधिष्ठिरं ॥ युधिष्ठिरोपि कौरव्यो यमाभ्यां सहितः प्रभुः ॥ महेष्वासं
नरव्याघ्रं भीष्मं शांतनवं ययौ ॥ ४ ततः शरसहस्राणि प्रमुंचन्पांडवो युधि ॥ भीष्मं संछादयामास यथा मेघो दिवाकरं ॥ ५ ॥ तेन सम्य
क्प्रणीतानि शरजालानि भागशः ॥ प्रतिजग्राह गांगेयः शतशोथ सहस्रशः ॥ ६ ॥ तथैव शरजालानि भीष्मेणास्तानि मारिष ॥ आ
काशे समदृश्यंत खगमानां व्रजा इव ॥ ७ ॥ निमेषार्धेन कौंतेयं भीष्मः शांतनवो युधि ॥ अदृश्यं समरे चक्रे शरजालेन भागशः ॥ ८ ॥
ततो युधिष्ठिरो राजा कौरव्यस्य महात्मनः ॥ नाराचं प्रेषयामास क्रुद्ध आशीविषोपमं ॥ ९ ॥ असंप्राप्तं तु तं क्षुरप्रेण महारथः ॥ चि
च्छेद समरे राजन् भीष्मस्तस्य धनुश्च्युतं ॥ १० ॥ तं तु छित्वा रणे भीष्मो नाराचं कालसन्निभं ॥ निजघ्ने कौरवेंद्रस्य हयान्कांचनभूषणान् ॥ ११ ॥
हताश्वं तु रथं त्यक्त्वा धर्मपुत्रो युधिष्ठिरः ॥ आरुरोह रथं तूर्णं नकुलस्य महात्मनः ॥ १२ ॥ यमावपि च संक्रुद्धो समासाद्य रणे तदा शरैः संछादया

॥ भा० भी० ॥
॥ २२२ ॥

तौतु दृष्ट्वा महाराज भीष्मबाणप्रपीडितौ जगामाश्च परां चिंतां भीष्मस्य वधकांक्षया ॥ १४ ॥ ततो युधिष्ठिरो राजन् राज्ञस्तान्समचोदयत् ॥ भी
ष्मं रणे तत नवं संख्येनिहतेति सुसुहृद्गणान् ॥ १५ ॥ ततस्ते पार्थिवाः सर्वे श्रुत्वा पार्थिवभाषितं ॥ महता रथवंशेन परिवव्रुः पितामहं ॥ १६
स समंतात्परिहृतः पिता देवव्रतस्तव ॥ चिक्रीड धनुषा राजन् पातयानो महारथान् ॥ १७ ॥ तं चरंतं रणे पार्था ददृशुः कौरवं युधि ॥ मृगम
ध्यप्रविष्टं वै यथा सिंहं महावने ॥ १८ ॥ तर्जयानं रणे शूरांस्त्रासयानं च सायकैः ॥ दृष्ट्वा त्रेसुर्महाभीष्मः पातयामास सयुगे ॥ १९ ॥ ताले
भ्य इव पक्वजि फलानि कुशलो नरः ॥ पातद्विश्च महाराज शिरोभिर्धरणीतले ॥ बभूव तुमुलः शब्दः पततामश्मनामिव ॥ तस्मिन् सु
तुमुले युद्धे वर्त्तमाने भयानके ॥ २१ ॥ सर्वेषामेव सैन्यानामासीद्व्यतिकरो महान् ॥ भिन्नेषु तेषु व्यूहेषु क्षत्रिया इतरेतरं ॥ एकमेकं स
माहूय युद्धायैवोपतस्थिरे ॥ शिखंडी तु समासाद्य भारतानां पितामहं ॥ २३ ॥ अभिदुद्राव वेगेन तिष्ठ तिष्ठेति चाब्रवीत् ॥ अनादृत्य
ततो भीष्मस्तं शिखंडिनमाहवे ॥ २४ ॥ प्रययौ संजयान् क्रुद्धः स्त्रीत्वं चिंत्य शिखंडिनः ॥ संजयास्तु ततो हृष्टा दृष्ट्वा भीष्मं महारथं ॥ २५
सिंहनादान्बहुविधांश्चक्रुः शंखविमिश्रितान् ॥ ततः प्रववृते युद्धं व्यतिषक्तरथद्विप ॥ २६ ॥ अपरां दिशमास्थाय स्थिते सवितरि प्र
भो ॥ धृष्टद्युम्नोऽथ पांचाल्यः सात्यकिश्च महारथः ॥ २७ ॥ पीडयंतौ भृशं सैन्यं शक्तितोमरवृष्टिभिः ॥ शरैर्बहुविधै राजन् जघ्नुस्तावकान् रणे २८

॥ राम ॥
॥ २२२ ॥

तेहन्यमानाःसमरेतावकाःपुरुषर्षभ॥आर्य्यांयुद्धमतिंकृत्वानत्यजंतिस्मसंयुगे॥२८॥यथोत्साहंचसमरेजघ्नुर्लोकेमहारथाः॥मत्रा
क्रंदोमहानासीत्तावकानांमहात्मना॥वध्यतांसमरेराजन्पार्थेनेनमहात्मना॥तंश्रुत्वानिनदंघोरंतावकानांमहारथौ॥३१॥विंदानु
विंदावावंत्यौपार्थंप्रत्युपस्थितौ॥तौनस्पतुरगान्हत्वात्वरमाणौमहारथौ॥३२॥छादयामासतुरुभौशरवर्षेणपार्थेन॥अवप्लुत्या
थपाचाल्पोरथात्तूर्णंमहारथ॥३३॥आरुरोहरथंतूर्णंसात्यकेःसुमहात्मनः॥ततोयुधिष्ठिरोराजामहत्यासेनयावृत्त॥३४॥आवमो
ग्रामरेक्रुद्धावधावतपरंतप॥तथैवतवपुत्रोपिसर्वोद्योगेनमारिष॥३५॥विंदानुविंदौसमरेपरिवार्यावतस्थिवान्॥अर्जुनश्चापि
सक्रुद्धःक्षत्रियान्क्षत्रियर्षभ॥३६॥अयोधयत्तसंग्रामेवज्रपाणिरिवासुरान्॥द्रोणश्चसमरेक्रुद्धःपुत्रस्यप्रियकृत्तव॥३७॥वध
मत्सर्वपांचालांस्तूलराशिमिवानलः॥दुर्योधनपुरोगास्तुपुत्रास्तवविशांपते॥परिवार्यरणेभीष्मंयुयुधुःपांडवैःसह॥ततोदुर्यो
धनोराजालोहितायतिभास्करे॥३८॥अब्रवीत्तावकान्सर्वांस्त्वरध्वमितिभारत॥युध्यतांतुतथातेषांकुर्वतांकर्मदुष्करं॥४०॥अस्तंगिरि
मथारूढेनप्रकाशितभास्करे॥प्रावर्त्ततनदीघोराशोणितौघतरंगिणी॥४१॥गोमायुगणसंकीर्णाक्षणेनसरणादामुखे॥शिवाभिरा
शिवाभिश्चप्रमंतीभिःसमंततः॥४२॥घोरमायोधनंजज्ञेभूतसंघसमाकुलं॥राक्षसाश्चपिशाचाश्चतथान्येपिशिताशनाः॥४३॥स
मंततोव्यदृश्यंतशतशोथसहस्रशः॥अर्जुनोथसुशर्मादीनराज्ञःसहपदानुगान्॥४४॥

विजित्य पृतनामध्ये ययौ स्वशिविरं प्रति॥ युधिष्ठिरोपि कौरव्यो भ्रातृभ्यां सहितस्तदा॥४५॥ ययौ स्वशिविरं राजन्निशायां सेनयावृतः॥ भी
मसेनोपि राजेंद्र दुर्योधनमुखान्रथान्॥४६॥ अविजित्य ततः संख्ये पययौ स्वशिविरं प्रति॥ दुर्योधनोपि नृपतिः परिवार्य चमूं रणे॥४७॥
भीष्मं शांतनवं तूर्णं प्रयातः शिविरं प्रति॥ द्रोणो द्रौणिः कृपः शल्यः कृतवर्मा च सात्वतः॥४८॥ परिवार्य चमूं सर्वे प्रययुः शिविरं प्रति
तथैव सात्यकी राजन्धृष्टद्युम्नश्च पार्षतः॥४९॥ परिवार्य रणे योधान्ययतुः कुरुभिः सह॥ अविशंत महाराज पूजयंतः परस्परं
॥५०॥ रक्षां कृत्वात्मनः शूरा दृष्ट्वा गुल्मान्यथाविधि॥ अपनीय ततः शल्यान्स्नात्वा च विविधैर्जलैः॥५१॥ कृतस्वस्त्ययनाः सर्वे स्तूय
मानाश्च वंदिभिः॥ गीतवादित्रशब्देन चिक्रीडुस्ते यशस्विनः॥५२॥ मुहूर्तादिव तत्सर्वमभवत्स्वर्गसंमितं॥ न हि युद्धकथां कांचित्तत्र चक्रु
र्महारथाः॥५३॥ ते प्रसुप्ते बले तत्र परिश्रांतजनेन्नृप॥ हस्त्यश्वबहुले राजन्प्रेक्षणीये बभूवतुः॥५४॥ इति श्रीमहाभारते भीष्मपर्वणि
सप्तमदिवसयुद्धे समाप्तम्॥ संजय उ०॥ परिणाम्य निशां तां तु सुखसुप्ता जनेश्वरा॥ कुरवः पांडवाश्चैव पुनर्युद्धाय निर्ययुः॥१॥ तत
तः शब्दो महानासीत्सैन्ययोरुभयोरपि॥ निर्गच्छमानयोः संख्ये सागरप्रतिमो महान्॥२॥ ततो दुर्योधनो राजा चित्रसेनो विविंश
तिः॥ भीष्मश्च रथिनां श्रेष्ठो भारद्वाजः स वै द्विजः॥३॥ एकीभूताः सुसंयत्ताः कौरवाणां महारथाः॥ व्यूहाय निदधू राजन्पांडवान्प्र
ति दंशिताः॥४॥ भीष्मः कृत्वा महाव्यूहं पिता तव विशांपते॥५॥ ॥ ॥ ॥ ॥

सागरप्रतिमं घोरं वाहिनीव्राततरंगिणं ॥५॥ अग्रतः सर्वसैन्यानां भीष्मः शांतनवो ययौ ॥ मालवैर्दाक्षिणात्यैश्च आवंत्यैश्च समन्वितः
।६। ततोनंतरमेवासीद्भारद्वाजः प्रतापवान ॥ माधवेश्च कलिंगेश्च पिशाचेश्च विशापते ॥७॥ प्रग्ज्योतिषादनु नृपः कोशल्योथ बृह
द्वलः ॥ मेकलैस्त्रिपुरैश्चैव चाचिवुकैश्च समन्वितः ॥८॥ बृहद्बलः ततः शूरस्त्रैगर्तः प्रस्थलाधिप ॥ कांबोजैर्बहुभिः सार्द्धं यवनैश्च स
हस्रशः ॥९॥ द्रौणिस्तु रभसः शूरस्त्रिगर्ताननु भारत ॥ प्रययौ सिंहनादेन नादयानो धरातलं ॥१०॥ तथा सर्वेण सैन्येन राजा दुर्योधनस्त
दा । द्रोणोरनंतरं प्रायात्सोदरैः परिवारितः ॥११॥ दुर्योधनादनु ततः कृपः शारद्वतो ययौ ॥ एवमेष महाव्यूहः प्रययौ सागरोपमः ।१२
रेजुस्तत्र पताकाश्च श्वेतछत्राणि वा विभो ॥ अंगदान्यथ चित्राणि तोमराणि धनूंषि च ॥१३॥ तं तु दृष्ट्वा महाव्यूहं तावकानां महारथः
युधिष्ठिरोब्रवीत्तूर्णं पार्थं तं पृतनापतिं ॥१४ पश्य व्यूहं महेष्वास निर्मितं सागरोपमं ॥ प्रतिव्यूहं त्वमपि मे कुरु पार्थ तत्सत्वरं ।१५। ततः सपा
र्षतः शूरो व्यूहं चक्रे सुदारुणं ॥ शृंगाटकं महाराजपरव्यूहविनाशकं ।१६॥ शृंगाभ्यां भीमसेनश्च सात्यकिश्च महारथः ॥ रथैरनेकसाह
स्रैस्तथा हयपदातिभिः ॥१७॥ नाभ्यामभून्नरश्रेष्ठः श्वेताश्वः कृष्णसारथिः ॥ मध्ये युधिष्ठिरो राजा माद्रीपुत्रौ च पांडवौ ॥१८॥ तथेतरे स
हेष्वासाः ॥ सर्वसैन्या महारथाः ॥ व्यूहं तं पूरयामासुर्व्यूहशास्त्रविशारदाः ॥१९॥ अभिमन्युस्ततः पश्चाद्विराटश्च महारथः ॥ द्रौपदेयाश्च
संहृष्टा राक्षसाश्च घटोत्कच ॥ एवमेतं महाव्यूहं व्यूह्य भारत पांडवाः ॥ अतिष्ठन समरे शूरा योद्धुकामा जयैषिणः ॥ भेरीशब्दश्च तुमुला
विमिश्राः शंखनिस्वनैः ।७॥

स्वेदितास्फोटितो कुष्टाः सुभीमाः सर्वतो दिशः ॥२२॥ ततः भृशं समासाद्य समरे ते परस्परं नेत्रैरनिमिषै राजन्नवेक्षंत परस्परं ॥२३॥ नाम
भिस्ते मनुष्येंद्र पूर्वं योधाः परस्परं ॥ युद्धूपसमवर्त्तंत समाह्वयेतरेतरं ॥२४॥ ततः प्रवर्त्तते युद्धं घोररूपं भयानकं । तावकानां परेषां च ।
निघ्नतामितरेतरं ॥२५॥ नाराचा निशिताः संख्ये संपतंति स्म भारत ॥ व्यात्तानना भयकरा उरगा इव सर्वशः ॥२६॥ निष्पेतुर्विमलाः श
क्त्यस्तैलधौताः समंततः ॥ अंबुदेभ्यो यथा राजन् भ्राजमाना शतह्रदाः ॥२७॥ गदाश्च विमलैः पट्टैर्हेमवद्भिर्विभूषिताः ॥ पतंत्यस्त
त्र दृश्यंते गिरिशृंगोपमाः शुभाः ॥२८॥ निस्त्रिंशाश्च व्यराजंत विमलांबरसन्निभाः ॥ आर्षभाणि च चर्माणि शतचंद्राणि भारत
अशोभंत रणे राजन् पतमानानि सर्वशः ॥ तेन्योन्यं समरे सेने युध्यमाने नराधिप ॥३०॥ अशोभेतां यथा देवदैत्यसेन्ये समुद्यते ॥ अ
भ्यद्रवंत समरे तेन्योन्यं च समंततः ॥३१॥ रथास्तु रथिभिस्तूर्णं प्रेषिताः परमाहवे । युगैर्युगानि संश्लिष्य युयुधुः पार्थिवर्षभाः ॥ दंति
नां युध्यमानानां संघर्षात्पावकोभवत् । दंतेषु भरतश्रेष्ठ सधूमः सर्वतो दिशः ॥३३॥ प्रासैरभिन्हिताः केचिद्गजयोधाः समंततः
पतमानाः स्म दृश्यंते गिरिशृंगाद्द्वावन्नः ॥३४॥ पदाताश्चाप्य दृश्यंत निघ्नंतो हि परस्परं ॥ चित्ररूपधराः शूराः नखरप्रासयोधिनः
३५॥ अन्योन्यं ते समासाद्य कुरुपांडवसैनिकाः ॥ शरैर्नानाविधैर्घोरै रणे निन्युर्यमक्षयं । तत्र शांतनवो भीष्मो रथघोषेण नाद
यन् ॥ अभ्यागमद्रणे पांडून् धनुः शब्देन मोहयन् ॥३७॥ पांडवानां रथाश्चापि नदंतो भैरवं रवं ॥ अभ्यद्रवंत संयत्ता धृष्टद्युम्नपुरोग
माः ॥३८

ततः प्रववृते युद्धं तव तेषां च भारत। न तत्र रथनागानां संनिषक्के परस्परं ॥३६॥ इति श्रीभीष्मपर्वणि ७ संजय उ० ॥ भीष्मं तु समरे क्रुद्धं पत
पंतं समंततः ॥ न शेकुः पांडवा द्रष्टुं तपंतमिव भास्करं ॥१॥ ततः सर्वाणि सैन्यानि धर्मपुत्रस्य शासनात् ॥ अभ्यधावंत गांगेयं मर्दयं
तं निशितैः शरैः ॥२॥ स तु भीष्मो रणश्लाघी सोमकान्सहसृंजयान् ॥ पांचालांश्च महेष्वासान्पातयामास सायकैः। ते वध्यमाना
भीष्मेण पांचालाः सोमकैः सह ॥ भीष्ममेवाभ्ययुस्तूर्णं त्यक्त्वा मृत्युकृतं भयं ॥४॥ स तेषां रथिनां वीरो भीष्मः शांतनवो बली ॥ चिच्छे
द समरे राजन्बाहूनथ शिरांसि च ॥५॥ विरथान्रथिनश्चक्रे पिता देवव्रतस्तव ॥ पतितान्युत्तमांगानि हयेभ्यो हयसादिनां ॥६॥
निर्मनुष्यांश्च मातंगान्निर्दृस्तानिव पर्वतान् ॥ अपश्याम महाराज भीष्मास्त्रेण प्रमोहितान् ॥७॥ न तत्रासीत्पुमान्कश्चित्पांडु
वानां विशांपते ॥ अन्यत्र रथिनां श्रेष्ठाद्भीमसेनान्महाबलात् ॥८॥ स हि भीष्मं समासाद्य वारयामास संयुगे ॥ ततो निष्टानको घोरो
भीमसमागमे ॥ बभूव सर्वसैन्यानां घोररूपो भयानकः ॥ तथैव पांडवा हृष्टाः सिंहनादमथानदन् ॥१०॥ ततो दुर्योधनो राजा सो
दर्यैः परिवारितः ॥ भीमं युयोध समरे वर्त्तमाने महाक्षये ॥११॥ भीमस्तु सारथिं हत्वा भीष्मस्य रथिनां वर ॥ प्रद्रुताश्वे रथे तस्मिन्द्र
वमाने समंततः ॥१२॥ सुनाभस्य शरेणाजौ शिरश्छिच्छेद भारत ॥ पूर्णायतविसृष्टेन महता न्यपतद्भुवि ॥१३॥ हते तस्मिन्महाराज तव
पुत्रे महारथे ॥ नामृष्यंत रणे शूराः सोदराः प्राप्तसंयुगे ॥१४॥ आदित्यकेतुर्बह्वाशी कुंडधारो महोदरः ॥ अपराजितः पंडितको विशाला
क्षस्सुदुर्जयः ।१

पांडवं चित्रसंनाहा विचित्रकवचायुधाः ॥ अभ्यद्रवंत संग्रामे योद्धुकामा अरिमर्दनाः ॥१६॥ महोदरस्तु समरे भीमं विव्याध पत्रिभिः ॥ नवभि
र्वज्रसंकाशैर्नमुचिं वृत्रहा यथा ॥१७॥ आदित्यकेतुः सप्तत्या बह्वाशी चापि पंचभिः ॥ नवत्या कुंडधारस्तु विशालाक्षश्च सप्तभिः ॥१८॥
अपराजितो महाराज पराजिष्णुर्महारथः ॥ शरैर्बहुभिरानर्छद्भीमसेनं महाबलं ॥१९॥ रणे पंडितकश्चैनं त्रिभिर्बाणैः समार्पयत्
स तन्न ममृषे वीरः शत्रुभिर्वधमाहवे ॥२०॥ धनुः प्रपीड्य वामेन करेणामित्रकर्षणः ॥ शिरश्चिच्छेद समरे शरेणानतपर्वणा ॥२१॥ अ
पराजितस्य सुनसं तव पुत्रस्य संयुगे ॥ पराजितेन भीमेन निपपात शिरो महीं ॥२२॥ अथापरेण भल्लेन कुंडधारं महारथं ॥ प्राहिणोन्मृ
त्युलोकाय सर्वसैन्यस्य पश्यतः ॥२३॥ ततः पुनरमेयात्मा संप्रधाय शिलीमुखं ॥ प्रेषयामास समरे पंडितं प्रति भारत ॥२४॥ स शरः
पंडितं हत्वा विवेश धरणीतलं ॥ यथा नरं निहत्याशु भुजगः कालनोदितः ॥२५॥ विशालाक्षशिरश्छित्त्वा पातयामास भूतले ॥ त्रि
भिः शरैरदीनात्मा स्मरन्क्लेशं पुरातनं ॥२६॥ महोदरं महेष्वासं नाराचेन स्तनांतरे ॥ विव्याध समरे राजन् स हतो न्यपतद्भुवि ॥ आ
दित्यकेतोः केतुं च छित्त्वा बाणेन संयुगे ॥ भल्लेन भृशतीक्ष्णेन शिरश्चिच्छेद भारत ॥२८॥ बह्वाशिनं ततो भीमः शरेणानतपर्वणा
प्रेषयामास संक्रुद्धो यमस्य सदनं प्रति ॥२९॥ प्रदुद्रुवुस्ततस्त्वन्ये पुत्रास्तव विशांपते ॥ मन्यमाना हि तत्सत्यं सभायां जस्य भाषितं
॥३०॥ ततो दुर्योधनो राजा भ्रातृव्यसनकर्षितः ॥ अब्रवीत्तावकान्सर्वान्भीमोयं युधि वध्यतां ॥३१॥

एवमेतेमहेष्वासाः पुत्रास्तवविशांपते । भ्रातॄन्संदृश्यनिहतान्नस्मरंतिहितंवचः ॥३२॥ यदुक्तवान्महाप्राज्ञः क्षत्ताहितमनामयं ॥ न
दिदंसमनुप्राप्तंवचनंसत्यवादिनः ॥३३॥ लोभमोहसमाविष्टः पुत्रप्रीत्याजनाधिप ॥ नवुध्यसेपुण्ययत्तथ्यमुक्तंहितंवचः ॥ नवंचे
वधार्थायपुत्राणांपांडवोवली ॥ नूनंजातोमहावाहुर्यथाम्नीहकौरवान ॥३५॥ ततोदुर्योधनोराजाभीष्ममासाद्यमारिष ॥ दुः
खेनमहताविष्टोविललापातिदुःखितः ॥३६॥ निहताभ्रातरः शूराभीमसेनेनमेयुधि ॥ यतमानास्तथान्येपिहन्यंतेसर्वसैनिकाः ॥३७॥
भवानमध्यस्थितनित्यमस्मानुपेक्षते ॥ सोहंकापथमारूढः पश्यदैवमिदंमम ॥३८॥ एतच्छ्रुत्वावचःक्रूरंपितादेवव्रतस्तव
दुर्योधनमिदंवाक्यमब्रवीत्साश्रुलोचनं ॥३९॥ उक्तमेतन्मयापूर्वंद्रोणेनविदुरेणच ॥ गांधार्याचयशस्विन्यातत्वंतनबुद्धिमान ॥४०॥
समयश्चमयापूर्वंकृतोवःशत्रुसूदनः ॥ नाहंयुधिविमोक्तव्योनाप्याचार्यःकथंचन ॥ यशस्विधार्त्तराष्ट्राणांभीमोद्रक्ष्यतिसंयुगे ॥ ह
निष्यतिरणेतंतंसत्यमेतद्ब्रवीमिते ॥४२॥ सत्वंराजन्स्थिरोभूत्वादृढांकृत्वारणेमतिं ॥ योधयस्वरणेपार्थान्स्वर्गंकृत्वापरायणं ॥४३॥
नशक्याःपांडवाजेतुंदेवैरपिसवासवैः ॥ तस्माद्युद्धेस्थिरांकृत्वामतियुध्यस्वभारत ॥४४॥ इतिश्रीमहाभारतेभीष्मपर्वणि० ॥ धृतराष्ट्रउ०
दृष्ट्वाममहतान्पुत्रान्वहूनेकेनसंजय ॥ भीष्मोद्रोणःकृपश्चैवकिमकुर्वतसंयुगे ॥ अहन्यहनिमेपुत्राः क्षयंगच्छंतिसंयुगे मन्येहंसर्वथा
सूतदैवेनापहताम्भृशं ॥२॥

यत्रसेनानयाः सर्वेहीयंतेनजयंसुत ॥ यत्रभीष्मस्यद्रोणस्यकृपस्यचमहात्मनः ॥ ३ ॥ सोमदत्तेश्चवीरस्यभगदत्तस्यचोभयोः ॥ अश्वत्था
म्नस्तथाताततशूराणांसुमहात्मनां ॥ अन्येषांचैवशूराणामध्यगास्तेनयाममम ॥ यद्हन्यंतसंग्रामेकिमन्यद्भागधेयतः ॥ ५ ॥ नहि
दुर्योधनोमंदः पुराप्रोक्तमबुध्यत ॥ वार्यमाणोमयाताभीष्मेणविदुरेणच ॥ ६ ॥ गांधार्याचैवदुर्मेधाः सततंहितकाम्यया ॥ ना
बुध्यतपुरामोहात्तस्यप्राप्तमिदंफलं ॥ ७ ॥ यद्भीमसेनः समरेपुत्रान्ममविशेषतः ॥ अहन्यहनिसंक्रुद्धोनयतेयमसादनं ॥ ८ ॥ संजय
उ० ॥ इदंतत्समनुप्राप्तंतथ्यंवचनमुत्तमं ॥ नबुद्धवानसिविभोप्रोच्यमानंहितंतदा ॥ ९ ॥ निवारयसुतान्द्यूतात्पांडवान्मादुहेतिच
सुहृदांहितकामानांब्रुवतांतत्तदेवच ॥ १० ॥ नशुश्रूषसितद्वाक्यमार्त्तः पथ्यमिवौषधं ॥ तदेवत्वामनुप्राप्तंवचनंसाधुभाषितं
॥ ११ ॥ विदुरद्रोणभीष्माणांतथान्येषांहितैषिणां ॥ अकृत्वावचनंपथ्यंक्षयंगच्छंतिकौरवाः ॥ १२ ॥ तदेतत्समनुप्राप्तंपूर्वमेवविशांप
ते ॥ तस्मात्त्वंशृणुकौरव्ययथायुद्धमवर्त्तत ॥ १३ ॥ मध्याह्नेसुमहारौद्रः संग्रामः समपद्यत ॥ लोकक्षयकरोराजंस्तन्मेनिगदतः शृणु
ततः सर्वाणिसैन्यानिधर्मपुत्रस्यशासनात् ॥ संरब्धान्यभिधावंतभीष्ममेवजिघांसया ॥ १५ ॥ धृष्टद्युम्नः शिखंडीचसात्यकिश्चम
हारथाः ॥ युक्तानीकामहाराजभीष्ममेतुश्चकुंतिभोजश्चदंशिता ॥ युक्तानीकामहाराजभीष्ममेवसमभ्ययुः ॥ ॥ ॥

अर्जुनोद्रौपदेयाश्चचेकितानश्चवीर्यवान॥ दुर्योधनसमादिष्टानराज्ञः सर्वान्समभ्ययु॥१९॥ अभिमन्युस्तथावीरोहैडिंबश्चमहारथा॥ भीमसे
नश्चसंक्रुद्धस्त्वभ्यधावन्तकौरवान॥२०॥ द्विधाभूतैरवध्यंतपांडवैः कौरवायुधि॥ तथैवकौरवैराजन्नवध्यन्तपरेरणे॥२१॥ द्रोणश्चरथिना
श्रेष्ठः सोमकानसृंजयैःसह॥ अभ्यद्रवतसंक्रुद्धोभीष्ममेवायमन्त्रय॥२२॥ तत्राक्रंदोमहानासीत्सृंजयानांमहात्मना॥ वध्यतांसमरेराजनभा
रद्वाजेनधन्विना॥२३॥ द्रोणेननिहितास्तत्रक्षत्रियावहवोरणे॥ विचेष्टंतोव्यदृश्यन्तव्याधिक्लिन्नानराइव॥ कूजतांक्रंदतांचैवस्तनतांचैवसं
युगे॥ अभिसंश्रूयतेशब्दः क्षुत्क्लिष्टानांनृणामिव॥२५॥ तथैवकौरवेंद्राणांभीमसेनोमहाबलः॥ चकारकदनंघोरंक्रुद्धःकालइवापरः॥
॥२६॥ वध्यतांसर्वसैन्यानामन्योन्येनमहाहवे प्रावर्त्ततनदीघोराशोणितौघतरंगिणी॥२७॥ ससंग्रामोमहाराजघोररूपोऽभवन्महान्कु
रूणांपांडवानांचयमराष्ट्रविवर्द्धनः॥२१॥ ततोभीमोरणेक्रुद्धोराभसश्चविशेषतः॥ गजानीकसमासाद्यप्रेषयामासमृत्यवे॥२९॥ तत्रभारतभी
मेननाराचाभिहतागजाः॥ पेतुःसेदुश्चनेदुश्चदिशःसंपरिबभ्रमुः॥ छिन्नहस्तामहानागाश्छिन्नगात्राश्चमारिष॥ क्रौंचवद्विनदंतश्च
पृथिवीमधिशिश्यिरे॥३१॥ नकुलः सहदेवश्चहयानीकमभिद्रुतौ॥ तेहयाकांचनापीडारुक्मभांडपरिच्छदा॥३३॥ वध्यमानाव्यदृश्यन्तशत
शोथसहस्रशः॥ पतद्भिश्चहयैराजन्समाकीर्यतमेदिनी॥३३॥ निर्जिह्वैश्चश्वसद्भिश्चकूजद्भिश्चगतासुभिः॥ हयैर्बभौनरश्रेष्ठनानारूपधरैर्भु
ए॥३४

भा०भी०॥
॥२२७॥

अर्जुनेनहतै:संख्येतथाभारतराजभि:॥प्रकंपौवसुधाघोरातत्रतत्रविशांपते॥३५॥रथैर्भग्नैर्ध्वजैश्छिन्नैर्निकृतैश्चमहायुधै:॥हारैर्निष्कै:
सकेयूरै:शिरोभिश्चसकुंडलै:॥३६॥उष्णीषैरपविद्धैश्चपताकाभिश्चसर्वश:॥अनुकर्षै:शुभैराजन्योधैश्चसहरश्मिभि:॥३७॥संछ
न्नावसुधाभातिवसंतेकुसुमैरिव॥एवमेषक्षयोवृत्त:पांडूनामपिभारत॥३८॥क्रुद्धेशांतनवेभीष्मेद्रोणेचरथसत्तमे॥अश्वत्थाम्नि
कृपेचैवतथैवकृतवर्मणि॥३९॥तथेतरेषुक्रुद्धेषुतावकानामपिक्षय:॥४०॥इतिश्रीमहाभारतेभीष्मपर्वणि०॥संजयउ०॥वर्त्त
मानेतथारौद्रेराजन्वीरवरक्षये॥शकुनि:सौबल:श्रीमान्पांडवान्समुपाद्रवत्॥१॥तथैवसात्वतोराजन्हार्दिक्य:परवीरहा॥अ
भ्यद्रवत्संग्रामेपांडवानांवरूथिनीं॥२॥तत:कांबोजमुख्यानांनदीजानांचवाजिनां॥आरट्टानांमहीजानांसिंधुजानांचसर्वश:॥३
वनायुजानांशुभ्राणांतथापर्वतवासिनां॥वाजिनांचवाजिनां॥आरट्टानांमहीजानांसिंधुजानांचसर्वश:॥३॥वनायुजानांशुभ्राणां
तथापर्वतवासिनां॥वाजिनांबहुभि:संख्येसमंतात्पर्यवारयत्॥४॥येचापरेतित्तिरजाजवनावातरंहस:॥सुवर्णालंकृतैरेतैर्वर्मव
द्भि:सुकल्पितै:॥हयैर्वातजवैर्मुख्यै:पांडवस्यसुतोबली॥अभ्यवर्त्ततत्सैन्यंहृष्टरूपंपरंतप॥६॥अर्जुनस्यसुत:श्रीमानिरावान्ना ॥एम॥
मवीर्यवान्॥सुतायांनागराजस्यजात:पार्थेनधीमता॥७॥ऐरावतेनसादत्ताह्यनपत्यामहात्मना॥पत्यौहतेसुपर्णेनकृपणादीन ॥२२७॥
चेतसा॥भार्यार्थंतांचजग्राहपार्थ:कामवशानुगां॥एवमेष:समुत्पन्न:परक्षेत्रेर्जुनात्मज:॥८॥

स्नागलोकेसंवृद्धोमात्राचपरिरक्षितः पितृव्येनपरित्यक्तः पार्थद्वेषाद्दुरात्मना ॥ ११ ॥ रूपवावलसंपन्नोगुणवान्सत्यविक्रमः ॥ इं
द्रलोकंजगामाशुश्रुत्वातत्रार्जुनंगतं ॥ ११ ॥ सोभिगम्यमहावाहुः पितरंसत्यविक्रमः ॥ अभ्यवादयतव्यग्रोनियमेनकृतांजलिः ॥ १२ ॥
न्यवेदयतचात्मानमर्जुनस्यमहात्मनः ॥ इरावानस्मिभद्रंतेपुत्रश्चाहंतवप्रभो ॥ १३ ॥ मातुःसमागमोयस्तुतत्सर्वंप्रत्यवेदयत ॥ तच्चस
र्वंयथावृत्तमनुसस्मारपांडवः ॥ १४ ॥ परिष्वज्यसुतंचापिसोत्मनः सदृशंगुणैः ॥ प्रीतिमानभवत्पार्थोदेवराजनिवेशने ॥ १५ ॥ सोऽ
र्जुनेनसमादिष्टोदेवलोकेतदानृप ॥ प्रीतिपूर्वंमहावाहुः स्वकार्यंप्रतिभारत ॥ १६ ॥ युद्धकालेत्वयास्माकंसाह्यंदेयमितिप्रभो
वाढमित्येवमुक्त्वाचयुद्धकालमिहागतः ॥ १७ ॥ कामवर्णजवैरश्वैः संवृतोवहुभिर्नृप ॥ तेहयाः कांचनापीडानानावर्णामनो
जवाः ॥ १८ ॥ उत्पेतुःसहसाराजन्सर्वेगामिहताभुवि ॥ निपतद्भिस्तथातेश्चहयसंघैःपरस्परं ॥ १९ ॥ शुशुभेदारुणः शब्दः सुपर्णो
यत्तनेयथा ॥ तथैवचमहाराजसमेत्यान्योन्यमाहवे ॥ २० ॥ परस्परवधंघोरंचक्रुस्तेहताश्वाः समाहताः ॥ २२ ॥ विलयसमनुप्राप्ता
स्तहन्यमानाःपरस्परं ॥ ततःशीलहयानीकेकिंचिच्छिष्टेचसंयुगे ॥ २३ ॥ सौवलस्यानुजाः शूरानिर्गतारणमूर्द्धनि ॥ वायुवेगसम
स्पर्शान्वायुवेगसमानजवे ॥ २४ ॥ आरुह्यशीलसंपन्नान्वयस्थांस्तुरगोत्तमान् ॥ गजोगवाक्षोवृषभश्चर्मवानार्जवःशुकः ॥ २५

॥भा०भी०॥
॥२२८॥

घट्टैतेवलसंपन्नानिर्ययुर्महतोवलात्॥वार्यमाणाः शकुनिनास्वैश्चयोधैर्महावलैः॥२६॥सन्नद्धायुद्धकुशलारौद्ररूपामहा
वलाः॥तदनीकंमहावाहोभित्वापरमदुर्जयं॥वलेनमहतायुक्ताः स्वर्गायविजयैषिणः॥विविशुस्तेतदाहृष्टागांधारायु
द्धदुर्मदाः॥तान्प्रविष्टांस्तदाहृष्टानिरावानपिवीर्यवान्॥अव्रवीत्समरेयोधान्विचित्राभरणायुधान्॥२९॥यथैतेधार्तरा
ष्ट्रस्ययोधाःसानुगवाहनाः॥हन्यंतेसमरेसर्वेतथानीतिर्विधीयतां॥३०॥वाढमित्येवमुक्त्वातेसर्वेयोधाइरावतः॥ज
घ्नुस्तेषांवलानीकंदुर्जयंसमरेपरैः॥३१॥तदनीकमनीकेनसमरेवीक्ष्यपातितं॥अमृष्यमाणास्तेसर्वेसुवलस्या
त्मजारणे॥३२॥इरावंतमभिद्रुत्यसर्वतःपर्यवारयन्॥ताडयंतःशितैःप्रासैश्चोदयंतःपरस्परं॥३३॥तेशूराःपर्यधा
वंतकुर्वंतोमहदाकुलं॥इरावानपिनिर्विद्धःप्रासैस्तीक्ष्णैर्महात्मभिः॥३४॥स्रवतारुधिरेणाक्तस्तोत्रैर्विद्धइवद्विपः॥पुर
स्तपिचपृष्ठेचपार्श्वयोश्चभृशाहतः॥३५॥एकोवहुभिरत्यर्थंधैर्याद्राजन्नविव्यथे॥इरावानथसंक्रुद्धःसर्वांस्तान्निशितैः
शरैः॥३६॥मोहयामाससमरेविश्वापरपुरंजय॥प्रासानुद्धृत्यसर्वेभ्यःस्वशरीरादरिंदम॥३७॥तैरेवताडयामाससुवलस्या
त्मजान्रणे॥विकृष्यचशितंखड्गंगृहीत्वाचशरावरं॥३८॥पदातिस्तूर्णमभ्यैच्छज्जि॥

॥राम॥
॥२२८॥

ततः प्रववृते युद्धं तुमुलं लोमहर्षणं ॥ १२ ॥ राक्षसानां च राजेंद्र दुर्योधनवलस्य च ॥ गजानीकं च संप्रेक्ष्य मेघवृंदमिवोद्यतं ॥ १३ ॥ अभ्यधा
वंत संक्रुद्धा राक्षसाः शस्त्रपाणयः ॥ नदंतो विविधान्नादान्मेघा इव सविद्युतः ॥ १४ ॥ शरशक्त्यृष्टिनाराचैर्निघ्नंतो गजयोधिनः ॥ भिंदि
पालैस्तथा शूलैर्मुद्गरैः सपरिश्वधैः ॥ १५ ॥ पर्वताग्रैश्च वृक्षैश्च निजघ्नुस्ते महागजान् ॥ भिन्नकुंभान्विरुधिरान् भिन्नगात्रांश्च वारणा
न् ॥ १६ ॥ अपश्याम महाराज वध्यमानान्निशाचरैः ॥ तेषु प्रक्षीयमाणेषु भग्नेषु गजयोधिषु ॥ १७ ॥ दुर्योधनो महाराज राक्षसान् समु
पाद्रवत् ॥ अमर्षवशमापन्नस्त्यक्त्वा जीवितमात्मनः ॥ १८ ॥ मुमोच निशितान् वाणान् राक्षसेषु परंतपः ॥ जघान च महेष्वासः प्र
धानांस्तत्र राक्षसान् ॥ १९ ॥ संक्रुद्धो भरतश्रेष्ठ पुत्रो दुर्योधनस्तव ॥ वेगवंतं महारौद्रं विद्युज्जिह्वं प्रमाथिनं ॥ २० ॥ शरैश्चतुर्भिश्चतुरो
निजघान महावलः ॥ ततः पुनरमेयात्मा शरवर्षं दुरासदं ॥ २१ ॥ मुमोच भरतश्रेष्ठो निशाचरवलं प्रति ॥ तत्तु दृष्ट्वा महत्कर्म पुत्र-
स्य तव मारिष ॥ २२ ॥ क्रोधेनाभिप्रजज्वाल भैमसेनिर्महावलः ॥ सविस्फार्य महच्चापमिंद्राशनिसमप्रभं ॥ २३ ॥ अभिदुद्राव वेगेन
दुर्योधनमरिंदमं ॥ तमापतंतमुद्वीक्ष्य कालसृष्टमिवांतकं ॥ २४ ॥ न विव्यथे महाराज पुत्रो दुर्योधनस्तव ॥ अथैनमब्रवीत्क्रुद्धः
क्रूरः संरक्तलोचनः ॥ २५ ॥ अद्यानृण्यं गमिष्यामि पितॄणां मातुरेव च ॥ ये त्वया सुनृशंसेन दीर्घकालं प्रवासिताः ॥ २६ ॥ यच्च ते पांडवा रा
जन्छलद्यूते पराजिताः ॥ यच्चैव द्रौपदी कृष्णा एकवस्त्रा रजस्वला ॥ २७ ॥

॥भा०भी०॥ सभामानीयदुर्बुद्धे वद्धधार्त्तेऽशितात्वया॥ नवचप्रियकामेन आश्रमस्थाद्दुरात्मना॥२८॥ सेधवेनपराम्रष्टापरिभूयपितॄन्मम॥ एतेषामप
॥२२९॥ मानानामन्येषांचकुलाधम॥२९॥ अंतमद्यगमिष्यामियदिनोत्सृजसेरणा॥ एवमुक्त्वातुहैडिंबोमहद्विस्फार्य्यकार्मुकं॥३०॥ सदृष्टप
दशनैरोष्ठंस्रक्किणीपरिसंलिहन्॥ शरवर्षेणमहतादुर्योधनमवाकिरत्॥३१॥ पर्वतंवारिधाराभिःप्रावृषीवबलाहकः॥ इतिश्रीमहाभा
रतेभीष्मपर्वणि॥०॥ संजयउ०॥ ततस्तद्बाणवर्षंतुदुःसहंदानवैरपि॥ दधारयुधिराजेंद्रवारणंवर्षमहाद्विपः॥१॥ ततःक्रोधसमाविष्टोनिश्व
सन्निवपन्नगः॥ संशयंपरमंप्राप्तःपुत्रस्तेभरतर्षभ॥२॥ मुमोचनिशितांस्तीक्ष्णान्नाराचान्पंचविंशति॥ तेपतन्सहसाराजंस्तस्मिन्नाहे
सर्पपुंगवे॥३॥ आशीविषादवक्रुद्धाःपर्वतेगंधमादने॥ सतैर्विद्धःस्रवन्रक्तंप्रभिन्नइवकुंजरः॥४॥ दध्रेमतिंविनाशायराज्ञःसपिशि
ताशनः॥ जग्राहचमहाशक्तिंगिरीणामपिदारिणीं॥५॥ संप्रदीप्तांमहोल्काभामशनिंज्वलितामिव॥ समुद्यच्छन्महाबाहुर्जिघां
सुस्तनयंतव॥६॥ तामुद्यतामभिप्रेक्ष्यवंगानामधिपस्त्वरन्॥ कुंजरंगिरिसंकाशंराक्षसंप्रत्यचोदयत्॥७॥ सनागप्रवरेणाजौबलि
नाशीघ्रगामिना॥ ततोदुर्योधनरथस्तंमार्गंप्रत्यपवर्तत॥८॥ रथंचवारयामासकुंजरेणसुतस्यते॥ मार्गमावारितंदृष्ट्वाराज्ञावंगेनधीम ॥राम॥
ता॥ घटोत्कचोमहाराजक्रोधसंरक्तलोचनः॥ उद्यतांतांमहाशक्तिंतस्मिंश्चिक्षेपवारणे॥१०॥ सतयाभिहतोराजंस्तेनबाहुप्रमुक्तया॥ ॥२२९॥
संजातरुधिरोत्पीडःपपातचममारच॥११॥ उत्पपातचगजाच्चापिवंगानामीश्वरोबली॥ जवेनसमभिद्रुत्यजगामधरणीतलं॥१२॥

दुर्योधनोपिसंप्रेक्ष्यपतितंवरवारणं ॥ प्रभग्नंचवलंदृष्ट्वाजगामपरमांव्यथां ।१३॥ तत्रधर्मंपुरस्कृत्यआत्मनश्चाभिमानिनो ॥ प्राप्तेप
क्रमतोराजातस्थौगिरिरिवाचलः ॥१४॥ संधायचशितंवाणंकालाग्निसमतेजसं ॥ मुमोचपरमक्रुद्धस्तस्मिन्घोरेनिशाचरेतमा
यांतंसंप्रेक्ष्यवाणमिंद्राशनिप्रभं ॥ लाघवान्मोचयामासमहात्मावैघटोत्कचः ॥१६॥ भूयश्चविननादोग्रंक्रोधसंरक्तलोचनः
त्रासयामाससर्वाणिभूतानियुगांतेजलदायथा ॥१७॥ तंश्रुत्वानिनदंघोरंतस्यभीमस्यरक्षसः ॥ आचार्यमुपसंगम्यभीष्मःशांतनवो
ऽब्रवीत ॥१५॥ यथैषनिनदोघोरःश्रूयतेराक्षसेरितः ॥ हैडिंवोयुध्यतेनूनंराज्ञादुर्योधनेनह ॥१९॥ नैषशक्योहिसंग्रामेजेतुंभूते
नकेनचित ॥ तंचगच्छतभद्रंवोराजानंपरिरक्षत ॥२०॥ अभिद्रुतोमहाभागोराक्षसेनमहात्मना ॥ एतद्धिनःपरंकृत्यंसर्वेषांनः
परंतपाः ॥२१॥ पितामहवचःश्रुत्वात्वरमाणामहारथाः ॥ उत्तमंजवमास्थायप्रययुर्यत्रकौरवः ॥२२॥ द्रोणश्चसोमदत्तश्चवा
ह्लीकोजयद्रथः ॥ कृपोभूरिश्रवाःशल्यश्चावंत्यःसबृहद्बलः ॥२३॥ अश्वत्थामाविकर्णश्चचित्रसेनोविविंशतिः ॥ रथाश्चाने
कसाहस्रायेतेषामनुयायिनः ॥२४॥ अभिद्रुतंपरीप्संतोपुत्रंदुर्योधनंतव ॥ तदनीकमनाधृष्यंपालितंतुमहारथैः ॥२५॥ आतता
यिनमायांतंप्रेक्ष्यराक्षससत्तमः ॥ नाकंपतमहावाहुर्मैनाकइवपर्वतः ॥२६॥ प्रगृह्यविपुलंचापंज्ञातिभिःपरिवारितः ॥ शूलमु
द्गरहस्तैश्चनानाप्रहरणैरपि ॥२७॥ ततःसमभवद्युद्धंतुमुलंलोमहर्षणं ॥ राक्षसानांचमुख्यस्यदुर्योधनवलस्यच ॥२८॥ ॥

धनुर्घोषकूजनोशब्दः सर्वतस्तुमुलोरणे ॥ अश्रूयत महाराज वंशानां दह्यतामिव ॥ २९ ॥ अस्त्राणां पात्यमानानां कवचेषु शरीरिणां
शब्दः समभवद्राजन गिरिणामिव भिद्यतां ॥ ३० ॥ वीरबाहुविसृष्टानां तोमराणां विशांपते ॥ रूपमासीद्धियत्स्थाने सर्पाणामिव सर्पतां
ततः परमसंक्रुद्धो विस्फार्य सुमहद्धनुः ॥ राक्षसेन्द्रो महाबाहुर्विनद्य नभैरवं स्वनं ॥ ३२ ॥ आचार्यस्यार्द्धचन्द्रेण क्रुद्धश्चिच्छेद कार्मुकं
सोमदत्तस्य भल्लेन ध्वजं चोन्मथ्य चानदत् ॥ ३३ ॥ वाल्हीकं च त्रिभिर्वाणैः प्रत्यविध्यत्स्तनांतरे ॥ कृपमेकेन विव्याध चित्रसेनं त्रिभिः श
रैः ॥ ३४ ॥ पूर्णायतविसृष्टेन सम्यक्प्रणिहितेन च ॥ जत्रुदेशे समासाद्य विकर्णं समताडयत् ॥ ३५ ॥ स पपात रथोपस्थे रश्मीनुत्सृज्य
वाजिनां ॥ सिंधुराज्ञोर्द्धचंद्रेण बाराहं स्वर्णभूषितं ॥ ३६ ॥ उन्ममाथ महाराज द्वितीयेनाछिनद्धनुः ॥ चतुर्भिरथ नाराचैरावत्यस्य म
हात्मनः ॥ ३७ ॥ जघान चतुरो वाहान्क्रोधसंरक्तलोचनः ॥ पूर्णायतविसृष्टेन पीतेन निशितेन च ॥ ३८ ॥ निर्बिभेद महाराज राजपुत्रं
बृहद्बलं ॥ स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ॥ ३९ ॥ भृशं क्रोधेन चाविष्टो रथस्थो राक्षसाधिपः ॥ चिक्षेप निशितांस्तीक्ष्णा
न्छरानाशीविषोपमान ॥ ४० ॥ विभिदुस्ते महाराज शल्यं युद्धविशारदं ॥ ४१ ॥ इति श्रीमहाभारते भीष्मपर्वणि ॥ ० ॥ संजय उ० ॥ विमुखीकृ
त्य सर्वांस्तु तावकान्युधि राक्षसः ॥ जिघांसुर्भरतश्रेष्ठ दुर्योधनमुपाद्रवत् ॥ १ ॥ तमापतंतं संप्रेक्ष्य राजानं प्रति वेगितं ॥ अभ्यधावन्जि
घांसंतस्तावका युद्धदुर्मदाः ॥ तालमात्राणि चापानि विकर्षंतो महारथाः ॥ तमेकमभ्यधावंत नदंतः सिंहसंघवत् ॥ २ ॥

अथैनं शरवर्षेण समंतात्पर्यवाकिरन् ॥ ३॥ पर्वतं वारिधाराभिः शरदीव वलाहकाः ॥ ४॥ स गाढविद्धो व्यथितस्तोत्रार्दित इव द्विपः ॥ उत्प
पात तदाकाशं समंताद्वैनतेयवत् ॥ ५॥ व्यनदत्सुमहानादं जीमूत इव शारदः ॥ दिशः खं विदिशश्चैव नादयन्भैरवस्वनः ॥ ६॥ राक्ष
सस्य तु तं शब्दं श्रुत्वा राजा युधिष्ठिरः ॥ उवाच भरतश्रेष्ठ भीमसेनमरिंदमम् ॥ ७॥ युध्यते राक्षसो नूनं धार्तराष्ट्रैर्महारथैः ॥ यथा
स्य श्रूयते शब्दो नदतो भैरवस्वनः ॥ ८॥ अतिभारं च पश्यामि तस्मिन्तात सपुंगव ॥ पितामहश्च संक्रुद्धः पांचालान्हंतुमुद्यतः ॥
९ तेषां च रक्षणार्थाय युध्यते फाल्गुनः परैः ॥ एतज्ज्ञात्वा महाबाहो कार्यद्वयमुपस्थितम् ॥ १०॥ गच्छ रक्षस्व हैडिंबं संशयं परमं गतं
भ्रातुर्वचनमाज्ञाय त्वरमाणो वृकोदरः ॥ ११॥ प्रययौ सिंहनादेन त्रासयन्सर्वपार्थिवान् ॥ वेगेन महता राजन्पर्वकाले यथोद
धिः ॥ १२॥ तमन्वगात्सत्यधृतिः सौचित्तिर्युद्धदुर्मदः ॥ श्रेणिमान्वसुदानश्च पुत्रः काश्यस्य चाभिभुः ॥ अभिमन्युमुखाश्चैव द्रौपदे
या महारथाः ॥ क्षत्रदेवश्च विक्रांतः क्षत्रधर्मा तथैव च ॥ १४॥ अनूपाधिपतिश्चैव नीलः स्वबलमास्थितः ॥ महता शरवर्षेण हैडिं
बं पर्यवारयन् ॥ १५॥ कुंजरैश्च महामत्तैः षट्सहस्रैः प्रहारिभिः ॥ अभ्यरक्षंत सहिता राक्षसेंद्रं घटोत्कचं ॥ १६॥ सिंहनादेन महता
नेमिघोषेण चैव हि ॥ खुरशब्दनिपातैश्च कंपयंतो वसुंधरां ॥ १७॥ ततः प्रवृत्तं युद्धं तत्र तेषां महात्मनां ॥ १८॥ तावकानां परेषां च×
तेषामापततां श्रुत्वा शब्दं तं तावकं बलं ॥ भीमसेनभयोद्विग्नं विवर्णवदनं तथा ॥ १९॥ परिवृत्तं महाराज परित्यज्य घटोत्कचं× [redacted] सया
मेष्यनिवर्त्तिना ॥ ४ ॥

॥भा०वी०
॥२३१॥

नानारूपाणि शस्त्राणि विसृजंतो महारथाः॥२०॥ अन्योन्यमभिधावंतः संप्रहारं प्रचक्रिरे॥ अतिचित्रं महारौद्रं युद्धं भीरुभयावहं॥२१॥
हयागजैः समाजग्मुः पदाताः सादिभिः सह॥ अन्योन्यं समरे राजन् प्रार्थयानाः समं ययुः॥ सहसा चाभवत्तीव्रं संनिपातान्महद्र
जः॥ गजाश्वरथपत्तीनां पदनेमिसमुद्धतं॥२३॥ धूम्रारुणं रजस्तीव्रं रणभूमिं समावृणोत्॥ नैव स्वे न परे राजन् समजानन् परस्प
रं॥२४॥ पिता पुत्रं न जानीते पुत्रो वा पितरं तथा॥ निर्मर्यादे तथा भूते वैशसे लोमहर्षणे॥२५॥ शस्त्राणां भरतश्रेष्ठ मनुष्याणां च गर्जे
तां॥ सुमहानभवच्छब्दः प्रेतानामिव भारत॥२६॥ गजवाजिमनुष्याणां शोणितांत्रतरंगिणी॥ प्रावर्तत नदी घोरा केशशैवलशाद्वला
॥२७॥ नराणां चैव कायेभ्यः शिरसां पततां रणे॥ शुश्रुवे सुमहाञ्छब्दः पततामश्मनामिव॥२८॥ विशिरस्कैर्मनुष्यैश्च छिन्नगात्रैश्च वा
रणैः॥ अश्वैः संभिन्नदेहैश्च संकीर्णाभूद्वसुंधरा॥२९॥ नानाविधानि शस्त्राणि विसृजंतो महारथाः॥ अन्योन्यमभिधावंत॥ संप्रह
रार्थमुद्यताः॥३०॥ हयाहयान्समासाद्य प्रेषिता हयसादिभिः॥ समाहत्य रणेन्योन्यं निपेतुर्गतजीविताः॥३१॥ नरा नरान् समासाद्य क्रोध
रक्तेक्षणा भृशं॥ उरांस्युरोभिरन्योन्यं समाश्लिष्य निजघ्निरे॥३२॥ प्रेषिताश्च महामात्रैर्वारणाः परवारणाः॥ अभ्यघ्नन् विषाणाग्रैर्वी ॥राम॥
रणानेव संयुगे॥३३॥ ते जातरुधिरोत्पीडाः पताकाभिरलंकृताः॥ संसक्ताः प्रत्यदृश्यंत मेघा इव सविद्युतः॥ केचिद्भिन्ना विषाणाग्रैर्भिन्न ॥२३१॥
कुंभाश्च तोमरैः॥ विनदंतोभ्यधावंत गर्जमाना घना इव॥ केचिद्धस्तैर्द्विधा छिन्नैश्छिन्नगात्रास्तथापरे॥३४॥

निपेतुस्तत्रमुलेतस्मिञ्छिन्नपक्षाइवाद्रयः॥३६॥पार्श्वैस्तुदारितैरन्येवारणैर्वरवारणाः॥केचित्क्रोधसमाविष्टामसंधानिखग्रहाः
रथान्हयान्पदातांश्चममृदुःशतशोरणे॥तथाहयाहयारोहैस्ताडिताःप्रासतोमरैः॥३७॥तेनतेनाभ्यवर्त्तन्तकुर्वन्तोव्याकुला
दिशः॥रथिनोरथिभिःसार्द्धंकुलपुत्रास्तनुत्यजः॥३८॥परांशक्तिंसमास्थायचक्रुःकर्माण्यभीतवत्॥स्वयंवरइवामर्देप्रच
क्रुरितरेतरं॥४०॥प्रार्थयानायशोराजन्स्वर्गंवायुद्धशालिनः॥तस्मिंस्तथावर्त्तमानेसंग्रामेलोमहर्षणे॥४१॥धार्त्तराष्ट्रीमहत्सै
न्यंप्रायशोविमुखीकृतं॥४२॥इतिमहाभारतेभीष्मपर्वणि॰।संजयउ०॥स्वसैन्यंनिहितंदृष्ट्वाराजादुर्योधनःस्वयं॥अभ्यधाव
तसंक्रुद्धोभीमसेनमरिंदम॥१॥प्रगृह्यसुमहच्चापमिन्द्राशनिसमस्वनं॥महताशरवर्षेणपाण्डवंसमवाकिरत्॥२॥अर्द्धचन्द्रंच
संधायसुतीक्ष्णंलोमवाहनं॥भीमसेनस्यचिच्छेदचापंक्रोधसमन्वितः॥३॥तदन्तरंचसंप्रेक्ष्यत्वरमाणोमहारथः॥प्रसंदधेशितं
बाणंगिरीणामवदारणं॥४॥तेनोरस्मिमहाराजभीमसेनमताडयत्॥सगाढविद्धोव्यथितःसृक्किणीपरिसंलिहन्॥५॥ससमा
लम्बेवैतेजस्वीध्वजेहेमपरिष्कृते॥तथाविमनसंदृष्ट्वाभीमसेनंघटोत्कचः॥६॥क्रोधेनाभिप्रजज्वालदिधक्षन्निवपावकः॥
अभिमन्युमुखाश्चापिपाण्डवानांमहारथाः॥७॥समभ्यधावन्क्रोशन्तोराजानंजातसंभ्रमाः॥संप्रेक्ष्यतान्समापततःसंक्रुद्धान्
जातसंभ्रमान्॥८॥भारद्वाजस्यवाक्येनुतावकानाममहारथाः॥क्षिप्रंगच्छतभद्रंवोराजानंपरिरक्षत॥९॥संशयंपरमंप्राप्तंमज्जं
तंव्यसनार्णवे॥१०॥

॥भा० भी०॥
॥२३२॥

एते क्रुद्धा महेष्वासाः पांडवानां महारथाः ॥१०॥ भीमसेनं पुरस्कृत्य दुर्योधनमुपाद्रवत ॥ नानाविधानि शस्त्राणि विसृजंतो जयैषिणः ॥११॥
नर्दंतो भैरवान्नादांस्त्रासयंतश्च भूमिपान ॥ तदाचार्यवचः श्रुत्वा सोमदत्तपुरोगमाः ॥१२॥ तावकाः समवर्त्तंत पांडवानामनीकिनीं ॥
कृपो भूरिश्रवाः शल्यो द्रोणपुत्रो विविंशतिः ॥१३॥ चित्रसेनो विकर्णश्च सैंधवोथ बृहद्बलः ॥ आवंत्यौ च महेष्वासौ कौरवं पर्यवीरय
त ॥१४॥ ते विंशति पदं गत्वा संप्रहारं प्रचक्रिरे ॥ पांडवा धार्त्तराष्ट्राश्च परस्परजिघांसवः ॥१५॥ एवमुक्त्वा महाबाहुर्महद्विस्फार्य कार्मुकं ॥
भारद्वाजस्ततो भीमं षड्विंशत्या समार्पयत ॥१६॥ भूयश्चैनं महाबाहुः शरैः शीघ्रमवाकिरत ॥ पर्वतं वारिधाराभिः शरदीव वलाहकः ॥ तं
प्रत्यविध्यद्दशभिर्भीमसेनः शिलीमुखैः ॥ त्वरमाणो महेष्वासः सव्यपार्श्वे महाबलः ॥१७॥ स गाढविद्धो व्यथितो वयोवृद्धश्च भारत ॥ प्रनष्ट
संज्ञः सहसा रथोपस्थ उपाविशत ॥१८॥ गुरुं प्रव्यथितं दृष्ट्वा केलाशमिव शृंगिणं ॥ कौरवो द्रोणपुत्रश्च सहितावभ्यधावतां ॥२०॥ तावा
पतंतौ सहितौ त्वरितौ बलिनां वरौ ॥ अभ्यधावत वेगेन त्वरमाणो वृकोदरः ॥२१॥ तमापतंतं संप्रेक्ष्य संक्रुद्धं भीमदर्शनं ॥ समभ्यधावंस्त्व
रिताः कौरवाणां महारथाः ॥२२॥ भारद्वाजमुखाः सर्वे भीमसेनजिघांसया ॥ नानाविधानि शस्त्राणि भीमस्योरस्यपातयत ॥२३॥ सहिताः
पांडवं सर्वे पीडयंतः परस्परं ॥ तं दृष्ट्वा संशयं प्राप्तं पीड्यमानं महारथं ॥२४॥ अभिमन्युप्रभृतयः पांडवानां महारथाः ॥ अभ्यधावन्परीप्संतो ॥रा॥
प्राणांस्त्यक्त्वा धनानि च ॥२५॥ अनूपाधिपतिः शूरो भीमस्य दयितः सखा ॥७॥

॥२३२॥

नीलोनीलांबुदःप्रख्यःसंक्रुद्धोद्रौणिमभ्ययात् ॥२६॥ सदृष्ट्वातंहिमहेष्वासोनित्यंद्रोणसुतेनसः ॥ सविस्फार्य्यमहच्चापंद्रौणिराविव्याध
पत्रिणा ॥२७॥ यथाशक्रोमहाराजपुराविव्याधदानवं ॥ विप्रचित्तिंदुराधर्षंदेवतानांभयंकरं ॥२८॥ येनलोकत्रयंक्रोधात्त्रासितंस्व
नतेजसा ॥ यथानीलेननिर्भिन्नःसुमुक्तेनपत्रिणा ॥२९॥ संजातरुधिरोत्पीडोद्रौणिःक्रोधसमन्वितः ॥ सविस्फार्य्यधनुश्चित्रमिंद्राश
निसमस्वनं ॥३०॥ दध्रेनीलविनाशायमतिंमतिमतांवरः ॥ ततःसंधायविमलान्भल्लान्कर्मार्योवितान् ॥३१॥ जघानचतुरोवाहा
न्पातयामासचध्वजं ॥ सभल्लेनचभल्लेननीलंविव्याधवक्षसि ॥३२॥ सगाढविद्धोव्यथितोरथोपस्थउपाविशत् मोहितेवीक्ष्यरा
जानंनीलमभ्रचयोपमं ॥३३॥ घटोत्कचोभिसंक्रुद्धोभ्रातृभिःपरिवारितः ॥ अभिदुद्राववेगेनद्रौणिमाहवशोभिनं ॥३४॥ तथेतरे
चाभ्यधावन्राक्षसायुद्धदुर्मदाः ॥ तमापतंतंसंप्रेक्ष्यराक्षसंघोरदर्शनं ॥३५॥ अभ्यधावत्तेजस्वीभारद्वाजात्मजस्त्वरन् ॥ निजघान
चसंक्रुद्धोराक्षसान्भीमदर्शनान् ॥३६॥ येभवन्नग्रतःक्रुद्धाराक्षसस्यपुरःसराः ॥ विमुखांश्चैवतान्दृष्ट्वाद्रौणिचापच्युतैःशरैः ॥३७॥
अक्रुध्यत्समहाकायोभैमसेनिर्घटोत्कचः ॥ प्रादुश्चक्रेततोमायांघोररूपांसुदारुणां ॥३८॥ मोहयन्समरेद्रौणिंमायावीराक्षसाधिपः ॥ त
तस्तेतावकाःसर्वेमाययाविमुखीकृताः ॥३९॥ अन्योन्यंसमपश्यंतनिष्कृत्तामेदिनीतले ॥ विचेष्टमानाःकृपणाःशोणितेनपरिप्लुताः ॥४०
द्रोणंदुर्योधनंशल्यमश्वत्थामानमेवच ॥ प्रायशश्चमहेष्वासायेप्रधानाश्चकौरवाः ॥४१॥ विध्वस्तारथिनःसर्वेगजानश्चनिपातिताः ॥ ह
याश्चैवहयारोहाःसन्निकृत्ताःसहस्रशः ॥४२॥

॥भा०भी०॥
२३३

तंदृष्ट्वातावकंसैन्यंविद्रुतंशिविरंप्रति॥ममप्राक्रोशतोराजन्नथादेवश्रतस्यच॥४३॥युध्यध्वंमापलायध्वंमायैषाराक्षसीरणे॥घटोत्क
चप्रमुक्तेतिनातिष्ठंतविमोहिता॥४४॥नैवतेश्रद्दधुर्भीतावदतोरणवयोर्वचः॥मांश्चप्रद्रवतोदृष्ट्वाजयंप्राप्ताश्चपांडवाः॥४५॥घटो
त्कचेनसहिताःसिंहनादान्प्रचक्रिरे॥शंखदुंदुभिनिर्घोषैःसमंतात्संदिरेभृशं॥४६॥एवंतवबलंसर्वंहैडिंबेनदुरात्मना॥सूर्या
स्तमनवेलायांप्रभग्नंविद्रुतंदिशः॥४७॥इतिश्रीमहाभारतेभीष्मपर्वणि०॥संजयउ०॥तस्मिन्महतिसंक्रंदेराजादुर्योधनस्तदा॥गां
गेयमुपसंगम्यविनयेनाभिवाद्यतं॥१॥तस्यसर्वंयथावृत्तमाख्यातुमुपचक्रमे॥घटोत्कचस्यविजयमात्मनश्चपराजयं॥२॥कथ
यामासदुर्धर्षोविनिःश्वस्यपुनःपुनः॥अब्रवीच्चतथाराजन्भीष्मंकुरुपितामहं॥३॥भवंतंसमुपाश्रित्यवासुदेवंयथाविधोः॥पांड
वैर्विग्रहोघोरःसमारब्धोमयाप्रभो॥४॥एकादशसमाख्याताअक्षौहिण्यश्चयामया॥निदेशेतवतिष्ठंतिमयासार्द्धंपरंतप॥५॥
सोहंभरतशार्दूलभीमसेनपुरोगमे॥घटोत्कचंसमाश्रित्यपांडवैर्युधिनिर्जितः॥६॥तन्मेदहतिगात्राणिशुष्कवृक्षमिवानलः॥ता
दिच्छामिमहाभागत्वत्प्रसादात्परंतप॥७॥राक्षसापसदंहंतुंस्वयमेवपितामह॥त्वांसमाश्रित्यदुर्द्धर्षंतन्मेकर्त्तुंत्वमर्हसि॥८॥एतच्छ्रु
त्वानुवचनंराज्ञोभरतसत्तम॥दुर्योधनमिदंवाक्यंभीष्मःशांतनवोऽब्रवीत्॥९॥शृणुराजन्ममवचोयत्त्वांवक्ष्यामिकौरव॥यथात्वयाम
हाराजवर्तितव्यंपरंतप॥१०॥सोहंभरतशार्दूलभीमसेनपुरोगमे॥धर्मराजेनसंग्रामस्त्वयाकार्यःसदानघ॥११॥

॥राम॥
२३३

अर्जुनेनयमाभ्यांवाभीमसेनेनवापुनः।धर्मराजंपुरस्कृत्यराजाराजानमृर्छति॥१२॥अहंद्रोणःकृपोद्रौणिःकृतवर्माचसात्वतःशल्यश्चसोमद
त्तिश्चविकर्णश्चमहारथः।१३।तवचभ्रातरःश्रेष्ठादुःशासनपुरोगमाः॥त्वदर्थेप्रतियोत्स्यामोराक्षसंतंमहाबलं।१४।रौद्रेतस्मिन्राक्षसे
न्द्रेयदितेनुरूपोयोमहात्मन्॥अयमेवागच्छतुरणेतस्ययुद्धायदुर्मतेः॥१५॥भगदत्तोमहीपालोपुरंदरसमोयुधि॥एतावदुक्त्वाराजानंभगद
त्तमथाब्रवीत्॥१६॥समक्षंपार्थिवेन्द्रस्यवाक्यंवाक्यविशारदः॥गच्छशीघ्रंमहाराजहैडिंबंयुद्धदुर्मदं॥१७॥वारयस्वरणेयत्तोमिषतो
सर्वधन्विनां॥राक्षसंक्रूरकर्माणंयथेन्द्रस्तारकंपुरा॥१८॥तवदिव्यानिचास्त्राणिविक्रमश्चपरंतप॥समागमश्चबहुभिःपुराभूत्सम
रेःसह॥१९॥त्वंतस्मान्नरशार्दूलप्रतियोधामहाहवे॥स्वबलेनोच्छ्रितोराजन्जहिराक्षसपुंगव॥२०॥एतच्छ्रुत्वातुवचनंभीष्मस्यपृतना
पतेः॥प्रययौसिंहनादेनपरानभिमुखोद्रुतं॥२१॥तमाद्रवन्तंसंप्रेक्ष्यगर्जन्तमिवतोयदं॥अभ्यवर्तन्तसंक्रुद्धाःपाडवानांमहारथाः॥२२
भीमसेनोभिमन्युश्चराक्षसश्चघटोत्कचः॥द्रौपदेयाःसत्यधृतिःक्षत्रदेवश्चभारत॥२३॥चेदिपोवसुदानश्चदशार्णाधिपतिस्तथा॥सुप्र
तीकेनतांश्चापिभगदत्तोप्युपाद्रवत्॥२४॥ततःसमभवद्युद्धंघोररूपंभयानकं॥पाण्डूनांभगदत्तेनयमराष्ट्रविवर्द्धनं॥प्रयुक्ताःरथिभि
र्बाणाभीमवेगाःसुतेजनाः॥तेनिपेतुर्महाराजनागेषुचरथेषुच॥२६॥प्रभिन्नाश्चमहानागाविनीताहस्तिसादिभिः॥परस्परंसमासा
द्यसंनिपेतुरभीतवत्॥२७॥मदांधारोषसंरब्धाविषाणाग्रैर्महाहवे॥विभिदुर्दन्तमुशलैःसमासाद्यपरस्परं॥२८॥

॥भा०भी०॥
॥२३४॥

हयाश्च चामरापीडाः प्रासपाणिभिरास्थिताः ॥ चोदिताः सादिभिः क्षिप्रं निपेतुरितरेतरं ॥२९॥ पदातयश्च पत्त्यौघैस्ताडिताः शक्तितो
मरे ॥ न्यवर्त्तत ततस्तूर्णं शतशोऽथ सहस्रशः ॥३०॥ रथिनश्च रथैराजन् कर्णिनालीकसायकैः ॥ निहत्य समरे वीरान् सिंहनादान् विनेदि
रे ॥३१॥ तस्मिंस्तथा वर्त्तमाने संग्रामे लोमहर्षणे ॥ भगदत्तो महेष्वासो भीमसेनमथाद्रवत् ॥३२॥ कुंजरेण प्रभिन्नेन सप्तधा स्रवता
मदं ॥ पर्वतेन यथा तोयं स्रवमाणेन सर्वशः ॥३३॥ किरञ्छरसहस्राणि सुप्रतीकशिरोगतः ॥ ऐरावतस्थो भगवान् वारिधाराइवानं
घ ॥३४॥ स भीमं शरधाराभिस्ताडयामास पार्थिव ॥ पर्वतं वारिधाराभिस्तपान्ते जलदो यथा ॥३५॥ भीमसेनः सुसंक्रुद्धः पादरक्षान्पर
शतान् ॥ निजघान महेष्वासः संरब्धः शरवृष्टिभिः ॥३६॥ तान्दृष्ट्वा निहतान् क्रुद्धो भगदत्तः प्रतापवान् ॥ चोदयामास नागेंद्रं भीमसेन
रथं प्रति ॥३७॥ स नागः प्रेषितस्तेन बाणो ज्याचोदितो यथा ॥ अभ्यधावत वेगेन भीमसेनमरिंदम ॥३८॥ तमापतंतं संप्रेक्ष्य पांडवा
नां महारथाः ॥ अभ्यवर्त्तंत केमेन भीमसेनपुरोगमाः ॥३९॥ केकेयाश्चाभिमन्युश्च द्रौपदेयाश्च सर्वशः ॥ दशार्णाधिपतिः शूरः
क्षत्रदेवश्च मारिष ॥४०॥ चेदिपश्चित्रकेतुश्च संरब्धाः सर्व एव ते ॥ उत्तमास्त्राणि दिव्यानि दर्शयंतो महाबलाः ॥४१॥ तमेकं कुंजरं क्रुद्धाः
समंतात्पर्यवारयन् ॥ स विद्धो बहुभिर्बाणैर्व्यरोचत महाद्विपः ॥४२॥ संजातरुधिरोत्पीडो धातुचित्र इवाद्रिराट् ॥ दशार्णाधिपतिश्चापि ॥एम॥
गजं भूमिधरोपमं ॥ समास्थितोऽभिदुद्राव भगदत्तस्य वारणं ॥ तमापतंतं समरे गजं गजपतिः स च ॥४३॥ दधार सुप्रतीकोऽपि वेलेव मक ॥२३४॥
रालयं ॥४४॥

वारितंप्रेक्ष्यनागेंद्रंदृष्ट्वारीस्यमहात्मनः॥४५॥साधुसाध्वितिसैन्यानिपांडवेयान्यपूजयन्॥ततःप्राग्ज्योतिषःक्रुद्धस्तोमरान्वैचतुर्दश॥४६॥
प्राहिणोत्तस्यनागस्यप्रमुखेनृपसत्तम॥उपाहृतमथःक्षिप्रमभ्यवर्त्ततवेगिनः॥४७॥सप्रदुद्राववेगेनप्रासादेनभैरवं॥समर्दयानः॥
स्वबलंवायुर्वृक्षानिवौरसान्॥४८॥तस्मिन्पराजितेनागेपांडवानांमहारथाः॥सिंहनादंविनद्योच्चैर्युद्धायैवोपतस्थिरे॥४९॥ततो
भीमंपुरस्कृत्यभगदत्तमुपाद्रवन्॥किरंतोविविधान्बाणाञ्छस्त्राणिविविधानिच॥५०॥तेषामापततांराजन्संक्रुद्धानांमम
विराणां॥श्रुत्वासनिनदंघोरममर्षात्साध्वसः॥५१॥भगदत्तोमहेष्वासःस्वनागंप्रत्यचोदयत्॥अंकुशांगुष्ठनुदितःशतशो
थसहस्रशः॥५२॥समद्रान्समरेराजन्सप्रधावंस्ततस्ततः॥तेनसलोअमानानुपांडवानांबलंमहत्॥५३॥सचुकोचमहाराजच
र्मेवाग्नौसमाहितं॥भग्नंतुस्वबलंदृष्ट्वाभगदत्तेनधीमता॥५४॥घटोत्कचोथसंक्रुद्धोभगदत्तमुपाद्रवत्॥विकटःपुरुषोराजन्
दीप्तास्योदीप्तलोचनः॥रूपंविभीषणंकृत्वारोषेणप्रज्वलन्निव॥जग्राहविमलंशूलंगिरीणामपिदारणां॥५६॥नागंजिघांसुः
सहसाचिक्षेपचमहाबलः॥सविस्फुलिंगमालाभिःसमंतात्परिवेष्टितः॥तमापतंतंसहसादृष्ट्वाप्राग्ज्योतिषोनृपः॥चिक्षेपरुचि
रंतीक्ष्णमर्द्धचंद्रंसुदारुणं॥५८॥चिच्छेदतन्महच्छूलंतेनबाणेनवेगवान्॥उत्पपातद्विधाच्छिन्नंशूलंहेमपरिष्कृतं॥५९॥महाश
निर्यथाभ्रष्टाशक्रमुक्तानभोगता॥शूलंनिपतितंदृष्ट्वाद्विधाकृतंचपार्थिवः॥६०॥रुक्मदंडांमहाशक्तिंजग्राहाग्निशिखोपमां
चिक्षेपत्वरितोराक्षसस्यतिष्ठतिष्ठेतिचाब्रवीत्॥६१॥

म०भा०भी०॥
॥२३५॥

तमापततं नीसंप्रेक्ष्य वियत्स्थामशनीमिव॥ उत्पपात ततः सर्ण्णो जग्राह च ननाद च॥६३ बभंज चैनां त्वरितो जानुन्यारोप्य भारत॥ पश्यतः पा
र्थिवेंद्रस्य तदद्भुतमिवाभवत्॥६४ तद्दवेक्ष्य कृतं कर्म राक्षसेन बलीयसा॥ दिवि देवाः सगंधर्वा मेनिरे यक्ष्यापि विस्मिताः॥ पांडवाश्च म
हाराज भीमसेनपुरोगमाः॥ साधु साध्विति नादेन पृथिवीमनुनादयन्॥६५ तं तु श्रुत्वा महानादं प्रहृष्टानां महात्मनां॥ नामृष्यत
महेष्वासो भगदत्तः प्रतापवान्॥६६ स विस्फार्य्य महच्चापमिंद्राशनिसमप्रभं॥ तर्जयामास वेगेन पांडवानां महारथान्॥६७ वि
मुञ्चन् विमलांस्तीक्ष्णान् नाराचान् विमलप्रभान्॥ भीमसेनं विव्याध राक्षसं नवभिः शरैः॥६८ अभिमन्युं त्रिभिश्चैव के
कयान् पंचभिस्तथा॥ पूर्णायतविसृष्टेन शरेणानतपर्वणा॥६९ विभेद दक्षिणं बाहुं क्षेत्रदेवस्य चाहवे॥ तपात स हसानस्य सः
शरं धनुरुत्तमं॥७० द्रौपदेयांस्ततः पंच पंचभिः समताडयत्॥ भीमसेनस्य च क्रोधान्निजघान तुरंगमान्॥७१ ध्वजं केसरिणं
चास्य चिच्छेद विशिखैस्त्रिभिः॥ निर्बिभेद त्रिभिश्चान्यैः सारथिं चास्य पत्रिभिः॥७२ स गाढविद्धो व्यथितो रथोपस्थ उपाविश
त्॥ विशोको भरतश्रेष्ठ भगदत्तेन संयुगे॥७३ ततो भीमो महाबाहुर्विरथो रथिनां वरः॥ गदां प्रगृह्य वेगेन प्रचस्कंद रथोत्तमात्॥ ॥राम॥
॥७४ तमुद्यतगदं दृष्ट्वा सशृंगमिव पर्वतं॥ तावकानां भयं घोरं समपद्यत भारत॥७५ एतस्मिन्नेव काले तु पांडवः कृष्णसारथिः॥ ॥२३५॥
आजगाम महाराज निघ्नंछत्रून्समंततः॥ यत्र तौ पुरुषव्याघ्रौ पितापुत्रौ महाबलौ॥ प्राग्ज्योतिषेण संयुक्तौ भीमसेनघटोत्कचौ
॥७६॥

दृष्ट्वाचपांडवोघ्नन्तंनयुध्यमानान्महारथान्॥ चरितोभरतश्रेष्ठतत्रायुध्यतकिरञ्शरान्॥७९॥ ततोदुर्योधनोराजात्वरमाणोमहारथ॥ सेना
मचोदयत्क्षिप्रंरथनागाश्वसंकुलां॥ तामापतंतींसहसाकौरवाणांमहाचमूं॥ अभिदुद्राववेगेनपांडवःश्वेतवाहनः॥८०॥ भगदत्तश्चस
मरेतेनराजेनभारत॥ विमर्दन्पांडवावलंयुधिष्ठिरमुपाद्रवत्॥८१॥ तदासीत्सुमहद्युद्धंभगदत्तस्यमारिष पांचालैःपांडवैर्येश्चकेकयै
श्चोद्यतायुधैः॥८२॥ भीमसेनोपिसमरेतावुभौकेशवार्जुनौ॥ आश्रावयद्यथावृत्तमिरावद्वधमुत्तमं॥८३॥ इतिश्रीमहाभारतेभीष्मपर्व
णि॥९॥ संजयउवाच॥ पुत्रंविनिहतंश्रुत्वाइरावंतंधनंजय॥ दुःखेनमहताविष्टोनिश्वसन्पन्नगोयथा॥१॥ अब्रवीत्समरेराजन्वासु
देवमिदंवचः॥ इदंनूनंमहाप्राज्ञोविदुरोदृष्टवान्पुरा॥२॥ कुरूणांपांडवानांचभयंघोरंमहामतिः॥ सततोनिवारितवान्धृतराष्ट्रज
नेश्वरं॥३॥ अन्येचबहवोवीराःसंग्रामेमधुसूदन॥ निहताःकौरवैःसंख्येतथास्माभिश्चकौरवाः॥४॥ अर्थहेतोर्नरश्रेष्ठक्रियते
कर्मकुत्सितं॥ धिगर्थान्यत्कृतेह्येवंक्रियतेज्ञातिसंक्षयः॥५॥ अधनस्यमृतंश्रेयोनचज्ञातिवधाद्धनं॥ किंनुप्राप्स्यामहेकृष्णहत्वाज्ञा
तीन्समागतान्॥६॥ दुर्योधनापराधेनशकुनेःसौवलस्यच॥ क्षत्रियानिधनंयांतिकर्णदुर्मंत्रितेनच॥७॥ इदानींचविजानामिसुकृतंम
धुसूदन॥ कृतंराज्ञामहाबाहोयाचयामाससुयोधनं॥८॥ राज्यार्धंपंचवाग्रामान्नाकार्षीत्सचदुर्मतिः॥ दृष्ट्वाहिक्षत्रियाञ्शूराञ्शयानान्ध
रणीतले॥९॥ निंदाम्यहमृशमात्मानंधिगस्तुक्षत्रजीविकां॥ अशक्तमितिमामत्रज्ञास्यंतेक्षत्रियारणे॥१०॥ युद्धंतुमेनरुचितंज्ञातिभिर्मधुसू

दन॥ संचोदयहयान्शीघ्रंयाहिराष्ट्रचमूंप्रति॥११॥

॥भा०भी०॥ प्रतरिष्येमहामारंसुजाम्यांसमरोदधिं ॥ नायंपालयितुंकालोविद्यतेमाधवकेचित ॥ एवमुक्तस्तुपार्थेनकेशवः परवीरहा ॥ चोदयामासता
॥२३६॥ नश्वानपांडुरान्वातरंहसः ॥ अथशब्दोमहानासीत्तवसैन्यस्यभारत ॥ मारुतोद्धूतवेगस्यसागरस्येवपर्वणि ॥ १४ अपराः पांडवेयाश्च
संग्रामः समपद्यत ॥ पर्जन्यसमनिर्घोषोभीष्मस्यसहपांडवैः ॥ १५ ततोराजंस्तवसुतोभीमसेनमुपाद्रवत ॥ परिवार्यरणेद्रोणंवसा
वोवासवंयथा ॥ ततः शांतनवोभीष्मः कृपश्चरथिनांवरः ॥ भगदत्तः सुशर्माचधनंजयमुपाद्रवत ॥ १६ ॥ हार्दिक्योवाल्हिकश्चैवसा
त्यकिंसमभिद्रुतौ ॥ अंबष्ठकस्तुनृपतिरभिमन्युमवस्थित ॥ शेषास्त्वन्येमहाराजशेषानेवमहारथान ॥ ततः प्रववृतेयुद्धंघोररूप
भयावहं ॥ भीमसेनस्तुसंप्रेक्ष्यपुत्रांस्तवजनेश्वर ॥ प्रजज्वालरणेक्रुद्धोहविषाहव्यवाडिव ॥ २० पुत्रास्तुतवकौंतेयछादयांचक्रि
रेशरैः ॥ प्रावृषीवमहाराजजलदाद्रिवपर्वतं ॥ २१ सछाद्यमानोबहुधापुत्रैस्तवविशांपते ॥ सृक्किणीसंलिहन्वीरः शार्दूलइवदर्पितः २२
व्यूढोरस्कंततोभीमः पातयामासभारत ॥ क्षुरप्रेणसुतीक्ष्णेनसोभवद्गतजीवितः ॥ २३ अपरेणतुभल्लेनपीतेननिशितेनच ॥ अपातय
त्कुंडलिनंसिंहः क्षुद्रमृगंयथा ॥ २४ ततः सुनिशितान्वाणान्समादायशिलीमुखान ॥ ससर्जत्वरयायुक्तः पुत्रांस्तेप्राप्यमारिष ॥ २५ ॥ ॥राम॥
प्रेषितानभीमसेनेनशरास्तेदृढधन्विना ॥ अयातयंतपुत्रांस्तेरथेभ्यः सुमहारथान ॥ २६ ॥ अनाधृष्टिंकुंडभेदंवैराटंदीर्घलोचनं ॥ दीर्घबा ॥२३६॥
हुंसुबाहुंचतथैवकनकध्वजं ॥ २७ प्रपतंतिस्मवीरास्तेविरेजुर्भरतर्षभ ॥ वसंतेपुष्पशवलाश्चूताः प्रपतिताइव ॥ २८ ॥

ततःप्रदुद्रुवुःशेषास्तवपुत्रामहाहवे॥तंकालमिवमन्यंतोभीमसेनंमहावलं।२९द्रोणस्तुसमरेवीरंनिर्दहंतंसुतांस्तव॥यथाद्रिंवारिधारा
भिःसमंताद्व्याकिरज्जरे॥३०॥तत्राद्भुतमपश्यामकुंतीपुत्रस्यपौरुषं॥द्रोणेनवार्यमाणोपिनिजघ्नेयत्सुतांस्तव॥३१॥यथागोवृषभोव
र्षंसंधारयतिखात्पततः॥भीमस्तदाद्रोणमुक्तंशरवर्षमदीधरत्॥३२॥अद्भुतंचमहाराजतत्रचक्रेवृकोदरः॥यत्पुत्रांस्तेवधीत्संख्येद्रोणं
चैवन्यवारयत्॥३३॥पुत्रेषुतववीरेषुचिक्रीडार्जुनपूर्वजः॥मृगेष्विवमहाराजचरन्व्याघ्रोमहावलः॥३४॥यथाहिपशुमध्यस्थोदार
यतेपशून्वृकः॥वृकोदरस्तवसुतांस्तथाव्यद्रावयद्रणे॥गांगेयोभगदत्तश्चगौतमश्चमहारथाः॥पांडवंभरसंयुद्धेधारयामासुरर्जु
न॥३६॥अस्त्रैरस्त्राणिसंवार्यतेषांसोतिरथोरणे॥प्रवीरांस्तवसैन्येषुप्रेषयामासमृत्यवे॥३७॥अभिमन्युस्तुराजानंअंवष्ठंलो
कविश्रुतं॥विरथंरथिनांश्रेष्ठंवारयामाससायकैः॥विरथोवध्यमानस्तुसौभद्रेणयशस्विना॥अवप्लुत्यरथात्तूर्णमंवष्ठोवसु
धाधिपः॥३९॥असिंचिक्षेपसमरेसौभद्रस्यमहात्मनः॥आरुरोहरथंचैवहार्दिक्यस्यमहावलः॥४०॥आपतंतंतुनिस्त्रिंशंयुद्धमार्गवि
शारदः॥लाघवाद्व्यंसयामाससौभद्रःपरवीरहा॥४१॥व्यंसितंवीक्ष्यनिस्त्रिंशंसौभद्रेणरणेतदा॥साधुसाध्वितिसैन्यानांप्रवादोभूद्वि
शांपते॥४२॥धृष्टद्युम्नमुखास्त्वन्येतवसैन्यमयोधयन्॥तथैवतावकाःसर्वेपांडुसैन्यमयोधयन्॥४३॥तत्राक्रंदोमहानासीत्त
वतेषांचभारत॥निघ्नतांदृढमन्योन्यंकुर्वतांकर्मदुष्करं॥४४॥

॥भा० भी०
॥२३७॥

न्याः ऽन्योन्यं छिरसोऽभूरन्ः केशग्राहकृष्णामानिन॥ नखदंतैरयुध्यंत मुष्टिभिर्जानुभिस्तथा॥ ४५ तलैश्चैवाथ निस्त्रिंशैर्बाहुभिश्च सुसं
स्थितैः॥ विवरं चाप्य चान्योन्यमनयन्यमसादनं॥४६॥ अहनच्च पिता पुत्रं पुत्रश्चापि पितरं तथा॥ व्याकुलीकृतसर्वांगा युयुधुस्तत्र मा
नवाः॥४७ रणे चारूणि चापानि हेमपृष्ठानि मारिष॥ हतानामपविद्धानि कलापाश्च महाधनाः॥४८ जातरूपमयैः पुंखै राजते
र्निशिताः शराः॥ तैलधौता व्यराजंत निर्मुक्तभुजगोपमाः॥४९॥ हतानामपविद्धानि जातरूपपरिष्कृतान्॥ चर्माणि चापविद्धानि रु
क्मचित्राणि धन्विनः॥५०॥ सुवर्णविकृतप्रासान् पट्टिशान्हेमभूषितान्॥ जातरूपमयाश्चर्ष्टीः शक्तीश्च कनकोज्वलाः॥५१॥ मुस
लानि हतानि चापतितान्मुशलानि गुरूणि च॥ परिघान् पट्टिशांश्चैव भिंदिपालांश्च मारिष॥५२॥ पतितान्विविधांश्चापान्चित्रान्हेम
परिष्कृतान्॥ कुथावकुविधाकारांश्चामरान्व्यजनानि च॥५३॥ नानाविधानि शस्त्राणि प्रगृह्य पतितान्नरान्॥ जीवंत इव दृश्यंते
गतसत्वा महाबलाः॥५४॥ गदाविमथितैर्गात्रैर्मुशलैर्भिन्नमस्तकाः॥ गजवाजिरथक्षुण्णाः शेरते न्टपते क्षितौ॥५५॥ तथैवाश्व
नागानां शरीरैर्विबभौ तदा॥ संछन्ना वसुधा राजन्पर्वतैरिव सर्वशः॥५६॥ समरे पतितैश्चैव शक्त्यृष्टिशरतोमरैः॥ निस्त्रिंशैः ॥राम॥
पट्टिशैः प्रासैरयःकुंतैः परश्वधैः॥५७॥ परिघैर्भिंदिपालैश्च शतघ्नीभिश्च मारिष॥ शरीरैः शस्त्रनिर्भिन्नैः समास्तीर्यत मेदिनी॥ ॥२३७॥
विशल्यैरल्पशब्दैश्च शोणितौघपरिप्लुतैः॥ गतासुभिरमित्रघ्न विबभौ निचिता मही॥५८॥

सतलत्रैः सकेयूरैर्बाहुभिश्चंदनोक्षितैः ॥ हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनां ॥६०॥ बद्धचूडामणिवरैः शिरोभिश्च सकुंडलैः ॥ पाति-
तैर्ऋषभाक्षाणां बभौ भारत मेदिनी ॥६१॥ कवचैः शोणितादिग्धैर्विप्रकीर्णैश्च कांचनैः ॥ रराज सुभृशं भूमिः शांतार्चिभिरिवानलैः ॥
विप्रविद्धैः कलापैश्च पतितैश्च शरासनैः ॥ विप्रकीर्णैः शरैश्चैव रुक्मपुंखैः समंततः ॥६२॥ रथैश्च सर्वतोभग्नैः किंकिणीजालभू-
षितैः ॥ वाजिभिश्च हतैर्बाणैः स्रस्तजिह्वैः सशोणितैः ॥६४॥ अनुकर्षैः पताकाभिरुपासंगैर्ध्वजैरपि ॥ प्रवीराणां महाशंखैर्विप्रकी-
र्णैश्च पांडुरैः ॥६५॥ करैः शरैर्विमुंचद्भिः शीकरं च मुहुर्मुहुः ॥ विबभौ नगस्थानं स्पंदमानैरिवाचलैः ॥६६॥ नानारागैः कंबलैश्च
परिस्तोमैश्च दंतिनां वैडूर्यमणिदंडैश्च पतितैरंकुशैः शुभैः ॥६७॥ घंटाभिश्च गजेंद्राणां पतिताभिः समंततः ॥ विपाटितविचित्राभिः कुथाभि-
रांकवैस्तथा ॥६८॥ ग्रैवेयैश्चित्ररूपैश्च रुक्मकक्षाभिरेव च ॥ यंत्रैश्च बहुधा छिन्नैस्तोमरैश्चापि कांचनैः ॥६९॥ अश्वानां रेणुकपिलै रुक्मच्छ-
न्नैरुरश्छदैः ॥ सादिनां भुजगैश्छिन्नैः पतितैः सांगदैस्तथा ॥७०॥ प्रासैश्च विमलैस्तीक्ष्णैर्विमलाभिस्तथर्ष्टिभिः ॥ उष्णीषैश्च तथा चित्रैर्विप्र-
विद्धैस्ततस्ततः ॥७१॥ विचित्रैर्बाणवर्षैश्च जातरूपपरिष्कृतैः ॥ अश्वास्तरपरिस्तोमै रांकवैर्मर्दितैस्तथा ॥ नरेंद्रचूडामणिभिर्विचित्रैश्च
महाधनैः ॥ छत्रैस्तथापविद्धैश्च चामरव्यजनैरपि ॥७३॥ पद्मेंदुद्युतिभिश्चैव वदनैश्चारुकुंडलैः ॥ क्लृप्तश्मश्रुभिरत्यर्थं वीराणां समलंकृ-
तैः ॥ अपविद्धैर्महाराज सुवर्णोज्ज्वलकुंडलैः ॥७४॥

गृह्णन स्तत्र शवलाघोरिवासीद्वसुंधरा ७५॥ एवमेतेमहासेनेमर्दितेतत्र भारत॥ परस्परं समासाद्य तवतेषांच संयुगे॥ ७६ तेषु श्रांतेषु भग्ने
षु मर्दितेषु च भारत॥ रात्रिः समभवत्तत्र न पश्याम ततोनुगान॥ ततो वहासेन्यानांप्रचक्रुः कुरुपांडवा॥ न्यविशंत यथा कालं गत्वा
स्वशिविरं तदा॥ ७८ इति श्रीमहाभारते भीष्मपर्वणि अष्टमदिवसयुद्धसमाप्तम्॥ संजय उवाच॥ ततो दुर्योधनो राजा शकुनिश्चापि सौ
वलः॥ दुःशासनश्च पुत्रस्ते सूतपुत्रश्च दुर्जयः॥ १ समागम्य महाराज मंत्रं चक्रुर्विवक्षितं॥ कथं पांडुसुता संख्ये जेतव्याः सगणा इति
२ ततो दुर्योधनो राजा सर्वांस्तानाह मंत्रिणः॥ सूतपुत्रं समाभाष्य सौवलं च महाबलं॥ ३ द्रोणो भीष्मः कृपः शल्यः सोमदत्तिश्च
संयुगे॥ न पार्थान्प्रतिवाधंते न जाने तच्च कारणं॥ ४ अवध्यमानास्ते चापि क्षययंति वलं मम॥ सोस्मि क्षीणवलः कर्ण क्षीणश
स्त्रश्च संयुगे॥ ५ निकृतः पांडवैः शूरैरवध्यैर्दैवतैरपि॥ सोहं संशयमापन्नः प्रहरिष्ये कथं रणे॥ ६ कर्ण उ०॥ मा शोच भरतश्रेष्ठ करिष्ये
हं प्रियं तव॥ भीष्मः शांतनवस्तूर्णमपयातु महारणात्॥ ७ निवृत्ते युधि गांगेये न्यस्तशस्त्रे च भारत॥ अहं पार्थान्हनिष्यामि सहितान्
सर्वसोमकैः॥ ८ पश्यतो युधि भीष्मस्य शपे सत्येन ते नृप॥ पांडवेषु दयां नित्यं स हि भीष्मः करोति वै॥ ९॥ अशक्तश्च रणे भीष्मो जेतुं

मेतान्महारथान ॥ अभिमानीरणोभीष्मोनित्यंचापिरणप्रिय ॥१०॥ सकथंपांडवान्युद्धेऽभ्येष्यतेतातसंगतान ॥ सत्वंशीघ्रमितोगत्वाभी
ष्मस्यशिविरंप्रति ११ अनुमान्यगुरुंवृद्धंशस्त्रन्यासायभारत ॥ न्यस्तशस्त्रेततोभीष्मेनिहतान्पश्यपांडवान १२ मयेकेनरणेराजन्सस
हृद्गणबांधवान ॥ एवमुक्तस्तुकर्णेनपुत्रोदुर्योधनस्तव ॥ अब्रवीद्भ्रातरंतत्रदुःशासनमिदंवचः ॥ अनुयात्रंयथासर्वंसज्जीभवतिसर्वशः
१४ दुःशासनतथाक्षिप्रंसर्वमेवोपपादय ॥ एवमुक्त्वाततोराजन्कर्णमाहजनेश्वर ॥ १५ ॥ अनुमान्यरणेभीष्ममेषोहंद्विपदांवर ॥ आग
मिष्येततःक्षिप्रंत्वत्सकाशमरिंदम ॥ १६ ॥ आपयातेततोभीष्मेप्रहरिष्यसिसंयुगे ॥ निष्पपाततततस्तूर्णंभ्रात्रादुःशासनस्तथा अग
दीवद्धसुकटोहस्ताभरणवान्नृप १९ धार्तराष्ट्रोमहाराजविवभौसपथिव्रजन ॥ भंडीपुष्पनिकाशेनतपनीयनिभेनच ॥ २० ॥ अनुलि
प्तःपरार्द्ध्येनचंदनेनसुगंधिना ॥ अरजोंवरसंवीतःसिंहखेलगतिर्नृप ॥ २१ सुशुभेविमलार्चिष्मान्नभसीवदिवाकर ॥ तंप्रयान्तनरव्या
घ्रंभीष्मस्यशिविरंप्रति ॥ अनुजग्मुर्महेष्वासाःसर्वलोकस्यधन्विनः ॥ भ्रातरश्चमहेष्वासास्त्रिदशाइववासवं ॥ २३ हयानन्येसमारुह्यगजा
जानन्येचभारत ॥ रथानन्येननरश्रेष्ठाःपरिवव्रुःसमन्ततः ॥ २४ ॥ आत्तशस्त्राश्चसुहृदोरक्षणार्थंमहीपतेः ॥ प्रादुर्बभूवुःसहिताःशक्रस्ये
वामरादिवि ॥ २५ ॥ संपूज्यमानाःकुरुभिःकौरवाणांमहाबलः ॥ प्रययौसदनंराजागांगेयस्ययशस्विनः ॥ अन्वीयमानःसततंसोदरैःप
रिवारितः ॥ दक्षिणंदक्षिणःकालेसंभृत्यस्वभुजंतदा ॥ २७ हस्तिहस्तोपमंशैक्यंसर्वशत्रुनिवर्हणं ॥ ७ ॥

॥भा०भी०॥ प्रगृह्य चांजलीन्नृणां संघशस्सर्वतो दिशः ॥२८॥ शुश्राव मधुरा वाचो नानादेशनिवासिनां ॥ संस्तूयमानः सूतैश्च मागधैश्च महायशाः
॥२३६॥ ॥२९॥ पूजयानश्च तान्सर्वान् सर्वलोके महेश्वरः ॥ प्रदीपैः कांचनैस्तत्र गंधतैलावसेचितैः ॥३०॥ परिवव्रुर्महात्मानः प्रज्वलद्भिः समं
ततः ॥ स तैः परिवृतो राजा प्रदीप्तैः कांचनैर्ज्वलन् ॥३१॥ शुशुभे चंद्रमा युक्तो दीप्तैरिव महाग्रहैः ॥ कांचनोष्णीषिणस्तत्र वेत्रझर्झरपाण
यः ॥३२॥ प्रोत्सारयंतः शनकैस्तं जनं सर्वतो दिशं ॥ संप्राप्य तु ततो राजा भीष्मस्य सदनं शुभं ॥३३॥ अवतीर्य हयाच्चापि भीष्मं प्राप्य जने
श्वरः ॥ अभिवाद्य ततो भीष्मं निषण्णः परमासने ॥३४॥ कांचने सर्वतोभद्रे स्पर्द्ध्यास्तरणसंवृते ॥ उवाच प्रांजलिर्भीष्मं वाष्पकंठोश्रुलो
चनः ॥३५॥ त्वां वयं हि समाश्रित्य संयुगे शत्रुसूदन ॥ उत्सहेम रणे जेतुं सेंद्रानपि सुरासुरान् ॥ किमु पांडुसुतान्वीरान्ससुहृद्गणबांध
वान् ॥ तस्मादर्हसि गांगेय कृपां कर्तुमपि प्रभो ॥३७॥ जहि पांडुसुतान्वीरान्महेंद्र इव दानवान् ॥ अहं सर्वान्महाराज निहनिष्यामि सो
मकान् ॥३८॥ पांचालान्केकयैः सार्द्धं कुरूणां चेति भारत ॥ तद्वचः सत्यमेवास्तु जहि पार्थान्समागतान् ॥३९॥ सोमकांश्च महेष्वासान्
सत्यवाग्भव भारत ॥ दयया यदि वा राजन्द्वेष्यभावान्मम प्रभो ॥४०॥ मंदभाग्यतया वापि मम रक्षसि पांडवान् ॥ अनुजानीहि समरे कर्ण ॥राम॥
माहवशोभिनं ॥४१॥ स जेष्यति रणे पार्थान्ससुहृद्गणबांधवान् ॥ स एवमुक्त्वा नृपतिः पुत्रो दुर्योधनस्तव ॥ नोवाच वचनं किंचिद्भीष्मं ॥२३६॥
सत्यपराक्रमं ॥४२॥ इति श्रीमहाभारते भीष्मपर्वणि० ॥ संजय उवाच ॥ ७४ ॥

वाक्शल्यैस्तव पुत्रेणासोतिविद्धो महामनाः ॥ श्वसमानो यथा नागः प्रणुन्नो वाक्शलाकया ॥ १ ॥ दुःखेन महताविष्टो नोवाच प्रियमप्रि
सध्यात्वा सुचिरं कालं दुःखरोषसमन्वितः ॥ २ ॥ उद्धृत्य च रुषा चक्षुषी कोपान्निर्दहन्निव भारत ॥ सदेवासुरगंधर्वे लोके लोकविदां वरः ॥ ३ ॥ अब्र
वीत्तव पुत्रं स सामपूर्वमिदं वचः ॥ किं त्वं दुर्योधनैवं मां वाक्शल्यैरप न्तसि ॥ ४ ॥ घटमानं यथाशक्ति कुर्वाणं च तव प्रियं ॥ जुह्वानं समरे
प्राणांस्तवैव प्रियकाम्यया ॥ ५ ॥ यदा तु पांडवः शूरः खांडवेऽग्निमतर्पयत् ॥ पराजित्य रणे शक्रं पर्याप्तं तन्निदर्शनं ॥ ६ ॥ यदा च त्वां महाबा
हो गंधर्वैर्हृतमोजसा ॥ अमोचयत्पांडुसुतः पर्याप्तं तन्निदर्शनं ॥ ७ ॥ द्रवमाणेषु शूरेषु सोदरेषु तव प्रभो ॥ सूतपुत्रे च राधेये पर्याप्तं तन्नि
दर्शनं ॥ ८ ॥ यच्चैनः सहितान्सर्वान्विराटनगरे तदा ॥ एक एव समुद्यातः पर्याप्तं तन्निदर्शनं ॥ ९ ॥ द्रोणं च युधि संरब्धं मां च निर्जित्य संयुगे
वासांसि च समादत्त पर्याप्तं तन्निदर्शनं ॥ १० ॥ तथा द्रौणिं महेष्वासं शारद्वतमथापि च ॥ गोग्रहे जितवान्पूर्वं पर्याप्तं तन्निदर्शनं ॥ ११ ॥ वि
जित्य च यथा कर्णं सदा पुरुषमानिनं ॥ उत्तरायै ददौ वस्त्रं पर्याप्तं तन्निदर्शनं ॥ १२ ॥ निवातकवचान्युद्धे वासवेनापि दुर्जयान् ॥ जितवान्
समरे पार्थः पर्याप्तं तन्निदर्शनं ॥ १३ ॥ को हि शक्तो रणे जेतुं पांडवं भसनदा ॥ त्वं तु मोहान्न जानीषे वाच्यावाच्यं सुयोधन ॥ १४ ॥ मुमूर्षु
र्हि नरः सर्वान्वृक्षान्पश्यति कांचनान् ॥ तथा त्वमपि गांधारे विपरीतानि पश्यसि ॥ १५ ॥ स्वयं वैरं महत्कृत्वा पांडवैः सहसृंजयैः ॥ युध्य
स्व तानघ रणोपश्यामः पुरुषोत्तम ॥ १६ ॥ अहं तु सोमकान्सर्वान्पांचालांश्च समागतान् ॥ निहनिष्ये नरव्याघ्र वर्जयित्वा शिखंडिनं
॥ १७ ॥

॥भा०भी०॥
॥२४०॥

तैरहंनिहतः संख्येनमिथ्येयसमाहृतं ॥ तान्वानिहत्यसमरेप्रीजितास्याम्यहंतव ॥ पूर्वंहिस्त्रीसमुत्पन्नाशिखंडीराजवेश्मनि ॥ वरदानात्पु
मानजातः सैषवैस्त्रीशिखंडिनी ॥ १९ ॥ तमहंनिहनिष्यानिप्राणत्यागेपिभारत ॥ योसौप्राङ्०निर्मिताधात्रासैषावैस्त्रीशिखंडिनी
॥ २० ॥ सुखंस्वपिहिगांधारेश्वोस्मिकर्तामहारणं ॥ यंजनाःसमुकर्षतियावत्स्थास्यतिमेदिनी ॥ २१ ॥ एवमुक्तस्तवसुतोनिर्जगाममनेश्व
रः ॥ अभिवाद्यगुरुंमूर्ध्नाप्रययौस्वंनिवेशनं ॥ २२ ॥ आगम्यतुततोराजाविसृज्यचमहाजनं ॥ प्रविवेशततस्तूर्णंक्षयंशत्रुक्षयंकरः
॥ २३ ॥ प्रविष्टः सनिशांतांचगमयामासपार्थिवः ॥ प्रभातायांचशर्वर्यांप्रातरुत्थाययतान्नृप ॥ २४ ॥ राज्ञःसमाज्ञापयत्सेनयोर्जय
तेतिहि ॥ अद्यभीष्मोरणेक्रुद्धोनिहनिष्यतिसोमकान् ॥ २५ ॥ दुर्योधनस्यतच्छ्रुत्वाराज्ञोविलपितंबहु ॥ मन्यमानः सतंराजन्प्रत्या
देशमिवात्मनः ॥ २६ ॥ निर्वेदंपरमंगत्वाविनिंद्यपरवाच्यतां ॥ दीर्घंदध्यौशांतनवोयोद्धुकामोर्जुनंरणे ॥ इंगितेनतुतज्ज्ञात्वागांगेयेनवि
चिंतितं ॥ दुर्योधनोमहाराजदुःशासनमचोदयत् ॥ २८ ॥ दुःशासनरथास्तूर्णंयुज्यंतांभीष्मरक्षिणः ॥ द्वाविंशतिमनीकानिसर्वाण्य
वाभिचोदय ॥ २९ ॥ इदंहिसमनुप्राप्तंवर्षपूगाभिचिंतितं ॥ पांडवानांससैन्यानांवधोराज्यस्यचागमः ॥ ३० ॥ तत्रकार्यतमंमन्येभीष्म ॥रम॥
स्यैवाभिरक्षणं ॥ सनोगुप्तः सहायःस्याद्धन्यात्पार्थांश्चसंयुगे ॥ ३१ ॥ अब्रवीद्धिविशुद्धात्मानाहंहन्यांशिखंडिनं ॥ स्त्रीपूर्वकोह्यसौ ॥२४०॥
सौराजंस्तस्माद्वर्ज्योमयारणे ॥ ३२ ॥

लोकस्तद्वद्यदहं पितुः प्रियचिकीर्षया ॥ राज्यं स्फीतं महाबाहो स्त्रियश्च त्यक्तवान्पुरा ॥३३॥ नैव चाहं स्त्रियं जातु न स्त्रीपूर्वं कथंचन हन्यां यु-
धि नरश्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥३४॥ अयं स्त्रीपूर्वको राजञ्छिखंडी यदि ते श्रुतः ॥ उद्योगे कथितं यत्तत्तथा जाता शिखंडिनी ॥३५॥ कन्या भू-
त्वा पुमान्जातः स च मां योधयिष्यति ॥ तस्याहं प्रमुखे बाणान्न मुंचेयं कथंचन ॥ युद्धे हि क्षत्रिया स्तात पांडवानां जयैषिणः ॥ सर्वांनस्मा-
न्हनिष्यामि संप्राप्तान्रणमूर्द्धनि ॥३६॥ एवं स भरतश्रेष्ठ गांगेयः प्राह शास्त्रवित् ॥ तत्र सर्वात्मना मन्ये गांगेयस्यैव पालनं ॥३७॥ अ-
रक्ष्यमाणो हि वृको हन्यात्सिंहं महाहवे ॥ मा वृकेणेव गांगेयं घातयेम शिखंडिना ॥३८॥ मातुलः शकुनिः शल्यः कृपो द्रोणो विविंश-
तिः ॥ यत्ता रक्षंतु गांगेयं तस्मिन्युद्धे ध्रुवो जयः ॥४०॥ एतच्छ्रुत्वा तु ते सर्वे दुर्योधनवचस्तथा ॥ सर्वतो रथवंशेन गांगेयं पर्यवारयन् ।
॥४१॥ पुत्राश्च तव गांगेयं परिवार्य प्रयुस्तदा ॥ कंपयंतो भुवं द्यां च क्षोभयंतश्च पांडवान् ॥४२॥ तै रथैः सुप्रसंयुक्तैर्दंतिभिश्च महारथा ॥ प-
रिवार्य रणे भीष्मं दंशिताः समवस्थिता ॥४३॥ यथा देवासुरे युद्धे त्रिदशा वज्रधारिणं ॥ सर्वे ते स्म व्यतिष्ठंत रक्षंतस्तं महारथं ॥४४॥ सव्य-
चक्रे युधामन्युरुत्तमौजाश्च दक्षिणं ॥ गोप्तारावर्जुनस्यैतावर्जुनोपि शिखंडिनः ॥४५॥ रक्ष्यमाणः स पार्थेन तस्माद्स्मान्निरहंत ॥ यथा
भीष्मं स नो हन्याद्दुःशासन तथा कुरु ॥४६॥ भ्रातुस्तद्वचनं श्रुत्वा पुत्रो दुःशासनस्तव ॥ भीष्मं प्रमुखतः कृत्वा प्रययौ सह सेनया ॥४७
भीष्मं तु रथवंशेन दृष्ट्वा समभिसंवृतं ॥ अर्जुनो रथिनां श्रेष्ठो धृष्टद्युम्नमुवाच ह ॥४८॥ शिखंडिनं नरव्याघ्र भीष्मस्य प्रमुखे नृप ॥ ॥

स्थापयस्वाघपोचाल्पानस्यगापाहमित्युत।।४८।।इतिभीष्मपर्वणि६०।।संजयउ०।।ततःशांतनवोभीष्मोनिर्ययौसहसेनया।।व्यूहंचाव्यूहा-
नमहत्सर्वतोभद्रमात्मना।।१।।कृपश्चकृतवर्माचशैब्यश्चैवमहारथः।।शकुनिःसैंधवश्चैवकांबोजश्चसुदक्षिणः।।२।।भीष्मेणास-
हिताःसर्वेपुत्रैश्चतवभारत।।अग्रतःसर्वसैन्यानांव्यूहस्यप्रमुखेस्थिताः।।३।।द्रोणोभूरिश्रवाःशल्योभगदत्तश्चमारिष।।दक्षिणं
पक्षमाश्रित्यस्थिताव्यूहस्यदंशिताः।।४।।अश्वत्थामासोमदत्तश्चावंत्यौचमहारथौ।।महत्यासेनयायुक्तौवामपक्षमपालयन्
।।५।।दुर्योधनोमहाराजत्रिगर्तैःसर्वतोवृतः।।व्यूहमध्येस्थितोराजन्पांडवान्प्रतिभारत।।६।।अलंबुषोरथश्रेष्ठःश्रुतायुश्चमहारथः
पृष्ठतःसर्वसैन्यानांस्थितौव्यूहस्यदंशितौ।।७।।एवंचैतांस्तदाव्यूहंकृत्वाभारतावकाः।।सन्नद्धाःसमदृश्यंतप्रपतंतइवाग्नयः।।८।।
ततोयुधिष्ठिरोराजाभीमसेनश्चपांडवः।।नकुलःसहदेवश्चमाद्रीपुत्रावुभावपि।।अग्रतःसर्वसैन्यानांस्थिताव्यूहस्यदंशिताः।।९।।
धृष्टद्युम्नोविराटश्चसात्यकिश्चमहारथः।।१०।।स्थिताःसैन्येनमहतापरानीकविनाशनाः।।शिखंडीविजयश्चैवराक्षसश्चघटो-
त्कचः।।११।।चेकितानोमहाबाहुःकुंतीभोजश्चवीर्यवान्।।स्थितारणेमहाराजमहत्यासेनयावृताः।।१२।।अभिमन्युर्महेष्वासोद्रुप-
दश्चमहाबलः।।केकयाभ्रातरश्चैवस्थितायुद्धायदंशिताः।।एवंतेपिमहाव्यूहंप्रतिव्यूह्यसुदुर्जयं।।पांडवाःसमरेशूराःस्थितायु-
द्धायदंशिताः।।१४।।तावकास्तुरणेयत्ताःसहसेनानराधिपाः।।अभ्युद्यतारणेपार्थान्भीष्मंकृत्वाग्रतोनृप।।७।।

तथैवपांडवाराजन्भीमसेनपुरोगमाः॥भीष्मंयोद्धुमभिप्रेप्सुसंग्रामेविजयैषिणः॥१८॥क्ष्वेडाःकिलकिलाशब्दाःक्रकचागोविषाणिकाः
भेरीमृदंगपणवानादयंतश्चकुंजराः॥पांडवाश्चाभ्यवर्त्तंतनदंतोभैरवान्रवान्॥भेरीमृदंगशंखानांदुंदुभीनांचनिस्वनैः॥१९॥उत्कुष्ट
सिंहनादैश्चवल्गितैश्चपृथग्विधैः॥वयंप्रतिनदंतस्तानगच्छामसत्वरान्विताः॥सहसैवाभिसंक्रुद्धास्तदासीत्तुमुलंमहत्॥ततोन्योन्यंप्र
धावंतःसंप्रहारंप्रचक्रिरे॥२०॥ततःशब्देनमहताप्रचकंपेवसुंधरा॥पक्षिणश्चमहाघोरंव्याहरंतोविबभ्रमुः॥२१॥सप्रभश्चोदितःसूर्योनि
ष्प्रभःसमपद्यत॥ववुश्चवातास्तुमुलाःशंसंतःसुमहद्भयं॥२२॥घोराश्चघोरनिर्ह्रादाःशिवास्तत्रववाशिरे॥वेदयंत्योमहाराजमहद्वै
शसमागतं॥२३॥दिशःप्रज्वलिताराजन्पांशुवर्षंपपातच॥रुधिरेणसमुन्मिश्रमस्थिवर्षंतथैवच॥२४॥रुदतांवाहनानांचनेत्रेभ्यःप्रा
पतज्जलं॥सुस्रुवुश्चासकृन्मूत्रंप्रध्यायंतोविशांपते॥२५॥अंतर्हितामहानादाःश्रूयंतेभरतर्षभ॥रक्षसांपुरुषादानांनदतांभैरवान्र
वान्॥२६॥संपतंतश्चदृश्यंतेगोमायुबलवायसाः॥श्वानश्चविविधैर्नादैर्वासंतस्तत्रमारिष॥२७॥ज्वलिताश्चमहोल्कावैसमाहत्य
दिवाकरं॥महांत्यनीकानिमहासमुच्छ्रयेसमागमेतयोः॥पांडवधार्त्तराष्ट्रयोः॥चकंपिरेशंखमृदंगनिस्वनैःप्रकंपितानीववनानिवायुना।
नरेंद्रनागाश्वसमाकुलानामभ्यापतंतीनामशिवेमुहूर्त्ते॥बभूवघोषस्तुमुलश्चमूनांवातोद्धुतानामिवसागराणां॥२८॥इतिभीष्म
पर्वणि॥०॥संजयउवाच॥अभिमन्यूरथोदारःपिशंगैस्तुरगोत्तमैः॥अभिदुद्राववतेजस्वीदुर्योधनबलंमहत्॥१॥

।।भा०मी०।। विकर्णश्छरवर्षाणिवाधाराइवांबुदः॥नशेकुःसमरेक्रुद्धंसौभद्रमरिसूदनं॥२॥शस्त्रौघिणंगाहमानंसेनासागरमक्षयं॥निवारयितुमप्या
॥२४२॥ जौत्वदीयाःकुरुनंदन॥३॥तेनमुक्तारणेराजन्शराःशत्रुनिवर्हणाः॥क्षत्रियाननयञ्छूरान्प्रेतराजनिवेशनं॥४॥यमदंडोपमान्घोरान्
ज्वलिताशीविषोपमान्॥सौभद्रःसमरेक्रुद्धःप्रेषयामाससायकान्॥५॥सरथान्रथिनस्तत्रहयांश्चैवससादिनः॥गजारोहांश्च
सगजान्दारयामासफाल्गुनिः॥६॥[illegible]नकुर्वंतःकर्ममहत्संख्येमहीभृतः॥पूजयांचक्रिरेहृष्टाःप्रशशंसुश्चफाल्गुनिं॥७॥ता
न्यनीकानिसौभद्रोद्रावयामासभारत॥तूलराशीनिवाकाशेमारुतःसर्वतोदिशं॥८॥तेनविद्राव्यमाणानितवसैन्यानिभारत॥
त्रातारंनाध्यगच्छंतपंकेमग्नाइवद्विपाः॥९॥विद्राव्यसर्वसैन्यानितावकानिनरोत्तम॥अभिमन्युःस्थितोराजन्विधूमोग्निरिव
ज्वलन्॥१०॥नचैनंतावकाराजन्विषेहुररिघातिनं॥प्रदीप्तंपावकंयद्वत्पतंगाःकालचोदिताः॥११॥प्रहरन्सर्वशत्रुभ्यःपांडवा
नांमहारथः॥अदृश्यतमहेष्वासःसवज्रइववासवः॥१२॥हेमपृष्ठंधनुश्चास्यददृशेविचरद्दिशः॥तोयदेषुयथाराजन्राजमा ॥राम॥
नाशतह्रदा॥शराश्चनिशिताःपीतानिश्चरंतिस्मसंयुगे॥वनात्फुल्लद्रुमाद्राजन्भ्रमराणामिववृजाः॥१४॥तथैवचरतस्तस्य ॥२४२॥
सौभद्रस्यमहात्मनः॥रथेनकांचनांगेनददृशुर्नांतरंजनाः॥मोहयित्वाकृपंद्रोणंद्रौणिंचसुमहद्बलं॥तंदृष्ट्वाक्षत्रियाःशूराः
प्रपतंतंतरस्विनं॥१६॥सैंधवश्चमहेष्वासोविचरन्लघुसुष्ठुच॥मंडलीकृतमेवास्यधनुःपश्यामिभारत॥१७॥

सूर्यमंडलसंकाशं दृहतस्तव वाहिनीं ॥ द्विफाल्गुनमिमं लोकं मेनिरे तस्य कर्मभिः ॥ १८ ॥ तेनार्दिता महाराज भारती सा महाचमूः ॥ अभ्रमत्त
त्तत्रैव योषिन्मदवशादिव ॥ १९ ॥ भ्रामयित्वा महासैन्यं कंपयित्वा महारथान् ॥ नंदयामास सुहृदो मयं जित्वेव वासवः ॥ २० ॥ तेन विद्राव्य
माणानि तव सैन्यानि संयुगे ॥ चक्रुरार्त्तस्वरं घोरं पर्जन्यनिनदोपमं ॥ २१ ॥ तं श्रुत्वा निनदं घोरं तव सैन्यस्य भारत ॥ मारुतोद्धूतवेगस्य सा
गरस्येव पर्वणि ॥ २२ ॥ दुर्योधनस्तदा राजन्नार्ष्यशृंगिमभाषत ॥ एकः कार्ष्णिर्महाबाहो द्वितीय इव फाल्गुनः ॥ २३ ॥ चमूं द्रावयते क्रोधा
द्वृत्रो देवचमूमिव ॥ तस्य चान्यं न पश्यामि संयुगे भेषजं महत् ॥ २४ ॥ अन्यं त्वां राक्षसश्रेष्ठ सर्वविद्यासु पारग ॥ स गत्वा त्वरितं वीरं जहि
सौभद्रमाहवे ॥ वयं पार्थं हनिष्यामो भीष्मद्रोणपुरोगमाः ॥ स एवमुक्तो बलवान् राक्षसेंद्रः प्रतापवान् ॥ प्रययौ समरे तूर्णं प्रययौ
तपुत्रशासनात् ॥ नर्दमानो महानादं प्रावृषीव बलाहकः ॥ तस्य शब्देन महता पांडवानां बलं महत् ॥ प्रचलत्सर्वतो राजन् वातोद्धूत इवा
र्णवः ॥ २८ ॥ बहवश्च महाराज तस्य नादेन भीषिताः ॥ प्रियान् प्राणान् परित्यज्य निपेतुर्धरणीतले ॥ २९ ॥ कार्ष्णिश्चापि मुदा युक्तः प्रगृह्य
सशरं धनुः ॥ नृत्यन्निव रथोपस्थो जरक्षसं समुपाद्रवत् ॥ ३० ॥ ततः स राक्षसः क्रुद्धः संप्राप्येवार्जुनिं रणे ॥ नातिदूरे स्थितां तस्य द्रावयामास वै
चमूं ॥ ३१ ॥ ता वध्यमाना च तथा पांडवानां महाचमूः ॥ प्रत्युद्ययौ रणे रक्षो देवसेनां यथा बलः ॥ ३२ ॥ विमर्दः सुमहानासीत्तस्य सैन्यस्य मारि
ष ॥ रक्षसा घोररूपेण वध्यमानस्य संयुगे ॥ ३३ ॥ ततः शरसहस्रैस्तां पांडवानां महाचमूं ॥ व्यद्रावयद्रणे रक्षो दर्शयन् स्वपराक्रमं ॥ ३४ ॥

॥भा० भी०॥ सावध्यमाना चत थापांड्वा नाम नीकिनी ॥ रक्षसाघोररूपेण द्रुद्रावमहद्भयात ॥३५॥ प्रमध्यचरणो सेनांपद्मिनी वारणोयथा ॥ ततोभिदु
॥२४३॥ द्राव रणे द्रौपदेयान्महावल ॥३६॥ तेतुक्रुद्धा महेष्वासा द्रौपदेयाः प्रहारिणः ॥ राक्षसं दुद्रुवुः संख्ये ग्रहाः पंचरविं यथा ॥ ततोभिदुद्र
व रणे द्रौपदेयान्महावलः ॥३७॥ तेतुक्रुद्धा महेष्वासा द्रौपदेयाः प्रहारिणः ॥ राक्षसं दुद्रुवुः वीर्यवद्भिस्ततस्तैस्तु पीड़ितो राक्षसोत्तमः
यथा युगक्षये घोरे चंद्रमाः पंचभिर्ग्रहैः ॥ प्रतिविंध्यस्ततो रक्षो विभेद निशितैः शरैः ॥ सर्वपारसवैस्तूर्णमकुण्ठाग्रैर्महावलः ॥३९
सतैर्भिन्नतनुत्राणः शुशुभे राक्षसोत्तमः ॥ मेघो विभिरिकार्कस्य संस्यूतो जलदो महान ॥४०॥ विषक्तैः सशरैः श्चापि तपनीयपरि
छदैः ॥ आर्ष्यशृंगिर्वभौ राजन् दीप्तशृंग इवाचलः ॥४१ ततस्ते भ्रातरः पंच राक्षसेंद्रं महाहवे ॥ विव्यधुर्निशितैर्वाणैस्तपनीय
विभूषितैः ॥४२॥ स निर्भिन्नः शरैर्घोरैर्भुजंगैः कोपितैरिव ॥ अलंवुषोभृशंराजन्नागेंद्र इव चुक्रुधे ॥४३ सोतिविद्धो महाराज मुहू
र्त्तमथ मारिष ॥ प्रविवेश तमो दीर्घं पीड़ितस्तैर्महारथैः ॥४४॥ प्रतिलभ्य ततः संज्ञां क्रोधेन द्विगुणीकृतः ॥ चिछेद सायकास्तेषां ध्व
जांश्च व धनूंषि च ॥४५॥ एकैकं पंचभिर्वाणैराजघान स्मयन्निव ॥ अलंवुषो रथोपस्थेन्नृत्यन्निव महारथः ॥४६॥ त्वरमाणः सुसंरब्धो ह ॥एम॥
यांस्तेषां महात्मनां ॥ जघान राक्षसः क्रुद्धः सारथींश्च महावलः ॥४७ विभेद च सुसंरब्धाः पुनश्चैतान् सुसंशितैः ॥ शरैर्वहुविधाका ॥२४३॥
रैः शतशोथ सहस्रशः ॥४८ विरथांश्च महेष्वासान् कृत्वा तत्र स राक्षसः ॥४

अभिदुद्राववेगेन हंतुकामो निशाचरः ॥४९॥ तानर्दितान्नरान्तोतेन राक्षसेन दुरात्मना ॥ दृष्ट्वार्जुनसुतः संख्ये राक्षसं समुपाद्रवत् ॥५०॥ त
योः समभवद्युद्धं वृत्रवासवयोरिव ॥ ददृशुस्तावकाः सर्वे पांडवाश्च महारथाः ॥५१॥ तौ समेतौ महायुद्धे क्रोधदीप्तौ परस्परं ॥ महाब
लौ महाराज क्रोधसंरक्तलोचनौ ॥५२॥ परस्परमवेक्षेतां कालानलसमौ युधि ॥ तयोः समागमो घोरो बभूव कटुकोदयः ॥५३॥ यथा दे
वासुरे युद्धे शक्रशंवरयोः पुरा ॥५४॥ इति श्रीमहाभारते भीष्मपर्वणि १०॥ ६८ तणाघ्र ३०॥ अर्जुनि समरे शूरं विनिघ्नंतं महारथान् ॥ अ
लंबुषः कथं युद्धे प्रत्ययुध्यत भारत ॥१॥ आर्ष्यशृंगिं कथं चैव सौभद्रः परवीरहा ॥ तन्ममाचक्ष्व तत्त्वेन यथावृत्तं स्म संयुगे ॥२॥ भी
मो वा रथिनां श्रेष्ठो राक्षसो वा घटोत्कचः ॥ नकुलः सहदेवो वा सात्यकिर्वा महारथः ॥३॥ एतदाचक्ष्व मे सर्वं कुशलो ह्यसि संज
य धनंजयश्च किं चक्रे मम सैन्यस्य संयुगे ॥ हंत तेहं प्रवक्ष्यामि संग्रामं लोमहर्षणं ॥ यथाभूद्राक्षसेंद्रस्य सौभद्रस्य च मारिष ॥५॥ अ
र्जुनश्च यथा संख्ये भीमसेनस्य संयुगे ॥ हंत तेहं प्रवक्ष्यामि संग्राम नश्च पांडवः ॥ नकुलः सहदेवश्च रणे चक्रुः पराक्रमं ॥ तथैव ता
वकाः सर्वे भीष्मद्रोणपुरःसराः ॥ अद्भुतानि विचित्राणि चक्रुः कर्माणि भीतवत् ॥७॥ अलंबुषस्तु समरे अभिमन्युं महारणे ॥ विनद्य सुमह
नादं तर्जयित्वा मुहुर्मुहुः ॥८॥ अभिदुद्राव वेगेन तिष्ठ तिष्ठेति चाब्रवीत् ॥ अभिमन्युश्च वेगेन सिंहवद्विनदन्मुहुः ॥ ९ ॥ आर्ष्यशृंगिं महेष्वासं पितुर
त्यंतवैरिणं ततः समीयतुः संख्ये त्वरितौ नरराक्षसौ ॥१०॥ रथाभ्यां रथिनां श्रेष्ठौ यथा वै देवदानवौ ॥ मायावी राक्षसश्रेष्ठो दिव्यास्त्रज्ञ
श्च फाल्गुनिः ॥११॥ ततः कार्ष्णिर्महाराज निशितैः सायकैस्त्रिभिः ॥ ७ ॥

आर्ष्यश्रृंगिंरणोविविध्वापुनर्विव्याधपंचभिः॥१२॥अलंबुषोपिसंक्रुद्धःकार्ष्णिंनवभिराशुगेः॥हृदिविव्याधवेगेनतोत्रैरिवमहाद्विपं
॥१३॥ततःशरसहस्रेणाक्षिप्रकारीनिशाचरः॥अर्जुनस्यसुतंसंख्येपीडयामासभारत॥१४॥अभिमन्युस्ततःक्रुद्धोनवभिर्नतपर्वभिः॥वि
भेदनिशितैर्बाणैराक्षसेंद्रंमहोरसि॥१५॥तेतस्यविविशुस्तूर्णंकायंनिर्भिद्यमर्मसु॥सतैर्विभिन्नसर्वांगःशुशुभेराक्षसोत्तमः॥१६॥
ततःक्रुद्धोमहाराजआर्ष्यश्रृंगिरमर्षणः॥महेंद्रप्रतिमंकार्ष्णिंछादयामासपत्रिभिः॥१७॥तेनतेविशिखामुक्तायमदंडोपमाः
शिताः॥अभिमन्युंविनिर्भिद्यप्राविशंतधरणीतलं॥१८॥तथैवार्जुनिनामुक्ताःशराःकनकभूषणाः॥अनिर्विनिर्भिद्यप्राविशंतध
रणीतलं॥१९॥सौभद्रस्तुरणेरक्षःशरैःसन्नतपर्वभिः॥चक्रेविमुखमासाद्यमयंशक्रइवाहवे॥२०॥विमुखंचततोरक्षोवध्यमानंरणे
रिणा॥प्रादुश्चक्रेमहामायांतामसींपरंतापन॥२१॥ततस्तेतमसासर्वेहताह्यासन्महीपते॥नाभिमन्युमपश्यंतनैवस्वान्नपरा
न्रणे॥अभिमन्युश्चतंदृष्ट्वाघोररूपंमहत्तमं॥प्रादुश्चक्रेसोस्त्रमत्युग्रंभास्करंकुरुनंदन॥२३॥ततःप्रकाशमभवज्जगत्सर्वंमहीप
ते॥तांचाभिजघ्निवान्मायांराक्षसस्यदुरात्मनः॥संक्रुद्धश्चमहावीर्योराक्षसेंद्रंनरोत्तमः॥छादयामाससमरेशरैःसन्नतपर्वभिः॥२५
बह्वीस्तथान्यामायाश्चप्रयुक्तास्तेनरक्षसा॥सर्वास्त्रविदमेयात्मावारयामासफाल्गुनिः॥हतमायस्ततोरक्षोवध्यमानंचसायकैः
रथंतत्रैवसंत्यज्यप्राद्रवन्महतोभयात्॥तस्मिन्विनिर्जितेतूर्णंकूटयोधिनिराक्षसे॥आर्जुनिःसमरेसैन्यंतावकंसममर्दयत्॥२८॥

मदांधोगंधनागेंद्रःसपद्मांपद्मिनीमिव॥ततःशांतनवोभीष्मःसैन्यंदृष्ट्वाभिविद्रुतं।२९॥महताशरवर्षेणसोभद्रंपर्यवारयत॥क्रोष्टीक्रप
चतंवीरंधार्त्तराष्ट्रामहारथाः॥३०॥एवंसुबहवोयुद्धेततक्षुःसायकैर्दृढं॥सतेषांरथिनांवीरःपितुस्तुल्यपराक्रमः।सदृशोवासुदेवस्यवि
क्रमेणाबलेनच॥उभयोःसदृशंकर्मसपितुर्मातुलस्यच।३२ रणेबहुविधंचक्रेसर्वशस्त्रभृतांवरः॥ततोधनंजयोवीरोविनिघ्नंस्त
वसैनिकान्॥३३॥आससादरणेपुत्रंपुत्रप्रेप्सुरमर्षणः॥तथैवसमरेवीरान्पितादेवव्रतस्तव।३४॥आससादरणेपार्थंस्वर्भानुरिव
भास्करं॥ततःसरथनागाश्वाःपुत्रास्तवजनेश्वर॥३५॥परिवव्रूरणेभीष्मंजुगुपुश्चसमंततः।तथैवपांडवाराजन्परिवार्यधनंज
यं॥३६॥रणायमहतेयुक्तादंशिताभरतर्षभ।शारद्वतस्ततोराजन्भीष्मस्यप्रमुखेस्थितः।३७॥अर्जुनंपंचविंशत्यासायकानांसमा
चिनोत्॥प्रत्युद्गम्याथविव्याधसात्यकिस्तंशितैःशरैः॥पांडवप्रियकामार्थंशार्दूलइवकुंजरं॥गौतमोपित्वरायुक्तोमाधवंनव
भिःशरैः॥३९॥हृदिविव्याधसंक्रुद्धःकंकपत्रपरिछदैः॥शैनेयोपितजःक्रुद्धश्चापमानम्यवेजवान्।४०॥गौतमांतकरंतूर्णंसमाधत्तशि
लीमुखं।तमापतंतंवेगेनशक्रांशनिसमद्युतिं॥४१॥द्विधाचिछेदसंक्रुद्धोद्रौणिःपरमकोपनः॥समुत्सृज्याथशैनेयोगौतमंरथिनां
वरः॥४२॥अभ्यद्रवद्रणेद्रौणिंराहुःखेशशिनंयथा।तस्यद्रोणसुतश्चापंद्विधाचिछेदभारत।४३।अथैनंछिन्नधन्वानंताड
यामाससायकैः॥सोन्यत्कार्मुकमादायशत्रुघ्नंभारसाधनं।द्रौणिंषष्ट्यामहाराजबाह्वोरुरसिचार्पयत्।सविद्धोव्यथितश्चैवमुहू

जैकपुत्रमल्लायुत॥४५॥निघसादरथोपस्थेध्वजयष्टिंसमाश्रितः प्रतिलभ्यततः संज्ञांद्रोणपुत्रः प्रतापवान॥४६॥वार्ष्णेयंसमरेक्रुद्धो
नाराचेनसमार्पयत॥शैनेयंसततुनिर्भिद्यप्राविशद्धरणीतले॥४७॥वसंतकालेबलवानबिलंसर्पशिशुर्यथा॥अथापरेणभल्लेनमाधव
स्यद्विजोत्तमः॥४८॥चिछेदसमरेद्रौणिः सिंहनादमुमोचह॥पुनश्चैनंशरैश्छादयामासभारत॥४९॥निदाघांतेमहाराजयथा
मेघोदिवाकरं॥सात्यकोपिमहाराजशरजालंनिहत्यतं॥५०॥द्रौणिमभ्याकिरत्तूर्णंशरजालैरनेकधा॥तापयामासचद्रौणिं
शैनेयःपरवीरहा॥विमुक्तोमेघजालेनयथैवतपनस्तथा॥शराणांचसहस्रेणपुनरेवसमुद्यत॥सात्यकिश्छादयामाससननाद
चमहाबल॥दृष्ट्वापुत्रांचतत्रस्तंराहुणेवनिशाकरं॥५३॥अभ्यद्रवतशैनेयंभारद्वाजप्रतापवान॥विव्याधचसुतीक्ष्णेनपृषत्कु
केनमहामृधे॥परीप्सन्स्वसुतंराजनवार्ष्णेयेनाभिपीडितं॥सात्यकिस्तुरणेहित्वागुरुपुत्रंमहारथ॥द्रोणंविव्याधविंशत्यास
र्वपारशवैःशरैः॥तदंतरममेयात्माकौंतेयःशत्रुतापनः॥५६॥अभ्यद्रवद्रणेक्रुद्धोद्रोणंप्रतिमहारथ॥ततोद्रोणश्चपार्थश्चसम
यातांमहामृधे॥५७॥यथाबुधश्चशुक्रश्चमहाराजनभस्तले॥५८॥इतिश्रीमहाभारतेभीष्मपर्वणि॥धृतराष्ट्रउवाच॥कथंद्रोणोम
हेष्वासःपांडवश्चधनंजयः॥समीयतूरणेयत्तौतावुभौपुरुषर्षभौ॥१॥प्रियोहिपांडवोनित्यंभारद्वाजस्यधीमतः॥आचार्यश्चर
णेनित्यंप्रियःपार्थस्यसंजय॥२॥तावुभौरथिनौसंख्येहृष्टौसिंहाविवोत्कटौ॥कथंसमीयतुर्यत्तौभारद्वाजधनंजयौ॥३॥संजय०

क्षत्रधर्मं पुरस्कृत्य पार्थो वा गुरुमाहवे ॥४॥ न क्षत्रिया रणे राजन्वर्जयंति परस्परं ॥ निर्मर्यादं हि युध्यंते पितृभिर्भ्रातृभिः सह ॥५॥ रणे भारत पा
र्थेन द्रोणो विद्धस्त्रिभिः शरैः । नाचिंतयच्च तान्बाणान्पार्थचापच्युतान्युधि ॥६॥ शरवृष्ट्या पुनः पार्थश्छादयामास तं रणे । स प्रजज्वा
ल रोषेण गहनेऽग्निरिवोर्जितः ॥७॥ ततोऽर्जुनं रणे द्रोणः शरैः सन्नतपर्वभिः ॥ छादयामास राजेंद्र नचिरादेव भारत ॥८॥ ततो दुर्योधनो राजा
सुशर्माणमचोदयत् ॥ द्रोणस्य समरे राजन्पार्ष्णिग्रहणकारणात् ॥९॥ त्रिगर्तराडपि क्रुद्धो भृशमायम्य कार्मुकं ॥ छादयामास राजें
द्र पार्थं बाणैरयोमुखैः ॥१०॥ ताभ्यां मुक्ताः शरा राजन्नंतरिक्षे विरेजिरे ॥ हंसा इव महाराज शरत्काले नभस्तले ॥११॥ ते शराः प्राप्य कौ
न्तेयं समंताद्विविशुः प्रभो ॥ फाल्गुनायतनं यद्वत्स्वादुवृक्षं विहंगमा ॥१२॥ अर्जुनस्तु रणे नादं विनद्य रथिनां वरः ॥ त्रिगर्तराज
ं समरे सपुत्रं विध्य शरैः ॥ ते वध्यमानाः पार्थेन कालेनेव युगक्षये ॥ पार्थमेवाभ्यवर्तंत मरणे कृतनिश्चयाः ॥१४॥ मुमुचुः शरवृष्टिं च
पांडवस्य रथं प्रति ॥ शरवृष्टिं ततस्तां तु शरवर्षैः समंततः ॥१५॥ प्रतिजग्राह राजेंद्र तोयवृष्टिमिवाचलः ॥ तत्राद्भुतमपश्याम बीभत्सोर्हस्त
लाघवं ॥१६॥ विमुक्तां बहुभिर्योधैः शस्त्रवृष्टिं दुरासदां ॥ यदेको वारयामास मारुतोऽभ्रगणानिव ॥१७॥ कर्मणा तेन पार्थस्य तुतुषुर्दे
वदानवाः ॥ अथ क्रुद्धो रणे पार्थस्त्रिगर्तान्प्रति भारत ॥१८॥ मुमोचास्त्रं महाराज वायव्यं पृतनामुखे ॥ प्रादुरासीत्ततो वायुः क्षोभयाणो
नभस्तलं ॥१९॥ पातयन्वै सुरगणान् विनिघ्नंश्चैव सैनिकान् ॥ ततो द्रोणोऽभिवीक्ष्यैव वायव्यास्त्रं सुदारुणं ॥२०॥

शेलमन्यन्महाराजघोरमस्त्रंमुमोचह॥द्रोणेनयुधिनिर्मुक्तेतस्मिन्नस्त्रेनराधिप।२१।प्रणाशमततोवायुःप्रसन्नाश्चदिशोदश
ततःपांडुसुतोवीरस्त्रिगर्त्तश्चरथव्रजान॥२२॥निसहत्साहोस्तत्रश्चक्रेविमुखांश्चपराक्रमात।ततोदुर्योधनश्चैवकृपश्च
रथिनांवरः।अश्वत्थामाततः॥शल्यःकांबोजश्चसुदक्षिणः॥विंदानुविंदावावंत्यौवाल्हिकःसहवाल्हिकैः॥महतारथव
शेनपार्थस्यावारयद्दिशः॥तथैवभगदत्तश्चश्रुतायुश्चमहाबलः॥२५॥गजानीकेनभीमस्यतावावारयतांदिशः॥भूरिश्रवाः
शलश्चैवसौवलश्चविशांपते॥२६॥शरौघैर्विमलैस्तीक्ष्णैर्माद्रीपुत्रावावारयत।भीष्मस्तुसहितःसंख्येधार्त्तराष्ट्रैःससैनिकैः।२७
युधिष्ठिरंसमासाद्यसर्वतःपर्यवारयत॥आपतंतंगजानीकंदृष्ट्वापार्थोवृकोदरः॥२८॥लेलिहन्सृक्किणीवीरोमृगराडिवका
नने॥भीमस्तुरथिनांश्रेष्ठोगदांगृह्यमहाहवे॥२९॥अवप्लुत्यरथात्तूर्णंतवसैन्यान्यभीषयत॥तमुद्वीक्ष्यगदाहस्तंततस्तेगजसा
दिनः॥परिवव्रूरणोपन्नाभीमसेनंसमंततः॥गजमध्यमनुप्राप्तःपांडवःसव्यराजत।३०।मेघजालस्यमहतोयथाभ्यगतोरविः।व्यध
मत्सगजानीकंगदयापांडवर्षभः॥३२॥महाभ्रजलमतुलमातरिश्चेवसंततंतेध्यमानावलिनाभीमसेनेनदंतिनः॥३३॥आर्त्तनादं
रणेचक्रुर्गर्जंतोजलदाइव॥बहुधादारितांश्चैवविषाणैस्तत्रदंतिनः॥३४॥फुल्लाशोकनिभःपार्थःशुशुभेरणमूर्धनि।विषाणे
दंतिनंगृह्यनिर्विषाणमथाकरोत॥विषाणेनचतेनैवकुंभेभ्याहत्यदंतिनं।पातयामाससमरेदंडहस्तइवांतकः।शोणिताक्तांग

[illegible]

वत्रत्पदृश्यत ॥२७॥ एवं ते वध्यमानाश्च हतशेषा महागजाः ॥ प्राद्रवंत दिशो राजन् विमर्द्दंतः स्वकं बलं ॥२८॥ द्रवद्भिस्तैर्महानागैः सम
ताद्भरतर्षभ ॥ दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखं ॥२९॥ इति श्रीमहाभारते भीष्मपर्वणि ० ॥ संजय उवाच ॥ मध्यंदिने महाराज
संग्रामः समपद्यत ॥ लोकक्षयकरो रौद्रो भीष्मस्य सह सोमकैः ॥१॥ गांगेयो रथिनां श्रेष्ठः पांडवानामनीकिनीं व्यधमन्निशि
तैर्बाणैः शतशोथ सहस्रशः ॥२॥ संममर्द च तत्सैन्यं पिता देवव्रतस्तव ॥ धान्यानामिव वस्तूनां प्रकरं गोगणा इव ॥३॥ धृष्टद्युम्न
शिखंडी च विराटो द्रुपदस्तथा ॥ भीष्ममासाद्य समरे शरैर्जघ्नुर्महारथं ॥४॥ धृष्टद्युम्नः ततो विध्वा विराटं च शरैस्त्रिभिः ॥ द्रुप
दस्य च नाराचं प्रेषयामास भारत ॥५॥ तेन विद्धो महेष्वासो भीष्मेणामित्रकर्षिणा चुक्रुधु ॥ समरे राजन् पादस्पृष्ट इवोरगः
६ ॥ शिखंडी तं च विव्याध भारतानां पितामहं ॥ स्त्रीमयं मनसा ध्यात्वा नास्मै प्राहरदच्युत ॥७॥ धृष्टद्युम्नस्तु समरे क्रोधेनाग्निरि
वज्ज्वलन् ॥ पितामहं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥८॥ द्रुपदः पंचविंशत्या विराटो दशभिः शरैः ॥ शिखंडी पंचविंशत्या भी
ष्मं विव्याध सायकैः ॥९॥ सोतिविद्धो महाराज शोणितौघपरिप्लुतः ॥ वसंते पुष्पशबलो रक्ताशोक इवाबभौ ॥१०॥ तान्प्र
त्यविध्यद्गांगेयस्त्रिभिस्त्रिभिरजिह्मगैः ॥ द्रुपदस्य च भल्लेन धनुश्चिच्छेद मारिष ॥११॥ सोन्यत्कार्मुकमादाय भीष्मं विव्याध पंच
भिः सारथिं च त्रिभिर्बाणैः ॥ सुशितै रणमूर्धनि ॥१२॥

तथाभीमोमहाराजद्रौपद्याः पंचचात्मजा॥ केकेयाभ्रातरः पंचसात्यकिश्चैवसात्वतः॥१३॥अभ्यद्रवंतगांगेयंयुधिष्ठिरपुरोगमा
रिरक्षिषंतः पांचालेधृष्टद्युम्नपुरोगमाः। तथैवतावकाः सर्वेभीष्मरक्षार्थमुद्यताः। प्रत्युद्ययुःपांडुसेनांसहसैन्यानराधिप॥१५॥
तत्रासीत्सुमहद्युद्धंतवतेषांचसंकुलं। नराश्वरथनागानांयमराष्ट्रविवर्द्धनं रथीरथिनमासाद्यप्राहिणोद्यमसादनं तथेतरा
न्समासाद्यनरनागाश्वसादिनः॥१७॥अनयन्परलोकायशरैःसन्नतपर्वभिः शरैश्चविविधैर्घोरैस्तत्रतत्रविशांपते॥१८॥रथास्तु
रथिभिर्हीनाहतसारथयस्तदा विप्रद्रुताश्चसमरेदिशोजग्मुःसमंततः॥१९॥मर्दमानानराराजन्हयाश्चसुबहून्रणे। वातायमा
नादृश्यंतेगंधर्वनगरोपमाः॥२०॥रथिनश्चरथैर्हीनावर्मिणस्तेजसायुताः। कुंडलोष्णीषिणःसर्वेनिष्कांगदविभूषणाः॥२१॥दे
वपुत्रसमाःसर्वेशौर्येशक्रसमायुधि॥ ऋद्ध्यावैश्रवणंचातिनयेनचबृहस्पतिं॥२२॥सर्वलोकेश्वराःशूरास्तत्रतत्रविशांपते॥प्रवि
द्रुतान्यदृश्यंतप्राकृतानाइव॥२३॥दंतिनश्चनरश्रेष्ठाहीनाःपरमसादिभिः मृद्नंतःस्वान्यनीकानिनिपेतुःसर्वशब्दगाः॥चर्मभिश्चा
भवति न ज्ञानं तद्रहितं केवलं तपस्त्वेकमापादयति इत्यर्थः केषामित्यत आह ॥ सत्वादीति येस त्वाद्वंतेतीव्रवैराग्यभावास्तेषां च संकल्पेन ब्राह्म
लौकिकान् दिव्यान् दिव्यान् भोगान् मोक्षपर्यंतैकरूपेण समाहितं संभृतं तपो भवति तेषामेवोर्ध्वगतिर्भवतीत्यर्थः ॥१५॥ यतः संकल्पाद्यज्ञाः प्र

द्रव्यवान् गुणवानेवं त्यागी भवति सात्विकः ॥ पंचभूतानि पंचभ्यो निवर्तयति तादृशः ॥१४॥ एतत्समग्रमप्यूर्ध्वं तपो भवति केवलं सत्वाख्य
वशानां संकल्पेन समाहितं ॥१५॥ ततो यज्ञः प्रवर्तते सत्वस्येवावबोधनात् ॥ मनसा मनश्च भवति वाचा न्यश्चाक कर्मणा ॥१६॥ ठ

वर्तते तस्येव सत्वसंकल्पस्यावधारणात् संकल्पाद्देवास्सपितरः समुत्तिष्ठंति इति श्रुतेर्योगी सत्वसंकल्पो भवति ॥ अन्य[illegible]एकस्य यज्ञः मन
सेव भवति सत्वसंकल्पत्वात्तथा स्मुपाख्यापने ॥ त्रितो नाम मुनिर्भ्रात्राकूपे पातितः स च तत्रैव मनसा कल्पं पर्यं[illegible] त्रितः कूपे वहितो दे
वान् हवनं तु तपइति मंत्रवर्णाश्चेतत्त्मप्यंते अवहितोध्यापनं हवने आद्धयति उत्तपे पर्यंसंतत्स्मे ॥ अन्यस्य [illegible] वाचैव यज्ञस्य यज्ञजपादि
नाप यज्ञो भवति ॥ अन्यस्य प्राकृतस्य कर्मणा आज्यपशुपुरोडाशीयादि प्रधानयाज्ञिक यज्ञः ॥१६॥

॥भा॰उ॰ मोहो हर्षः दर्पो हो[illegible]नुः हर्षोदप्यतीत्यापसंवोक्तेः अतिवादो निर्मर्यादं वचनं संज्ञानाशः कार्याकार्यविवेकराहित्यं अप[illegible]नेतैरं तर्पणपरद्रोह
॥१०३॥२ शीलता एतत् मदवत्त्वं विगर्हितं निंदितं सङ्गः सदाहीत्याप[illegible]कालेपि नाश्रयणीयमिति निश्चितं ॥११॥ कुहृदः प्रियेस[illegible]ः अप्रिये सति व्य
थीनिहोसो हृद्गुलोन नीयमाहस्याद्दितिक हितमितिपरिस्फुत राहितं हर्षपुष्टिकरं भव्यगेयेतिव त्कर्तरिदृत्यः योसा[illegible]सया ख्यमपिपु
त्रादिकं सुख्यकमभूतं याचते स अभ्यर्थितः प्रार्थितो दातान् समेष्वादीन अर्हतित्सनुमितिशेषः सा हृष्श्लोकवाक्यं ॥१२॥ च[illegible]र्थमाह सक्ते

[illegible]

ईर्ष्यामोहोतिवादश्च संज्ञानाशोप्यसूयता तस्मात्प्राज्ञेन माघेन सदा घेतद्विगर्हितं ॥१४॥ सोहृदे वैपङ्कणवेदितमाः प्रियेहर्षं तपात्त्प्रियेव
अर्थयंते स्यादात्मनः स्फुहितं याचते योददोत्य यच्च मपिदेयं खलुस्यात् दृष्टान् पुत्रान् विभवान् स्वांश्च दारान् अभ्यर्थितश्चार्हेत्ताशुद्धभावः
यक्त द्रव्यः सेवते नेह कामान् भुंक्ते कर्मस्वाशिषं वाधतेच ॥१५॥

ति यस्मे सर्वं स्वदत्तं तस्य कामान् यथायमुपक्रत इति बुद्धिः नसंवत्सेतेन कदाचिदत्राह ॥राम॥
तः सन् सोहार्दं भंग कुर्यादितिभावः पंचममाह भुंक्ते कर्मेति स्वकर्मार्जितधनमेव भुंक्ते न तु मित्राद्यर्जितं अन्यथा कालेन हेलनं ॥१०३॥२
प्राप्य सोहृदभंगंतमा भूदिषष्टमाह ॥ स्वाशिषं वाधतेच ॥ स्वस्यश्रेयोपिमित्रहितार्थं नाशयतीत्यर्थः पाठांतरे स्वासितं स्वस्यानंदप्रादि
कं आस्तेस्मिन्निति सुत्पत्याज्ञेयं स्वाशिषमिति पाठे स्वस्यआसमंताच्छिवं श्रेयस्करमित्यर्थः ॥१६॥

महाव्रतामहाव्रतानिसुपांसुलुगितिसुपोडादेशःश्लोकद्वंद्वः॥ नास्यस्वंस्वीयंकिमपिनास्तिधर्मादिष्वेकैकस्मिन्नपिपक्षपातेसतितदर्थेसंवेस्य
नामीत्यर्थः॥ ३॥ब्रह्मत्वेनसुरश्रेष्ठप्राप्ययेषां ७॥परीवादःपरिदोषकीर्तनंसयथाभूतंअसद्वारोपितं॥ ८॥अप्रकीर्तितइतिदमविरोधिनएवप्रतिकू
लत्वात्सोसद्दोषत्वेनसूचिताअपिअंगग्राहिकपापकर्षेणविधिसुखेननप्रोक्ताइत्यर्थः लोकद्वेष्यंपापादाराभ्यादिप्रातिकूल्यंधर्मादौविघ्ना

धर्मस्यसत्यंचतपोदमश्चअमात्सर्यंह्रीस्तितिक्षानसूया॥ दानंश्रुतंचैवधृतिःक्षमाचमहाव्रताद्वादशब्राह्मणस्य॥ ५॥येनैतेभ्यःप्रच्यवेत
द्वादशेभ्यःसर्वामपीमांपृथिवींसप्रशिष्यात॥ त्रिभिर्द्वाभ्यामेकतोवाप्यतोवानास्यस्वमस्तीतिचवेदितव्यं॥ ६॥इसमस्त्यागोयाप्रमादइत्येते
ष्वसक्तंसिद्धिरुक्ता॥ एतानिब्रह्मसुख्यानांब्राह्मणानांमनीषिणां ७॥सद्भासद्भापरीवादोब्राह्मणस्यनशस्यते॥ नरकप्रतिष्ठास्तेस्युर्यए
वंकुर्वतेनराः॥ ८॥मदोष्टादशगुणोयःस्यात्पुरायोगेषुकीर्तितः लोकद्वेष्यंप्रतिकूल्यमभ्यसूयामृषावचः॥ ९॥कामक्रोधौपारतंत्र्यं
परीवादोथपैशुन्यं॥ अर्थहानिर्विवादश्चमात्सर्यंप्राणिपीडनं॥ १०॥

वर्णां अभ्यसूयागुणेषुदोषारोपणं॥ ९॥कामःस्त्रीअभि[illegible]ःपारतंत्र्यमध
दिंवशत्वंपैशुन्यंराजद्वारदोषपरदोषसूचनं॥ अर्थहानिःनटनर्तकवेश्यादिषुअपात्रदानंचावित्तनाशः विवा[illegible]

॥भा॰गी॰टी॰
॥६४॥

ननु विषयेषु दृष्ट्याभावे कथमसौ तान्भुंजानः स्यादित्यपेक्षायामाह आपूर्यमाणमिति नानानदीभिरापूर्यमाणमपि अचलप्रति
ष्ठं अनतिक्रांतमर्यादमेव समुद्रं पुनरन्या आपो यथा प्रविशंति तथा कामा विषया यं मुनिमंतर्दृष्टिं भोगैरविक्रियमा
णमेव प्रारब्धकर्मभिर्निक्षिप्ताः संतः प्रविशंति स शांतिं कैवल्यं प्राप्नोति न तु कामकामी भोगकामनाशीलः ॥७०॥ य
स्मादेवं तस्मादेव विहायेति ॥ प्राप्तान्कामान्विहाय उपेक्ष्य अप्राप्तेषु च निःस्पृहः यतो निरहंकारः अत एव तद्भो

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् । तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न का
मकामी ॥७०॥ विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः । निर्ममो निरहंकारः स शांतिमधिगच्छति ॥७१॥ एषा
ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वास्यामंतकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥७२॥ इति श्रीभगवद्गी
तासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्यायः ॥२॥२॥२॥

गसाधनेषु निर्ममः सन् तत्र दृष्टिर्भूत्वा यश्चरति प्रारब्धवशेन भोगान्भुंक्ते यत्र क्वापि गच्छति वा स शांतिं प्राप्नोति
ति ॥७१॥ उक्तां ज्ञाननिष्ठां स्तुवन्नुपसंहरति एषेति ब्राह्मी स्थितिर्ब्रह्मज्ञाननिष्ठा एषा एवंविधा एनां परमेश्वरा ॥रामा॥
राधनेन विशुद्धांतःकरणः पुमान्प्राप्य न मुह्यति पुनः संसारमोहं न प्राप्नोति यतः । अंतकाले मृत्युसमयेऽपि ॥६४॥
अस्यां क्षणमात्रमपि स्थित्वा ब्रह्मनिर्वाणं लयमृच्छति प्राप्नोति किं पुनर्वक्तव्यं बाल्यमारभ्य स्थित्वा प्राप्नोतीति

इति श्रीभगवद्गीताटीकायां द्वितीयोऽध्यायः ॥२॥

नास्ति बुद्धिरयुक्तस्येत्यत्र हेतुमाह इंद्रियाणामिति ॥ इंद्रियाणामवशीकृतानां स्वैरं विषयेषु चरतां मध्ये यदेवैकमिंद्रियं मनो
नुविधीयते अवशीकृतं तस्मादिंद्रियेणेत्यमाहगछति । तदेवेंद्रियं अस्य मनसः पुरुषस्य प्रज्ञां हरति विषयाविष्टां करोति किं
मुत वक्तव्यं बहूनि प्रज्ञां हरंतीति । यथाप्रमत्तस्य कर्णधारस्य नावं वायुः समुद्रे सर्वतः परिभ्रमयति तद्वत् ॥६७॥ इंद्रियसंय
मस्य स्थितप्रज्ञसाधनत्वं लक्षणत्वं चोक्तमुपसंहरति तस्मादिति प्रतिष्ठिता भवतीत्यर्थः ॥ लक्षणोपसंहारे तु सप्रज्ञा
प्रतिष्ठिता ज्ञातव्येत्यर्थः महाबाहो इति संबोधनतयन्वैरिनिग्रहे समर्थस्य तव चात्रापि सामर्थ्यं भवेदिति सूचयति ॥६८॥

इंद्रियाणां हि चरतां यन्मनोनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥६७॥ तस्माद्यस्य महाबाहो निगृ
हीतानि सर्वशः । इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी । य
स्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥

ननु न कश्चिदपि समुद्रवद्दर्शनादिव्यापारशून्यः सर्वात्मना नि
गृहीतेंद्रियो लोके दृश्यते अतो संभावितमिदं लक्षणमित्याशंक्याह येति या निशेति सर्वेषां भूतानां या निशा निशेव नि
शा आत्मनिष्ठा आत्मज्ञानं ब्रह्मतत्त्वमतीतस्य दर्शनादिव्यवहाराभावात् तस्यामात्मनिष्ठायां संयमी नि
गृहीतेंद्रियो जागर्ति प्रतिबुध्यते यस्यां तु विषयनिष्ठायां भूतानि जाग्रति प्रबुध्यंते सा आत्मतत्त्वं पश्यतो मुनेर्निशा
तस्यां दर्शनादिव्यापारलक्षणा तस्य नास्तीत्यर्थः एतदुक्तं भवति यथा दिवांधानामुलूकादीनां रात्रावेव दर्शनं न तु दिवसे
एवं ब्रह्मतत्त्वस्योन्मीलिताक्षस्यापि ब्रह्मण्येव दृष्टिर्न तु विषयेषु अतो नासंभावितमिदं लक्षणमिति ॥६९॥ इति राम०

ARYA SAMAJ ... BARODA 1938

॥भा॰टी॰ नन्विंद्रियाणांविषयप्रवणस्वभावानांनिरोद्धुमशक्यत्वादयंदोषोदुष्परिहरइतिस्थितप्रज्ञत्वंकथंस्या॥दद॥
॥६३॥ क्याहरागेतिद्वाभ्यांरागद्वेषरहितैर्नियतैरिंद्रियैर्विषयांश्चरन्नुपभुंजानोपिप्रसादंशांतिमाप्नोतिरागद्वेष
रहित्वमेवाह॥आत्मेनामनवश्यैःविधेयोवशवर्त्तीआत्मामनोयस्यसइति॥अनेनैवकथंव्रजेतभुंजीतेत्य
स्यचतुर्थप्रश्नस्यस्वाधीनैरिंद्रियैर्विषयानधिगच्छतीत्युत्तरमुक्तंभवति॥६४॥प्रसादेसतिकिंस्यादित्यत्रापिस

रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन्॥आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति॥६४॥प्रसादेसर्वदुः
खानांहानिरस्योपजायते॥प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते॥६५॥नास्तिबुद्धिरयुक्तस्यनचायु
क्तस्यभावना॥नचाभावयतःशांतिरशांतस्यकुतःसुखं॥६६॥

सादइति॥प्रसादेसतिसर्वदुःखनाशः
ततश्चप्रसन्नचेतसोबुद्धिःप्रतिष्ठिताभवतीत्यर्थः॥६५॥इंद्रियनिग्रहस्यस्थितप्रज्ञतासाधनत्वंव्यतिरेकमुखेनो ॥एमा॥
पपादयतिनास्तीति॥अयुक्तस्यअवशीकृतेंद्रियस्यनास्तिबुद्धिः॥शास्त्राचार्योपदेशाभ्यांयासनिर्विषयाबु ॥६३॥
द्धिःप्रत्येकवनोत्पद्यतेकुतस्तस्याःप्रतिष्ठावार्ताकुतइत्यतआह॥नचायुक्तस्यभावनाध्यानं॥भावनयाहिबुद्धि
रात्मनिप्रतिष्ठाभवति॥साचायुक्तस्ययतोनास्तिनभावयतः॥अध्यात्मध्यानमकुर्वतःशांतिःचित्तेनिवृत्ति
परतिः॥अशांतस्यकुतःसुखंमोक्षानंदइत्यर्थः॥६६॥

द्रियसंयमं तु विना स्थितप्रज्ञता न संभवति ॥ अतः साधकावस्थायां तत्र महान् प्रयत्नः कर्तव्य इत्याह यततो ह्यपी
ति द्वाभ्यां यततः मोक्षे प्रयतमानस्यापि विपश्चितो विवेकिनोपि मनः इंद्रियाणि प्रसभं बलान् हरंति ॥ यतः प्रमा
थीनि प्रथमनशीलानि प्रक्षोभकानि ॥ ६० ॥ तस्मादेवं तस्मात्तानीति ॥ युक्तो योगी तानींद्रियाणि संयम्य मत्परः ॥
सन् आसीत ॥ यस्य वशे वर्तंतीनि एतेन कथमासीतेति प्रश्नस्य वशीकृतेंद्रियः सन्नासीतेति सूत्रमुक्तं भवति ॥ ६१ ॥

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥ इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ ६० ॥ तानि सर्वाणि
संयम्य युक्त आसीत मत्परः ॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥ ध्यायतो विषयान् पुंसः संगा
स्तेषूपजायते ॥ संगात्संजायते कामः कामात्क्रोधोभिजायते ॥ ६२ ॥ क्रोधात्संमोहः संमोहात्स्मृतिविभ्र
मः ॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥ बाह्येंद्रियसंयमाभावे दोषमुक्त्वा मनःसंयमाभावे
दोषमाह ध्यायत इति द्वाभ्यां ॥ गुणबुद्ध्या विषयान् ध्यायतः पुरुषस्य तेषु संगः आसक्तिर्भवति ॥ आसक्त्या च तेष्व
धिकः कामो भवति कामाच्च केनचित्प्रतिहतात्क्रोधो भवति ॥ ६२ ॥ किंच ॥ क्रोधादिति क्रोधात्संमोहः कार्याकार्य
विवेकाभावः ततः शास्त्राचार्योपदिष्टार्थस्य स्मृतेर्विभ्रंशो विचलनं ततो बुद्धेश्चेतनस्य नाशः ततो वृक्षादिवत्स्थि
त्यभिभवनतः प्रणश्यति मृततुल्यो भवति ॥ ६३ ॥ ६३ ॥

पौरजानपदार्थेहिममार्थोनात्मनोगतः ॥ कामतोन्यधनंराजापारक्यंयःप्रयच्छति ॥ नसधर्मेणधर्मात्मायुज्यतेयशसानच ॥ १४ ॥ सोहंप्र
तिग्रहीष्यामिदत्तावेनौभवान्मम ॥ कुमारीदेवगर्भामेकपुत्रभवायमे ॥ १५ ॥ तथानुबद्धकल्याणमुक्तेनंनंनराधिपउभन्ननंतनरश्रेष्ठंगा
लवः प्रत्यपूजयत ॥ १५ ॥ उशीनरंप्रतिग्राह्यगालवःप्रययौवनं ॥ रेमेसतांसमासाद्यकृतपुण्यइवश्रियं १६ कंदरेषुचशैलानांनदीनांनिर्झ
रेषुच ॥ वातायनविमानेषुतथागर्भगृहेषुच ॥ १७ ॥ उद्यानेषुविचित्रेषुवनेषूपवनेषुच ॥ हर्म्येषुरमणीयेषुप्रासादशिखरेषुच ॥ ततोस्य
समयेजज्ञेपुत्रोबालरविप्रभुः ॥ शिविर्नाम्नाभिविख्यातोयःसपार्थिवसत्तमः ॥ १८ ॥ उपस्थायसतंविप्रोगालवःप्रतिगृह्यच ॥ कन्यां
प्रयातस्तांराजन्दृष्टवान्विनतात्मजं ॥ १९ ॥ इत्युद्योगेगालवचरिते ॥ नारद उ ॥ गालवंवैनतेयोथप्रहसन्निदमब्रवीत ॥ दिष्ट्याकृता
र्थंपश्यामिभवंतमिहवैद्विजः ॥ १ ॥ गालवस्यवचःश्रुत्वावैनतेयेनभाषितं ॥ चतुर्भागावशिष्टस्तदाचख्यौकार्यमेवहि ॥ २ ॥ सुपर्ण
स्त्वब्रवीदेनंगालवंवदतांवरः ॥ प्रयत्नस्तेनकर्तव्योनैषसंपत्स्यतेतव ॥ ३ ॥ पुराहिकान्यकुब्जेवैगाधेःसत्यवतीसुतंभार्यार्थे
वरयत्कन्यामृचीकस्तेनभाषितः ॥ ४ ॥ एकतःश्यामकर्णानांहयानांचंद्रवर्चसां ॥ भगवन्दीयतांमह्यंसहस्रमितिगालव ॥ ऋची
कस्तुतथेत्युक्त्वावरुणस्यालयंगतः ॥ अश्वतीर्थेहयाँल्लब्ध्वादत्तवान्पार्थिवायवै ॥ ६ ॥ इष्ट्वातेपुंडरीकेणदत्ताराज्ञाद्विजाति
भ्यः ॥ तेभ्योद्वेद्वेशतेक्रीत्वाप्राप्तेपार्थिवैस्तदा ॥ ७ ॥ अपराण्यपिचत्वारिशतानिद्विजसत्तम ॥ ८ ॥

॥भा॰उ॰ नीपमानानि संतान्योक्तानान्यासन चिंतलथा ॥ ८ ॥ एवं न पूर्ववम्राप्यं प्राप्तुं गालवकर्हिचित ॥ इमामश्वशताभ्यां वै द्वाभ्यां तस्मै निवेदय
॥२०८ विश्वामित्राय धर्मात्मन् षड्भिरश्वशतैः सह ॥ ततोसि गतसंमोहः कृतकृत्यो द्विजोत्तम ॥ गालवस्तं तथेत्युक्त्वा सुपर्णसहितस्ततः ॥ आ
दायाश्वकन्यां च विश्वामित्रमुपागमत ॥ १२ ॥ अश्वानां कांक्षितार्थानां षडिमानि शतानि वै ॥ शताद्वयेन कन्येयं भवता प्रतिगृह्यतां ॥ १३
अस्यां राजर्षिभिः पुत्रा जाता वै धार्मिकास्त्रयः ॥ चतुर्थं जनयत्वेकं भवानपि नरोत्तम ॥ १४ ॥ पूर्णान्येवं शतान्यष्टौ तुरगाणां भवंतु ते ॥ भव
तो ह्यनृणो भूत्वा तपः कुर्यां यथासुखं ॥ १५ ॥ विश्वामित्रस्तु तं दृष्ट्वा गालवं सह पक्षिणा ॥ कन्यां च तां वरारोहामिदमित्यब्रवीद्वचः ॥ १६
किमियं पूर्वमेवेह न दत्ता मम गालव ॥ पुत्रा ममैव चत्वारो भवेयुः कुलभावनाः ॥ प्रतिगृह्णामि ते कन्यामेकपुत्रभवाय वै ॥ अश्वाश्चा
श्रममासाद्य चरंतु मम सर्वशः ॥ स तया रममाणोथ विश्वामित्रो महाद्युतिः ॥ आत्मजं जनयामास माधवीपुत्रमष्टकं ॥ १७ ॥ जातमा
त्रं सुतं तं च विश्वामित्रो महामुनिः ॥ संयोज्यार्थैस्तथा धर्मैरश्वैस्तैः समयोजयत ॥ १८ ॥ अथाष्टकः पुरं प्रायात्सोमपुरप्रभं ॥ निर्यात्य
कन्यां शिष्याय कौशिकोपि वनं ययौ ॥ १९ ॥ गालवोपि सुपर्णेन सह निर्यात्य दक्षिणां ॥ मनसाति प्रतीतेन कन्यामिदमुवाच ह ॥ २० ॥
जातो दानपतिः पुत्रस्त्वया शूरस्तथापरः ॥ सत्यधर्मरतश्चान्यो यज्वा चापि तथापरः ॥ २१ ॥ तदागच्छ वरारोहे तारितस्ते पिता सुतैः ॥ए॰म॥
चत्वारश्चैव राजानस्तथाहं च सुमध्यमे ॥ २२ ॥ गालवस्त्वभ्यनुज्ञाप्य सुपर्णं पन्नगाशनं ॥ पितुर्निर्यात्य तां कन्यां प्रययौ वनमेव हि ॥ २३ ॥ अध्या॰ ॥२०८॥

पर्यधावत्तदन्वेषणाय इत्यर्थः वनं वनवासं ॥५॥ आत्मनः चित्तं स्वल्पयुतां गाङ्गेयादिमिलतादित्येन सक्ष्मार्थभेदेन शीघ्रं तां ॥७॥ ॥१५॥

नारद उ० ॥ समनुज्ञाप्य पुनस्तस्मात्कस्तेकामः समपचरे ॥ उपगम्याश्रमपदं गंगायमुनसंगमे ॥ रहीतमात्पदासातां एथमारोप्य माधवी ॥ पूरु
पेहस्य भगिनीमाश्रमे पर्यधावतां ॥२॥ नागयक्षमनुष्याणां गंधर्वमृगपक्षिणां ॥ शैलद्रुमवनौकानामासीत्तत्र समागमः ॥३॥ नाना पुरु
षदेशानामीश्वरैश्च समाकुलं ॥ ऋषिभिर्ब्रह्मकल्पैश्च समंतादावृतं वनं ॥ निर्दिश्यमानेषु तु सा वरेषु वरवर्णिनी ॥ वरानुत्क्रम्य सर्वा
न्वरं वृत्तवती वनं ॥५॥ अवतीर्य रथात्कन्या नमस्कृत्य च बंधुषु ॥ उपगम्य वनं पुण्यं तपस्तेपे ययातिजा ॥ उपवासैश्च विविधैर्दीक्षा
भिर्नियमैस्तथा ॥ आत्मनो लघुतां कृत्वा बभूव मृगचारिणी ॥७॥ वैदूर्यांकुरकल्पानि मृदूनि हरितानि च ॥ चरंती शष्पमुख्यानि ति
क्तानि मधुराणि च ॥८॥ स्रवंतीनां च पुण्यानां सुरसानि शुचीनि च ॥ पिबंती वारिमुख्यानि शीतानि विमलानि च ॥९॥ वनेषु मृगराजेषु व्याघ्र
विप्रोषितेषु च ॥ दावाग्निविप्रमुक्तेषु शून्येषु गहनेषु च ॥१०॥ चरंती हरिणैः सार्द्धं मृगीव वनचारिणी ॥ चचार विपुलं धर्मं ब्रह्मच
र्येण संवृता ॥११॥ ययातिरपि पूर्वेषां राज्ञां वृत्तमनुष्ठितः ॥ बहुवर्षसहस्रायुर्युयुजे कालधर्मणा ॥१२॥ पुरुर्यदुश्च द्वौ वंशौ वर्द्धमानौ नृ
पोत्तमौ ॥ ताभ्यां प्रतिष्ठितो लोके परलोके च नाहुषः ॥१३॥ महीयते नरपतिर्ययातिः स्वर्गमास्थितः ॥ महर्षिकल्पो नृपतिः स्वर्गा
ग्र्यफलभुग्विभुः ॥ बहुवर्षसहस्राख्ये काले बहुगुणे गते ॥ राजर्षिषु निषण्णेषु महीयःसु महर्षिषु ॥ ॥१५॥ ॥

॥भा॰उ॰
॥२०६

अवमेनेनरान्सर्वान्देवान्ऋषिगणांस्तथा ययातिर्मूढविज्ञानो विस्मयाविष्टचेतनः ततस्तंवुबुधेदेवः शक्रोवलनिषूदनः तेचराजर्षयः सर्वेधि
ग्धिगित्येवमब्रुवन् ॥ १७ ॥ विचारश्चसमुत्पन्नोनिरीक्ष्यनहुषात्मजं कोन्वयंकस्यवाराज्ञः कथंवास्वर्गमागतः कर्मणाकेनसिद्धोयंक्ववानेनतपश्
चितं । कथंवाज्ञायतेस्वर्गेकेनवाज्ञायतेप्युत ॥ १९ ॥ एवंविचारयंतस्तेराजानंस्वर्गवासिनः दृष्ट्वापप्रच्छुरन्योन्यंययातिंनृपतिंप्रति २० विमा
नपालाःशतशःस्वर्गद्वाराभिरक्षिणः पृष्टाआसनपालाश्चनजानीमेत्यथाब्रुवन् ॥ २१ ॥ सर्वेतेह्यावृतज्ञानानाभ्यजानंततंनृपं सम
हूर्तात्सनृपोहतौजाअभवत्तदा ॥ २२ ॥ इत्युद्योगेगालवचरिते ॥ १२० ॥ अथाप्रचलितःस्थानादासनाचपरिच्युतः । कंपितेनेवमन
सोह्युपातिष्टन्महीतलं म्लानस्रग्भ्रष्टविज्ञानः प्रभ्रष्टमुकुटांगदः विघूर्णन्हस्तसर्वांगः प्रभृष्टाभरणांबरः ॥ २ ॥ अदृश्यमानस्तान्प
श्यन्नप्रपश्यंश्चपुनःपुनः शून्यःशून्येनमनसाप्रपतिष्यन्महीतलं ॥ ३ ॥ किंमयामनसाध्यातमशुभंधर्मदूषणं येनाहंचलितः
स्थानादितिराजाव्यचिंतयत् । तेतुतत्रैवराजानःसिद्धाश्चाप्सरसस्तथा ॥ अपश्यंतनिरालंबंययातिंतंपरिच्युतं ॥ अथैत्यपुरुषः
कश्चित्क्षीणपुण्यनिपातकः ययातिमब्रवीद्राजन्देवराजस्यशासनात् ॥ ६ ॥ अतीवमदमत्तस्त्वंनकिंचिन्नावमन्यसे मानेनभ्रष्टः ॥एम॥
स्वर्गस्तेनार्हस्त्वंपार्थिवात्मज ॥ ७ ॥ नचप्रज्ञायसेगच्छपतस्वेतितमब्रवीत् ॥ पतेयंसत्स्वितिवचस्त्रिरुक्त्वानहुषात्मजः पतिष्यंश्चिंतय ॥२०६॥
मासगतिंगतिमतांवरः एतस्मिन्नेवकालेतुनैमिषेपार्थिवर्षभान् ॥ चतुरोपश्यतनृपस्तेषांमध्येपपातह ॥ ९ ॥ ॥

एकः स्वशब्दः पादपूरणार्थेः गंगां नदीमिव धूममयीं लेखामालंब्य निपपातेति संबंधः ॥ २४ ॥ प्रतिबंधुषु दौहित्रपुरुषनृपेषु ॥ २५ ॥ २६ ॥

प्रतर्दनो वसुमनाः शिबिरौशीनरोऽष्टकः । वाजपेयेन यज्ञेन तर्पयंति सुरेश्वरं ॥ तेषामध्वरजं धूमं स्वर्गद्वारमुपस्थितं ॥ ययातिरुपजिघ्रन्वै निपपात महीं प्रति ॥ भूमौ स्वर्गे च संबद्धां नदीं धूममयीमिव ॥ २४ ॥ गंगां गामिव गच्छंतीमालंब्य जगतीपतिः ॥ श्रीमत्स्ववभृथाग्र्येषु चतुर्षु प्रतिबंधुषु ॥ २५ ॥ मध्ये निपतितो राजा लोकपालोपमेषु सः ॥ चतुर्षु हुतकल्पेषु राजसिंहमहाग्निषु ॥ पपात मध्ये राजर्षिर्ययातिः पुण्यसंक्षये ॥ तमाहुः पार्थिवाः सर्वे दीप्यमानमिव श्रिया २६ को भवान्कस्य वा बंधुर्देशस्य नगरस्य वा ॥ यक्षो वाप्यथवा देवो गंधर्वो राक्षसोऽपि वा ॥ २७ ॥ न हि मानुषरूपोऽसि को वार्थः कांक्ष्यते त्वया ॥ ययातिरुवाच ॥ ययातिरस्मि राजर्षिः क्षीणपुण्यश्च्युतो दिवः ॥ पतेयं सत्स्विति ध्यायन्भवत्सु पतितस्ततः ॥ २८ ॥ राजान ऊचुः ॥ सत्यमेतद्भवतु ते कांक्षितं पुरुषर्षभ ॥ सर्वेषां नः क्रतुफलं धर्मश्च प्रतिगृह्यतां ॥ २९ ॥ ययातिरुवाच ॥ नाहं प्रतिग्रहधनो ब्राह्मणः क्षत्रियो ह्यहं ॥ न च मे प्रवणा बुद्धिः परपुण्यविनाशने ॥ ३० ॥ नारद उ० ॥ एतस्मिन्नेव काले तु मृगचर्याक्रमागतां ॥ माधवीं प्रेक्ष्य राजानस्तेऽभिवाद्येदमब्रुवन् ॥ किमागमनकृत्यं ते किं कुर्मः ॥ शासनं तव ॥ आज्ञाप्या हि वयं सर्वे तव पुत्रास्तपोधने ॥ ३१ ॥ तेषां तद्भाषितं श्रुत्वा माधवी परया मुदा ॥ पितरं समुपागच्छद्ययातिं सा ननंद च ॥ ३२ ॥ दृष्ट्वा मूर्ध्ना नतान्पुत्रांस्तापसी वाक्यमब्रवीत् दौहित्रास्तव राजेंद्र मम पुत्रा न ते पराः ॥ ३३ ॥ इमे त्वां तारयिष्यंति दिष्टमेतत्पुरातनं ॥ अहं ते दुहिता राजन्माधवी मृगचारिणी ३४ मया प्युपचितो धर्मस्ततोऽर्धं प्रतिगृह्यतां ॥ यस्माद्राजन्नराः सर्वे अपत्यफलभागिनः ॥ ३५ ॥ तस्मादिच्छंति दौहित्रान्यथा त्वं वसुधाधिप

 अष्टभागेन अष्टमांशेन ॥ अध्यायः ॥ आधाने अग्न्याधानोपलक्षितेश्रौतधर्मे ॥

ततस्ते पार्थिवाः सर्वे शिरसा तं न नीतदा अभिवाद्य नमस्कृत्य मातामहमथाब्रुवन् ॥ उच्चैरनुपमैः स्निग्धैः स्वरैरापूर्य मेदिनीं २८ माता
महं नृपतं पस्तारयंतिदिवं च्युतं ॥ अथ तस्मादुपगतो गालवोप्याह पार्थिवं २९ तपसो मे ष्टभागेन स्वर्गमारोहतां भवान् ॥ इत्युद्योगे गा
लवचरिते ० नारदउ० ॥ प्रत्यभिज्ञातमात्रोथ सद्भिस्तैर्नरपुंगवः ययातिर्दिव्यसंस्थानो बभूव विगतज्वरः ॥ १ ॥ दिव्यमाल्यांबरधरो दि
व्याभरणभूषितः दिव्यगंधगुणोपेतो न पृथ्वीमस्पृशत्पदा ॥ २ ॥ ततो वसुमनाः पूर्वमुच्चैरुच्चारयन्वचः ख्यातो दानपतिर्लोके व्या
जहार नृपतिं तदा ॥ ३ ॥ प्राप्तवानस्मि यल्लोके सर्ववर्णेष्वगर्हया तदप्यथ ददाम्यामि तेन संयुज्यतां भवान् ॥ यत्फलं दानशीलस्य क्ष
माशीलस्य यत्फलं यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥ ५ ॥ शिबिरौशीनरो धीमानुवाच मधुरां गिरं यथा बालेषु नारीषु वैहा
र्येषु तथैव च संगरेषु निपातेषु तथा पद्व्यसनेषु च ॥ अनृतं नोक्तपूर्वं मे तेन सत्येन खं व्रज यथा प्राणांश्च राज्यं च राजन्धर्मसु
खानि च त्यजेयं न पुनः सत्यं तेन खं व्रज यथा सत्येन मे धर्मो यथा सत्येन पावकः ॥ प्रीतः शक्रश्च सत्येन तेन सत्येन खं व्रज ॥ ८ ॥ अष्टक
स्त्वथ राजर्षिः कौशिको माधवीसुतः अनेकशतयज्वानं वाक्यं प्राह धर्मवित् ॥ ९ ॥ शतशः पुंडरीका मे गोसवाश्चरिताः प्रभो
क्रतवो वाजपेयाश्च तेषां फलमवाप्नुहि ॥ न मे रत्नानि न धनं न तथान्ये परिच्छदाः क्रतुष्वनुपयुक्तानि तेन सत्येन खं व्रज ॥ य
था यथा हि जल्पंति दौहित्रास्तेन राधिपं ॥ तथा तथा मतिं त्यक्त्वा राजा दिवं ययौ एवं सर्वे समस्तास्ते राजनः सुकृतेन तथा ॥ ॥

ययातिस्वर्गतोभ्रष्टंतारयामासुरंजसा॥दौहित्राःस्वेनधर्मेणयज्ञदानकृतेनच॥चतुर्षुराजवंशेषुसंभूताःकुलवर्द्धना॥मातामहंमहा
प्राज्ञोदिवमारोपयन्नुते॥२५॥राजानऊचुः॥राजधर्मगुणोपेता॥सर्वधर्मगुणान्विता॥दौहित्रास्तववयंराजन्दिवमारोहतांभवान् २
सुघोगपर्वणिगालवचरिते१॥नारदउ०॥सद्भिरारोपितस्वर्गे॥पार्थिवैर्भूरिदक्षिणै॥अभ्यनुज्ञायदौहित्रान्ययातिदिवमास्थि
तः॥१॥अभिवृष्टिश्चवर्षेणनानापुष्पसुगंधिनाः॥परिष्वक्तश्चपुण्येनवायुनापुण्यगंधिना॥२॥अचलस्थानमास्थायदौहि
त्रफलमर्जितं॥कर्मभि॥स्वैरुपचितायज्वाना॥परमाश्रिय॥३॥उपगीतोपनन्तुगंधर्वाप्सरसांगणै॥प्रीत्याप्रतिगृहीतश्चस्वर्गेदुंदु
भिनिस्वनै॥४॥अभिष्टुतश्चविविधैर्देवराजर्षिचारणे॥अर्चितश्चोत्तमार्घेणदैवतैरभिनंदिताः॥५॥प्राप्तःस्वर्गफलंचैनंतमुवाच
पितामहः॥बहुवर्षसहस्रांतंप्रजापालनतत्परः॥६॥अनेकंक्रतुदानौघैरर्जितंमेमहत्फलं॥कथंतदल्पकालेनक्षीणंयेनास्मिपा
तितः॥भगवल्लब्धलोकांश्चशाश्वतान्ममनिर्जितान॥कथंतुममतत्सर्वंविप्रणष्टंमहाद्युते॥७॥पितामहउवाच॥बहुवर्षसह
स्रांतंयत्त्वयोपार्जितंफलं॥तदनेनैवदोषेणक्षीणंयेनासिपातितः॥८॥अभिमानेनराजेंद्रधिक्कृतः॥स्वर्गवासिभि॥नायंमानेन
राजेंद्रनबलेननहिंसया॥१०॥नशाठ्येननमायाभिर्लोकोभवतिशाश्वतः॥नावमान्यास्त्वयाराजन्नृधमोत्कृष्टमध्यमा॥११॥

॥भा॰उ॰ पापिवसेनलब्धंतंपापंक्षयेवभोक्ष्यंनतुभ्रात्रादिभिःइत्याशयेनाह दहतीतिकिंतुकैर्नैदंतदाप्रोति |कामस्यप्रधारितंनिश्चितं || अ॰
॥२११॥

नहिमानप्रवादानांकश्चिदस्तिसमःक्वचित् पत्तनारोहणमिदंकथायिष्यंतियेनराः |४५| विषमामपिपितंप्राप्तास्तदेव्यंतितंनश्रयाय
नारदउ॰ |दोषदोषोभिमानेनपुराप्राप्तोययातिना || निर्वधेनातिमात्रंचगालवेनमहीपते |४६| श्रोतसंहितकामानांसुहृदांभूतिमिच्छता
नकर्तव्योहिनिर्वधोनिर्वधोहिक्षयोदयः तस्मात्वमपिगांधारेमानंक्रोधंचवर्जय |संधत्स्वपांडवैर्वीरैःसंरंभंत्यजपार्थिव || ददातियत्पार्थ
थिवयत्करोतिपद्धतपस्तप्यतियज्जुहोति |४८| नतस्यनाशोस्तिनचापकर्षोनान्यस्तदश्नातिसएवकर्ता इदंमयाख्यानमनुत्तमंमह
तंवहुश्रुतानांगततेषरागिरां |समीक्ष्यलोकेवहुधारितात्रिवर्गदृष्टिःपृथिवीमुपाश्नुते ||४९| इत्युद्योगपर्वणिगालवचरितं
समाप्तं || धृतराष्ट्रउ॰ ||भगवन्नेवमेवैतद्यथावदसिनारद इच्छामिचाहमप्येवंनत्वीशोभगवन्नहं |१| वैशं॰ |एवमुक्त्वाततःकृष्ण ॥उ॰भा॥
मभ्यभाषतःकौरवः स्वर्ग्यंलोक्यंचमामात्यधर्म्यंन्याय्यंचकेशव नत्वहंवशस्तातक्रियमाणंनमेप्रियं |अंगदुर्योधनंकृष्ण ॥२११॥
इंक्षास्त्रानितिगंसम |२| अनुनेतुंमहावाहोयतत्स्वपुरुषोत्तम |नश्रृणोतिमहावाहोवचनंसाधुभाषितं ||४

गांधार्याश्च हृषीकेश विदुरस्य महात्मनः ॥ अन्येषां चैव सुहृदां भीष्मादीनां हितैषिणां ।५। स त्वं पापमतिं क्रूरं पापचित्तमचेतनं । अनुशा
धि दुरात्मानं स्वयं दुर्योधनं नृप ।६। सुहृत्कार्यं तु सुमहत्कृतं ते स्याज्जनार्दन वैशं० । ततोभ्यावृत्य वार्ष्णेयो दुर्योधनममर्षणं ॥ अब्रवी
न्मधुरां वाचं सर्वधर्मार्थतत्त्ववित् । दुर्योधन निबोधेदं मद्वाक्यं कुरुसत्तमः । समर्थं तु विशेषेण साखानो नृशंसानि स्यात्रपः ।८। त
देतदीदृशं कर्म यथा त्वं तात मन्यसे । धर्मार्थैः सानुबंधस्य भारत महाप्राज्ञ कुले जातः साध्वेतत्कर्तुमर्हसि । श्रुतवृत्तोपसंपन्नः सर्वैः समुदि
तो गुणैः । दौष्कुलेया दुरात्मानो नृशंसा निरपात्रपः ।१०। तदेतदीदृशं कर्म यथा त्वं तात मन्यसे । धर्मार्थयुक्तः सर्वैः समुदितो गुणैः । दौष्कु
लेया दुरात्मानो नृशंसा निरपात्रपः ।१०। तदेतदीदृशं कर्म यथा त्वं तात मन्यसे । धर्मार्थयुक्ता लोकेस्मिन्प्रवृत्तिर्लक्ष्यते सतां ।११। अ
सतां विपरीतानु लक्ष्यते भरतर्षभ विपरीता त्वियं वृत्तिरसकृल्लक्ष्यते त्वयि ।१२। अधर्मश्चानुबंधोत्र घोरः प्राणहरो महान् । अनि
ष्टश्चानिमित्तश्च न च शक्यश्च भारत ।१३। तमनर्थं परिहरन्नात्मश्रेयः करिष्यसि । भ्रातॄणामथ भृत्यानां मित्राणां च परंतप ।१४। अध
र्म्यादयशस्याच्च कर्मणस्त्वं प्रमोक्ष्यसे । प्राज्ञैः शूरैर्महोत्साहैरात्मवद्भिर्बहुश्रुतैः ।१५। संधत्स्व पुरुषव्याघ्र पांडवैर्भरतर्षभ ॥ त
द्धितं च प्रियं चैव धृतराष्ट्रस्य धीमतः ।१६। पितामहस्य द्रोणस्य विदुरस्य महामतेः । कृपस्य सोमदत्तस्य बाह्लीकस्य च धीमतः ।
।१७। अश्वत्थाम्नो विकर्णस्य संजयस्य विविंशतेः । ज्ञातीनां चैव भूयिष्ठं मित्राणां च परंतप ।१८॥ शमे शर्म भवेत्तात सर्वस्य जगतस्त
थाह्रीमानसि कुले जातः श्रुतवानानृशंसवान् ॥१९॥ तिष्ठ तात पितुः शासने मातुश्च भरतर्षभ ॥ एतच्छ्रेयो हि मन्यंते पिता यच्छा
स्ति भारत ।२०। उत्तमापद्गतः सर्वः पितुः स्मरति शासनं । ।

॥भा॰उ॰ एवं ते ते पितुः तात पांडवैः सह संगमं ॥ सामात्यस्य कुरुश्रेष्ठ तत्तुभ्यं तात रोचतां ॥ श्रुत्वाय सुहृदां प्राज्ञ समर्थो न प्रतिपद्यते ॥ २३ ॥ यस्तु निः
॥२९२॥ श्रेयसं श्रुत्वा प्राकृतं अभिपद्यते ॥ आत्मनो मतमुत्सृज्य स लोके सुखमेधते ॥ पार्थस्य कामं वचनं प्राप्तिनिरुत्या न मन्यते ॥ अप्रियोत्ति प्राति
कूलानि द्दिषतां वश्यमेति सः ॥ सतां मतमतिक्रम्य यो सतां वर्त्तते मते ॥ शोचंते व्यसने तस्य सुहृदो न चिरादिव ॥ २५ ॥ मुख्यानमात्यानु
त्सृज्य यो निहीनान्निषेवते ॥ स घोरामापदं प्राप्य नोत्तरमधिगच्छति ॥ २६ ॥ सोसत्सेवी वृथाचारो न श्रोता सुहृदां सतां ॥ परान्वृणी
ते स्वान्द्वेष्टि तं गौर्जहति भारत ॥ स त्वं विरुध्य तैर्वीरैरन्येभ्यस्त्राणमिच्छसि ॥ अशिष्टेभ्योसमर्थेभ्यो मूढेभ्यो भरतर्षभ ॥ २८ ॥ को हि श
क्रसमान् ज्ञातीनतिक्रम्य महारथान् ॥ अन्येभ्यस्त्राणमाशंसेत्त्वदन्यो भुवि मानव ॥ २९ ॥ मिथ्योपचरिता ह्येते जन्मप्रभृति पाण्डवाः ॥
त्वयि सम्यग्महाबाहो प्रतिपन्ना यशस्विन ॥ ३० ॥ तथाप्रि प्रतिपन्नश्चानथैव भरतर्षभ ॥ स्वगात्वयि निविष्टानां धर्मो यास्तेषु वं घुमुत्ययु
मामनुवशमन्वगाः ॥ ३१ ॥ त्रिवर्गयुक्तः प्राज्ञानमारंभो भरतर्षभ ॥ धर्मार्थावनुरुध्यंते त्रिवर्गासंभवे नराः ॥ ३२ ॥ पृथगात्वापि निविष्टानां
धर्मं धीरोनुरुध्यते ॥ मध्यमार्थं कलिं बालाः कार्यौ लिप्सयान सुधर्म ॥ मेवानुरुध्यते ॥ ३३ ॥ इंद्रियैः प्राकृतो लोभाद्धर्मं विप्रजहाति
हः ॥ कामार्थावनुपायेन लिप्समानो विनश्यति ॥ ३४ ॥ कामार्थौ लिप्समानस्तु धर्ममेवादितश्चरेत् ॥ न हि धर्मादपैत्यर्थः ॥ कामो वापि क ॥राम॥
दाचन ॥ ३५ ॥ उपायं धर्ममेवाहुस्त्रिवर्गस्य विशांपते ॥ लिप्समानो हि तेनाशु कक्षेग्निरिव वर्द्धते ॥ स त्वं ततोनुपायेन लिप्ससे भ ॥२९२॥
रतर्षभ ॥ आधिराज्यं महद्दीप्तं प्रथितं सर्वराजसु ॥ ३७ ॥

स्थिं घातन् लोभादिन ह्यष्येन ॥३९॥

आत्मानोत स्वति प्रेव वने परं प्युनाय ध्या ॥ यः सम्यग् उवर्तमाने सुखि मि ध्यात जन्यू वर्नमे ॥४०॥ ननस्त्वाद्धि मतिं छि धाघस्व नेछो
स्यरा भव ॥ अविछि त्रमजे रस्यकल्याणे धीयन्नेमति ॥४१॥ आत्मवा मावमन्येन त्रिषु लोकेषु भारत ॥ श्रेयस्तर ज्जेनानानपांडुवे
स्तहसंगत ॥४२॥ वि अविछि त्रमजेर स्यकल्यो नेहि संप्रीयमाण स्त्वमवो न कामान वाक्यसि ॥ पांडवैर्निर्जितां भूमिं भुंजानो एजसत्तम
पांडवान् पृष्ठतः कृत्वा त्रापंमाशंससेस्व नःदुःशासने दुर्विषहे कर्णे चापि ससौबले ॥४३॥ एतेष्वैश्वर्यमाधाय भूमिमिच्छसि भारत ॥ न चैते तव
पर्याप्ता ज्ञाने धर्मार्थयोस्तथा ॥४४॥ विक्रमे चाप्यपर्याप्ताः पांडवान् प्रतिभारत ॥ नहीमे सर्वराजानः पर्याप्ताः सहितास्तथा ॥४५॥ क्रुद्धस्य भीम
सेनस्य प्रेक्षितुं मुखमाहवे ॥ इदं संनिहितं तात समग्रं पार्थिवं बलं ॥४६॥ अयं भीष्मस्तथा द्रोणः कर्णश्चायं तथा कृपः भूरिश्रवाः सोमदत्तिरश्व
त्थामा जयद्रथः ॥४७॥ अशक्ताः सर्व एवैते प्रति योद्धुं धनंजयं ॥ अजेयो ह्यर्जुनः क्रुद्धः सर्वैरपि सुरासुरैः ॥४८॥ मानुषैरपि गंधर्वैर्मा युद्धे चेत आ
धिथा ॥ दृश्यतां वा पुमान् कश्चित्समग्रे पार्थिवे बले ॥४९॥ योर्जुनं समरं प्राप्य स्वस्तिमानाव्रजेद्गृहान् ॥ किं ते जनक्षयेनेह कृतेन भरत
र्षभ ॥ यस्मिन् जिते जितं ते स्यात्पुमानेकः स दृश्यतां ॥ यः स देवान् सगंधर्वान् सयक्षासुरपन्नगान् ॥५०॥ अजयत्खांडवप्रस्थे कस्तं पु
रुषमाह्नयेत् ॥ तथा विराटनगरे श्रूयते महदद्भुतं ॥ एकस्य च बहूनां च पर्याप्तं तन्निदर्शनं ॥ तमजेयमनाधृष्यं विजेतुं जिष्णुमच्युतं ॥ आ
शंससीह समरे वीरमर्जुनमूर्जितं ॥ मद्द्वितीयं पुनः पार्थं कः प्रार्थयितुमर्हति ॥ युद्धे प्रतीपमायांतमपि साक्षात्पुरंदरः ॥ बाहुभ्यामुद्धरेद्भू
मिं दहेत्क्रुद्ध इमाः प्रजाः ॥ पातयेत्त्रिदिवाद्देवान् योर्जुनं समरे जयेत् ॥५१॥

॥भा॰उ॰ अध्यायः भानीनत्रः मानस्य ॥
॥१२३॥

पपपपुत्रांस्तथाभ्रातॄन्ज्ञातीन्संबंधिनस्तथा त्वत्कृते विनशिष्येयुरिमे भरतसत्तम अस्तु शेषं कौरवाणाम पराभूदिदं कुलं कुलघ्न
इति नोच्येथा नष्टकीर्तिर्नराधिप त्वामेव स्थापयिष्यंति यौवराज्ये महारथाः महाराज्ये च पितरं धृतराष्ट्रं जनेश्वरं ॥४॥ मा तात श्रियमा
यांतीमवमंस्थाः समुद्यतां । अर्द्धं प्रदाय पार्थेभ्यो महतीं श्रियमाप्स्यसि ॥५॥ पाण्डवैः संशमं कृत्वा कृत्वा च सुहृदां वच संप्रीयमाणो मित्रैश्च चि
रं भद्राण्यवाप्स्यसि ॥६॥ इत्युद्योगपर्वणि वै॰ ॥ ततः शांतनवो भीष्मो दुर्योधनममर्षणं केशवस्य वचः श्रुत्वा प्रोवाच भरतर्षभः कृ
ष्णेन वाक्यमुक्तोसि सुहृदां शममिच्छता । अनुपश्यस्व तत्तात मा मन्युवशमन्वगाः ॥१॥ अकृत्वा वचनं तात केशवस्य महात्मनः न जा
तु श्रेयो न सुखं न कल्याणमवाप्स्यसि ॥२॥ धर्म्यमर्थं च यत्प्राह पुराणं तात केशवः तमर्थमभिपद्यस्व मा राजन्नीनशः प्रजाः ॥३
ज्वलितां त्वमिमां लक्ष्मीं भारतीं सर्वराजसु जीवतो धृतराष्ट्रस्य दौरात्म्याद्भ्रंशयिष्यसि । आत्मानं च सहामात्यं सपुत्रभ्रातृबांधवं
अहमित्यनया बुद्ध्या जीविताद्भ्रंशयिष्यसि ॥५॥ अतिक्रामन्केशवस्य तथ्यं वचनमर्थवत् पितुश्च भरतश्रेष्ठ विदुरस्य च ॥ ए॰ मा॥
धीमतः ॥७॥ मा कुलघ्नः कुपुरुषो दुर्मतिः कापथं गमः मातरं पितरं चैव मा मज्जीः शोकसागरे ॥८॥ अथ द्रोणोब्रवीत्तत्र दुर्योधनमि ॥१२३॥
दं वच अमर्षवशमापन्नं निःश्वसंतं पुनः पुनः धर्मार्थयुक्तं वचनमाह त्वां तात केशवः तथा भीष्मः शांतनवस्तज्जुषस्व नराधिप
॥१०॥

एते कर्णादय: कृत्वा यजयाप्रपरेषामसद्दादीनां ॥२४॥ माजीघनमाघातययत्रतान् अजेयान्विद्धि २४ २५

श्रान्तो मे धाविनो दान्ता चर्थकामो वकुश्रुतो ॥ आहतुस्त्वां हितां वाक्यं न जग्राह त्वं नराधिप । अनुनीय महाप्राज्ञ कृष्ण भीष्मोपहृत्य नु: माधवं
बुद्धिमोहेन मा कुर्म्मं स्था ॥ परंतप ॥ ये त्वां प्रत्साहयंत्येते नैते कृत्वाय कर्हिचित ॥ वैरं परेषां ग्रीवायां प्रतिमोक्ष्यंति संयुगे । माजीघन । प्रजा सर्वा:
पुत्रान् भ्रातृंस्तथैव च ॥ वासुदेवार्जुनौ यत्र विध्यजेयं बलं हि तत् त ॥ एतच्चैव मतं सत्यं सुहृदो: कृष्णभीष्मयो ॥ यदि नादास्यते तात न पश्चात्तप्स्य
सि भारत ॥ २५ ॥ यथोक्तं जामदग्न्येन भूयानेष ततोर्जुन: कृष्णो हि देवकीपुत्रो दैवैरपि दुस:सह: ॥ २६ ॥ किं ते सुखप्रियेणेह प्रोक्तेन भरतर्षभ
एतत्ते सर्वमाख्यातं यथेच्छसि तथा कुरु ॥ २७ ॥ न हि त्वामुत्सहे वक्तुं भूयो भरतसत्तम ॥ वैशं० ॥ तस्मिन्वाक्यांतरे वाक्यं क्षत्तापि विदुरोब्रवीत्
दुर्योधनमभिप्रेक्ष्य धार्त्तराष्ट्रममर्षणं ॥ २८ ॥ दुर्योधनन शोचामि त्वामहं भरतर्षभ ॥ इमौ तु वृद्धौ शोचामि गांधारीपितरं च ते ॥ यावनाथौ च
परिष्येते त्वया नाथेन दुर्हृदा ॥ हतमित्रौ हतामात्यौ लूनपक्षाविवांडजौ ॥ २९ ॥ भिक्षुकौ विचरिष्येते शोचंतौ पृथिवीमिमां ॥ कुलघ्नमीदृ
शं पापं जनयित्वा कुपूरुषं ॥ ३० ॥ अथ दुर्योधनं राजा धृतराष्ट्रोभ्यभाषत ॥ आसीनं भ्रातृभि: सार्द्धं राजभि: परिवारितं ॥ दुर्योधन निबोधे
दं शौरिणोक्तं महात्मना ॥ आदत्स्व शिवमत्यंतं योगक्षेमं वदव्ययं ॥ अनेन हि सहायेन कृष्णेनाक्लिष्टकर्मणा ॥ इष्टान्सर्वानभिप्रा
यान्प्राप्स्याम: ॥ सर्वराजसु ॥ ३१ ॥

॥भा-उ- सुसंहतः सुस्थ एकीभूतः ॥२५॥ तीर्थेन उपायेन २६ अपराभवो जयः ॥२७॥ इति अध्यायः मे घाग्नोसंग्रामाग्नेमधीयत्नः
॥२१४॥

सुसंहितः केशवेन तात गच्छ युधिष्ठिरं । वरं स्वस्त्ययनं कृत्स्नं भरतानामनामयं २५ वासुदेवेन तीर्थेन तात गच्छ सुसंहितः कालप्राप्तमिदं मन्ये
मा तद्दुर्योधनातिगाः ॥२६॥ शमं चेद्याचमानं त्वं प्रत्याख्यास्यसि केशवं । त्वदर्थमभिजल्पन्तं न तवास्त्यपराभवः ॥२७॥ इ॰ उद्योगपर्वणि भग
वद्याने ॰ वैशं॰ ॥ एतदेव वचः श्रुत्वा भीष्मद्रोणौ समर्थ्य तौ दुर्योधनमिदं वाक्यमूचतुः शासनातिगं ॥१॥ यावत्कृष्णावसन्नद्धौ यावत्ति
ष्ठति गाण्डिवं । यावद्धौम्यो न मेधाग्नौ जुहोतीह द्विषां बले ॥२॥ यावन्न प्रेक्षते क्रुद्धः सेनां तव युधिष्ठिरः ॥ ह्रीनिषेधो महेष्वासस्तावच्छाम्य
तु वैशसं ॥३॥ यावन्न दृश्यते पार्थः स्वेऽनीके अवस्थितः ॥ भीमसेनो महेष्वासस्तावच्छाम्यतु वैशसं ॥४॥ यावन्न चरते मार्गान्पृतनामभिह
र्षयन् । भीमसेनो गदापाणिस्तावत्संशाम्यतु वैशसं ॥५॥ यावन्न शातयत्याजौ शिरांसि गजयोधिनां गदया वीरघातिन्या फलानी
व वनस्पतेः ॥६॥ कालेनापरिपक्वानि तावच्छाम्यतु वैशसं । नकुलः सहदेवश्चाधृष्टद्युम्नश्च पार्षतः ॥७॥ विराटश्च शिखण्डी च शैशुपालि
श्च दंशिताः । यावन्न प्रविशन्त्येते नक्रा इव महार्णवं । कृतास्त्राः क्षिप्रमस्यन्तस्तावच्छाम्यतु वैशसं यावन्न सुकुमारेषु शरीरेषु म ॥यसा॥
हीक्षितां । गार्ध्रपत्राः पतन्त्युग्रास्तावच्छाम्यतु वैशसं । चन्दनागुरुदिग्धेषु हारनिष्कधरेषु च नोरस्सु यावद्योधानां महेष्वासैर्महेष ॥२१४॥
वः ॥१०॥

रलसुक्त श्रोषधिवद्दृष्टं प्रतीतिरलौषधि ॥ एलांगुलीयकं एलैवंधसमेतेनेतिपारःस्वक्रुः सर्वसंपत्तपात्सर्वं ॥ २१ ॥ इति अध्यायः प्रसमीक्ष्यदि

कृतात्मे क्षिप्रमस्पद्विदृष्टापातिभिरायसैः अभिलक्ष्यैर्निपात्यंतेनावक्षाम्यतुवेषासं ॥ अभिवादयमानंस्तांशिरसाराजकुंजर ॥ २२
पाणिभ्यांप्रतिगृह्लातुधर्मराजोयुधिष्ठिरः ध्वजांकुशपताकाक्षंदक्षिणांतेसुदक्षिणः ॥ स्कंधेनिक्षिप्यतांवाहुंशांतयेभरतर्षभ ॥ अ
र्जुनेनममाप्यांवाचिभिस्तेणदिवाकिनः ॥ २३ ॥ मूर्ध्नितान्समुपाघ्रायप्रेम्णाभिवदपार्थिव ॥ दृष्ट्वातांपांडवेवीरक्षीताभिःसहसंगतं ॥ पावस
नांरजाश्रूणिप्रमुंचंतिनराधिपाः पुष्पतांराजधानीभुसर्वसंपन्महीक्षित ॥ २४ ॥ पृथिवीभ्रातृभावेनभुज्यतांविज्वरोभव ॥ इत्युद्योग
पर्वाणिभगवद्यानेः ॥ वैशं० ॥ श्रुत्वादुर्योधनोवाक्यमप्रियंकुरुसंसदि प्रत्युवाचमहावाहुंवासुदेवंयशस्विन ॥ प्रसमीक्ष्यभवान्नेतदुक्त
मर्हसिकेशव ॥ मामेवहिविशेषेणविभाष्यपरिगर्हसे ॥ पक्षपातेनपार्थानामकस्मान्मधुसूदन ॥ भवानगर्द्ध्यतेनित्यंकिंशमी
क्ष्यवलावलं ॥ भवानक्षत्ताचराजावघाचार्योवापितामहः मामेवपरिगर्हंतिनान्यंकंचनपार्थिवं ॥ नचाहंलक्षयेयेकिंविद्यामिवारमि
ह्यात्मनः ॥ अथसर्वेभवंतोमांविद्विषंतीसराजकाः

चार्यविभाष्यपरुषमुक्ता ॥ २५४ ॥ अभिचारं अन्यायं ॥ ५

॥ मा॰उ॰ ॥२१५ प्रियाभ्युपगतेप्रीत्यास्वीकृते॥७॥

न चाहं किंचिदत्यर्थमपराधमरिंदम । विचिंतयन्नपश्यामि सुसूक्ष्ममपि केशवं ॥६॥ प्रियाभ्युपगते द्यूते पांडवा मधुसूदन जिताः ॥ श
कुनिना राज्यं तत्र किं मम दुष्कृतं ॥७॥ यत्पुनर्द्रविणं किंचित्तत्राजीयंत पांडवाः तेभ्यस्तत्प्रत्यनुज्ञातं तदा मधुसूदन ॥८॥ अपराधो
न चास्माकं यत्ते द्यूते पराजिताः ॥ अजेया जयतां श्रेष्ठ पार्थाः प्रव्रजिता वनं ॥९॥ केन वाप्यपवादेन विरुध्यंत्यरिभिः सह ॥ अशक्ताः
पांडवाः कृष्ण प्रहृष्टाः प्रत्यमित्रवत् ॥१०॥ किमस्माभिः कृतं तेषां कस्मिन्वा पुनरागसि ॥ धार्त्तराष्ट्रान्जिघांसंति पांडवाः सृंजयैः
सह ॥११॥ न चापि भयमुग्रेण कर्मणा वचनेन वा ॥ वित्रस्ताः प्रणमामेह भयादपि शतक्रतुं ॥१२॥ न च तं कृष्ण पश्यामि क्षत्र
धर्ममनुष्ठितं ॥ उत्सहेत युधा जेतुं यो नः शत्रुनिबर्हण ॥१३॥ न हि भीष्मकृपद्रोणाः सकर्णा मधुसूदन । देवैरपि युधा जेतुं शक्याः ॥ ता॰मा॰ ॥
किमुत पांडवैः ॥१४॥ स्वधर्ममनुपश्यंतो यदि माधव संयुगे ॥ अस्त्रेण निधनं काले प्राप्स्यामः स्वर्गमेव तत् ॥ मुख्यश्चैवैष नो धर्मः ॥२१५॥
क्षत्रियाणां जनार्दन ॥ यच्छयीमहि संग्रामे शरतल्पगता वयं ॥ ते वयं वीरशयनं प्राप्स्यामो यदि संयुगे ॥ अप्रणम्यैव शत्रूणां न नो तप्स्यंति माधव
१७॥ कश्च जातु कुले जातः क्षत्रधर्मेण वर्तयन् ॥ भयाद्वृत्तिसमीक्षो वा प्रणमेदिह कस्यचित् ॥१८॥

उच्छेरेनधर्मसंकुर्यादेव॥ अपर्वणि अप्रस्तावे। पर्वस्यादुत्सवे गंधो प्रस्तावेन क्षणेन रदंतिविध्र॥४१॥ सातंगं मुनि त्वहल ॥ त्यक्तधर्मोन्क्ष

तमुच्छेदेनननमेदुधमो ह्येवपोहृषं॥ अपर्वणिन भस्मेननननमेदिह्रक स्यचित॥४२॥ इतिमातंगवचनंपरिश्रुत्यानिहनेष्यवः धर्मायचैवप्र
णामेद्राह्मणोभ्यष्ठ्ममद्विधा॥ अचिंतयन कंचिदन्यं यावज्जीवंतथाचरेत॥ एषधर्मः क्षत्रियाणांमतंमेनचमेसदा॥ राज्यं प्राप्याप्यनुद्
तोयोमे पित्रायुरा भवत्त नससलभ्यः पुनर्जातुमपिजीवतिकेशव॥४४॥ यावद्यराजाध्रियतेधृतराष्ट्रोजनार्दन॥ मृतस्यप्राप्यसावयंतेयामु
पजीवाममाधव॥४५॥ अप्रदेयंपुराद्त्तं राज्यंपरवतोमम अज्ञानाद्बालभयाद्वापिमयिबालेजनार्दन॥४६॥ नतदद्यपुनर्लभ्यंपांडवैर्वृष्णिनंदन
ध्रियमाणेमहाबाहो मयिसंप्रतिकेशव॥४७॥ यावद्धिती क्ष्णायाष्ट्रच्या विछेदयेणमारिषा॥ तावदप्यपरित्याज्यं भूमेस्तपांडवान्प्रति
२८ इत्युद्योगे भगवद्याने॥ वैश०॥ ततः प्रहस्य दाशार्हः क्रोधपर्याकुलेक्षणः दुर्योधनमिदंवाक्यमब्रवीत्कुरुसंसदि॥ लप्स्यसेवी
रशयनं काममेतदवाप्स्यसि॥ स्थिरोभव सहामात्यो विमर्दो भविता महान॥२॥ यच्चैवंमन्यसे मूढ नमेकश्चिद्व्यतिक्रमः। पांडवेष्वि
ति तत्सर्वं निबोध नराधिप॥ श्रिया संतप्यमानेन पांडवानां महात्मनां। त्वयादुर्मंत्रितंद्यूतंसौबलेनच भारत॥ कथंज्ञातयस्तात श्रे
योसः साधुसंमताः॥ अथन्याय्यनुपस्थानं जिह्मेनाजिह्मचारिणः अक्षद्यूतं महाप्राज्ञ सतामतिविनाशनं॥ असतांतत्रजायं
ते भेदाश्च व्यसनानि च॥ ६॥

त्रिया॥ उपजीवामभिक्षांवलिद्धमन्नंभोक्ष्यामहत्स्वधर्म्यं॥ अध्यायः

॥भा॰उ॰॥ न्दिदं व्यसनं घोरं त्वया द्यूतमुखं कृतं अनमीक्ष्य सदाचारं सांद्रे पापानुबंधनेः कश्चान्यो जानति भार्यां वै विप्रकर्तुं तथा द्रुहि ॥ आनीय च सभां वक्तुं यथोक्ता द्रौ
॥२९६॥ पदी त्वया कुलीना शीलसंपन्ना प्राणेभ्योपि गरीयसी महिषी पांडुपुत्राणां तथा विनिकृता त्वया १९ जानाति कौरवः सर्वे यथोक्ताः कुरुपांसदि दुःशा
सनेन कौंतेयाः प्रव्रजंतः परंतप ॥ २० ॥ सम्यग्वृत्तेष्वलुब्धेषु सततं धर्मचारिषु ॥ स्वेषु बंधुषु कः साधुश्चरेदेवमसांप्रतं ॥ २१ ॥ नृशंसानामनार्याणां पुरुषा
णां च भाषणं कर्णदुःशासनाभ्यां च त्वया च बहुशः कृतं ॥ २२ ॥ सह मात्रा प्रदग्धुं तान्बालकान्वारणावते आस्थितः परमं यत्नं न समृद्धं तव तन्नृप ॥ २३ ॥ ऊषु
श्च सुचिरं कालं प्रच्छन्नाः पांडवास्तथा मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने ॥ विषेण सर्पबंधैश्च प्रतिताः पांडवास्त्वया सर्वोपायैर्विनाशायनसमृद्धं
च तव ॥ एवं बुद्धिः पांडवेषु मिथ्यावृत्तिः सदा भवान् ॥ कथं ते नापराधोस्ति पांडवेषु महात्मसु ॥ यच्चैभ्यो याचमानेभ्यः पित्र्यमंशं न दित्ससि ॥ तव पापप्रदाना
ग्निरिष्टैश्वर्योनिपातितः कृत्वा बहून्यकार्याणि पांडवेषु नृशंसवत् मिथ्यावृत्तिरनार्यः सन्नद्य विप्रतिपद्यसे ॥ २४ ॥ मातापितृभ्यां भीष्मेण द्रोणेन वि
दुरेण च ॥ शाम्येति मुहुरुक्तोसि न च शाम्यसि पार्थिव ॥ शमे हि सुमहाँल्लाभस्तव पार्थस्य चोभयोः न च रोचयसे राजन्किमन्यद्बुद्धिलाघवात् ॥ २६ ॥ न शर्म
प्राप्स्यसे राजन्नुत्क्रम्य सुहृदां वचः ॥ अधर्म्यमयशस्यं च क्रियते पार्थिव त्वया ॥ वैशं॰ ॥ एवं ब्रुवति दाशार्हे दुर्योधनममर्षणं ॥ दुःशासन
इदं वाक्यमब्रवीत्कुरुसंसदि ॥ २७ ॥ न चेत्संधास्यसे राजन्स्वेन कामेन पांडवैः ॥ बध्वा किल त्वां दास्यंति कुंतीपुत्राय कौरवाः ॥ २८ ॥ वैकर्तनं त्वां स ॥राम॥
म च त्रीनेतान्मनुजर्षभ ॥ पांडवेभ्यः प्रदास्यंति भीष्मो द्रोणः पिता च मे ॥ २९ ॥ वैशं॰ ॥ भ्रातुरेतद्वचः श्रुत्वा धार्तराष्ट्रः सुयोधनः क्रुद्धः प्रातिष्ठतो ॥२९६॥
त्थाय महानाग इव श्वसन् ॥ ३० ॥ विदुरं धृतराष्ट्रं च महाराजं च बाह्लिकं ॥ कृपं च सोमदत्तं च भीष्मं द्रोणं जनार्दनं ॥ ३१ ॥ ॥ ६७ ॥

वैकर्त्तनं त्वौम सर्वानेतानना हत्यदुर्मतिर्निरपत्रपः ॥ अश्लिष्टवदमर्यादो मानी मान्यावमानिता ॥ १६ ॥ तं प्रस्थितमभिप्रेक्ष्य भ्रातरो मनु
जर्षभ ॥ अनुजग्मुः सहामात्या राजानश्चापि सर्वशः ॥ १७ ॥ सभायामुत्थितं क्रुद्धं प्रस्थितं भ्रातृभिः सह दुर्योधनमभिप्रेक्ष्य भीष्मः
शांतनवोऽब्रवीत ॥ १८ ॥ धर्मार्थावभिसंत्यज्य संरंभं योऽनुमन्यते ॥ हसंति व्यसने तस्य दुर्हृदो न चिरादिव ॥ दुरात्मा राजपुत्रोयं धार्तराष्ट्रोऽनुपा
यवित् ॥ मिथ्याभिमानी राज्यस्य क्रोधलोभवशानुगः ॥ २० ॥ कालपक्वमिदं मन्ये सर्वं क्षत्रं जनार्दन ॥ सर्वे ह्यनुसृता मोहात्पार्थिवाः सह मं
त्रिभिः ॥ २१ ॥ भीष्मस्याथ वचः श्रुत्वा दाशार्हः पुष्करेक्षणः ॥ भीष्मद्रोणमुखान्सर्वानभ्यभाषत वीर्यवान ॥ २२ ॥ सर्वेषां कुरुवृद्धा
नां महानयमतिक्रमः ॥ प्रसह्य मंदमैश्वर्ये न नियच्छत यन्नृपं ॥ २३ ॥ तत्र कार्यमहं मन्ये प्राप्तकालमरिंदम ॥ क्रियमाणे भवेच्छ्रेयस्तत्सर्वं
शृणुतानघाः ॥ २४ ॥ प्रत्यक्षमेतद्भवतां यद्वक्ष्यामि हितं वचः ॥ भवतामानुकूल्येन यदि रोचेत भारत ॥ २५ ॥ भोजराजस्य वृद्धस्य दुराचारो
ह्यनात्मवान् ॥ जीवतः पितुरैश्वर्यं हृत्वा मन्युवशं गतः ॥ उग्रसेनः कृतो राजा भोज ॥ राजन्यवर्द्धनः ॥ कंसमेकं परित्यज्य कुलार्थं सर्वयादवाः
॥ २७ ॥ संभूय सुखमेधंते भारतांधकवृष्णयः

॥भा॰उ॰ ॥२९७॥ अध्यायः चिररात्रायसोगक्षेमवन्नवद्धकालं ॥ अप्राप्तस्यसुखस्यप्राप्तिःप्राप्तस्यसंरक्षणंचनिर्वहेदित्यर्थः ॥ ६ ॥

अपिवाप्यवदेद्गाननपरमेष्ठिन्प्रजापतिः ॥ वरुणायप्रयच्छेतानवध्वादैतेयदानवान् ॥ एवमुक्तस्ततोधर्मोनियोगात्परमेष्ठिनः ॥ वरुणाय
ददौधर्वान्वध्वादैतेयदानवान् ॥ तान्बध्वाधर्मपाशैश्चस्वैश्चपाशैर्जलेश्वर ॥ ५० वरुणःसागरेयत्तोनित्यंरक्षतिदानवान् ॥ तथादुर्योध
नंकर्णंशकुनिंचापिसौबलं ॥ ५१ बध्वादुःशासनंचापिपांडवेभ्यःप्रयच्छन ॥ त्यजेत्कुलार्थेपुरुषंग्रामस्यार्थेकुलंत्यजे ॥ ग्रामंजनपदस्या
र्थे आत्मार्थेपृथिवींत्यजेत् ॥ राजन्दुर्योधनंबध्वाततःसंप्रशाम्यपांडवैः ॥ ५२ ॥ त्वत्कृतेनविनश्येयुःक्षत्रियाःक्षत्रियर्षभ ॥ इतिश्रीमहा
भारतेउद्योगपर्वणिभगवद्याने ॥ चेष्टं॰ ॥ कृष्णस्यतुवचःश्रुत्वाधृतराष्ट्रोजनेश्वरः ॥ विदुरंसर्वधर्मज्ञंत्वरमाणोभ्यभाषत १ गच्छतातम
हाप्राज्ञांगांधारींदीर्घदर्शिनीं ॥ आनयेहतयासार्धंमनुनेष्यामिदुर्मतिं ॥ २ यदिसापिदुरात्मानंशमयेद्दुष्टचेतसं ॥ अपिकृष्णस्यसुहृदस्ति
ष्ठेमवचनेवयं ॥ अपिलोभाभिभूतस्ययथाममनुदर्शयेत् ॥ दुर्बुद्धेर्दुःसहायस्यप्रशमार्थंब्रुवतीवचः ४ अपिनोव्यसनंघोरंदुर्योधनकृतंमह
त् ॥ प्रशमयेच्चिररात्रायपयोगक्षेमवदव्ययं ॥ ५ राज्ञस्तुवचनंश्रुत्वाविदुरोदीर्घदर्शिनीं ॥ आनायामासगांधारींधृतराष्ट्रस्यशासनात् ॥ ६ धृतराष्ट्र ॥यम॥ ॥२९७॥
उवाच ॥ एषगांधारिपुत्रस्तेदुष्टात्मासोदुरात्मवान् ॥ सभायानिर्गतोमूढोव्यतिक्रम्यसुहृद्वचः ॥ ७ ॥

यः कामेन अतिभूतः अभिभूतः ॥ मिथ्याकपटेन अभिभूतः ॥ प्रतिपद्यते ईप्सितार्थादीन् तस्य सहायान भवंतीत्यर्थः ॥ ३५ ॥ अग्रभागः ॥ ३६ ॥ वि

समभिभूतः क्रोधाद्धा यो मिथ्या प्रतिपद्यते ॥ स्वे सुचान्ये सुवा तस्य न सहायां भवंत्युत ॥ ऐकीभूतैर्महाप्राज्ञैः शूरैररिनिबर्हणैः ॥ पांडवैः पृथिवीं
तात भोक्ष्यसे सहितः सुखी ॥ यथा भीष्मः शांतनवो द्रोणश्चापि महारथः ॥ आहतुस्तात तत्सत्यं मजेयौ कृष्णपांडवौ ॥ ३७ ॥ प्रपद्य स्व महा
बाहुं कृष्णमक्लिष्टकारिणं ॥ प्रसन्नो हि सुखाय स्यादुभयोरेव केशव ॥ ३८ ॥ सुहृदामर्थकामानां यो न तिष्ठति शासने ॥ प्राज्ञानां कृतवि
द्यानां स नरः शत्रुनंदनः ॥ ३९ ॥ न युद्धे तात कल्याणं न धर्मार्थौ कुतः सुखं ॥ न चापि विजयो नित्यं मा युद्धे चेत आधिथाः ॥ ४० ॥ भीष्मेण हि म
हाप्राज्ञ पित्रा ते बाह्लिकेन च ॥ दत्तोंशः पांडुपुत्राणां यथोचितमरिंदम ॥ ४१ ॥ यद्ध्वसि सहासान्तो भोक्तुं मंत्रं महीक्षितां ॥ अलमर्द्धं पृथिव्या
स्त्वं सहामात्य सजीवन ॥ ४२ ॥ सुहृदां वचने तिष्ठन् यशः प्राप्स्यसि भारत ॥ पुण्यश्लक्ष्णैर्द्युतिमद्भिरात्मवद्भिर्जितेंद्रियैः ॥ ४३ ॥ पांडवैर्विग्रहस्ता
त भ्रंशयेन्महतः सुखात् ॥ निगृह्य सुहृदां मन्युं शाधि राज्यं यथोचितं ॥ ४४ ॥ स्वयं प्रदानं पांडुपुत्रेषु प्रदाय पुरुषर्षभ ॥ अलमंग विकारोयं त्रयो
दशसमाः कृतः ॥ ४५ ॥ शमयैनं महाप्राज्ञ कामक्रोधोसमेधितौ ॥ नैव चश्चक्रं पार्थानां यदत्त्वद्धर्थमभीप्सति ॥ ४६ ॥ सूतपुत्रो दृढक्रोधो भ्राता
दुःशासनश्च ते ॥ भीष्मद्रोणौ कृपे कर्णे भीमसेने धनंजये ॥ ४७ ॥

कारः अपकारः समावर्जारि ॥ ४४ ॥ यत्वं पार्थानां अर्थं मभीप्ससि स एवं तत्
धार्य वहारात्मसहत्त्वर्थं नापि सूतपुत्रादन्यः प्राज्ञ ॥ श्रीरामः

॥भा॰उ॰ धृष्टद्युम्नेचसंक्रुद्धेनस्युःसर्वाःप्रजाध्रुवं ॥ अमर्षवशमापन्नोमांकुर्यात्त्वमजीघनः ॥ एवमाहितिष्ठथिवीकृत्स्नामायामयक्षतेवधः यच्चत्वंमन्य
॥२९८॥ सेमूढभीष्मद्रोणकृपादयः योत्स्यंतेसर्वपार्थेश्चेतिनैतदद्योपपद्यते ॥ समंराज्यंचप्रीतिश्चस्थानंचविदितात्मनां ॥ पांडवेष्वथयुष्मासुध
र्मस्त्वभ्यधिकस्ततः ॥ राजपिंडभयादेतेपरिहास्यंतिजीवितं ॥ नदृष्टिराक्ष्यंतिराजानंयुधिष्ठिरमुदीक्षितुं ॥ नलोभादर्थसंपन्निर्नराणा
मिहदृश्यते ॥ तदलंतातलोभेनप्रशाम्यभरतर्षभ ॥ ५५ ॥ इतिउद्योगपर्वणिभगवद्याने० वेपं० ॥ तत्तुवाक्यमनादृत्यसार्थवन्मातृभाषितं
पुनःप्रतस्थेसंरंभात्सकाशमकृतात्मनां ॥ १ ॥ ततःसभायानिर्गम्यमंत्रयामासकौरव ॥ सौबलेनमताक्षेणराज्ञाशकुनिनासह ॥ २ ॥ दु
र्योधनस्यकर्णस्यशकुनेःसौबलस्यच ॥ दुःशासनचतुर्थानामिदमासीद्विचेष्टितं ॥ पुराऽयमस्मान्गृह्णातिक्षिप्रकारीजनार्दनः स
हितोधृतराष्ट्रेणराज्ञाशांतनवेनच ॥ वयमेवहृषीकेशंनिगृह्णीमबलादिव ॥ सप्रस्युपुरुषव्याघ्रमिंद्रोवैरोचनंयथा ॥ श्रुत्वागृहीतं
वार्ष्णेयंपांडवाहृतचेतसः ॥ निरुत्साहाभविष्यंतिभग्नदंष्ट्राइवोरगाः ॥ अयंह्येषांमहाबाहुःसर्वेषांशर्मवर्मच ॥ अस्मिन्गृहीतेवरदेऋ
षभेसर्वसात्वतां ॥ निरुद्यमाभविष्यंतिपांडवाःसोमकैःसह ॥ तस्मादृयमिहैवैनंकेशवंक्षिप्रकारिणं ॥ क्रोशतोधृतराष्ट्रस्यबध्वा ॥राम॥
योत्स्यामहेरिपून् ॥ तेषांपापमभिप्रायंपापानांदुष्टचेतसां ॥ ९ ॥ इंगितज्ञःकविःक्षिप्रमन्वबुध्यतसात्यकिः ॥ तदर्थमभिनिष्क्रा ॥२९८॥
म्यहार्दिक्येनसहास्थितः ॥ १० ॥ अब्रवीत्कृतवर्माणंक्षिप्रंयोजयवाहिनीं ॥ व्यूढानीकःसभाद्वारमुपातिष्ठस्वदंशितः ॥ ११ ॥

कर्मेहृत्तनिग्रहारब्धं ।२४। विकुर्वतेनेविकारं कलहारब्धं कुर्वते ने ।२५। अप्राकंप्यं न च कर्तुं शक्यं ।२६।

यावदारब्धाम्यहं चैतत्स्त्रो स्मायात्क्लिष्टकर्मणो । सप्रविश्य सभां वीरः सिंहो गिरिगुहामिव ।२२। आचष्टत मभिप्रायं केशवायमहात्मने । धृतरा
ष्ट्रतनश्चैवविदुरो बुद्धिसत्तमः तेमामेतमः तेषामेतमभिप्रायमाचचक्षेस्मयान्निव । धर्मादर्थाच्च काच्चकर्मा धुविगर्हितं ।२४। मंदाः कर्तुमि
हेच्छंतिन चावाप्यं कदाचन । पुराविकुर्वते मूढा पापात्मानः समागताः ।२५। धर्षिताः काममन्युभ्यां क्रोधलोभवशानुगाः । इमं हि पुंडरीकाक्षं
जिघृक्षंत्यल्पचेतसः ।२६। पटेनाग्निं प्रज्वलितं यथा बालाय थो जडाः । सात्यकेस्तद्वचः श्रुत्वा विदुरो दीर्घदर्शिवान ।२७। धृतराष्ट्रं महाबाहुमब्र
वीत्कुरुसंसदि । राजान्परीतकालास्ते पुत्राः सर्वे महौजसः अशक्यमयशस्यं च कर्तुं कर्म समुद्यताः इमं हि पुंडरीकाक्षमभिभूय प्रस
ह्य ।२८। निग्रहीतुं किलेच्छंति सहिता वासवानुजं । इमं पुरुषशार्दूलमप्रधृष्यं दुरासदं । आसाद्य न भविष्यंति पतंगा इव पावकं । अयमि
च्छन्हि तान्सर्वान्युध्यमानाञ्जनार्दनः । सिंहो नागानिव क्रुद्धो गमयेद्यमसादनं । नत्वयं निंदितं कर्म कुर्यात्पापं कथंचन । न च धर्माद
पक्रामेदच्युतः पुरुषोत्तमः । विदुरेणैवमुक्ते तु केशवो वाक्यमब्रवीत् । धृतराष्ट्रमभिप्रेक्ष्य सुहृदां शृण्वतां तथा । राजन्नेते यदि क्रुद्धा मां नि
गृह्णंति पुरोजसः । एतेवामामहं चैनाननुजानीहि पार्थिव । एतान्हि सर्वान्संरब्धान्नियंतुमहमुत्सहे । न त्वहं निंदितं कर्म कुर्यां पापं कथंचन

॥आ०उ०॥ इदंतुकर्मकर्तुमितिमेष॥ ४०॥पंथानमवतारयितुंसत्पथेनिवेशयितुं ३२
॥२९६॥

एतेवेदेवसिंकुंतिहन्तकार्योयुधिष्ठिरः॥ अद्येवधह्यसेनांश्चयेचैतानानुभारत ४२॥ निगृह्यराजन्पार्थेभ्योदयांकिंदुष्कृतंभवेत्॥ इदंतुनप्रवर्ते
यंनिंदितंकर्मभारत॥ सन्निधौतेमहाराजक्रोद्यजंपापबुद्धिजं॥ एषदुर्योधनोराजन्यथोक्तमितथास्तुतत्॥ अहंतुसर्वोस्तनयानकुजानामितेन्द्र
१॥ एतच्छ्रुत्वातुविदुरंधृतराष्ट्रोभ्यभाषत॥ क्षिप्रमानयतंपापंराज्यलुब्धंसुयोधनं॥ सहमित्रैसमाहात्मंसहसोदर्यैसहानुगं॥ शक्नुयांयदिपंथा
नमवतारयितुंपुनः॥ ततोदुर्योधनंक्षत्तापुनःप्रावेशयत्सभां॥ ३४॥ अकामंसहकर्णेनराजभिःपरिवीरितं॥ अथदुर्योधनंराजाधृतराष्ट्रोभ्य
भाषत॥ कर्णदुःशासनाभ्यांचराजभिश्चापिसंहतं॥ नृशंसपापभूयिष्टक्षुद्रकर्मसहायवान्॥ पापैःसहायैःसंहत्यपापंकर्मचिकीर्षसित्व
ऽवचमपूर्युसंचसद्भिश्चापिविगर्हितंयथात्वादृशकोमूढोव्यवस्यत्कुलपांसनः॥ त्वमिमंपुंडरीकाक्षमप्रधृष्यंदुरासदं॥ पापैःसहायैःसंह
त्यपापंकर्मचिकीर्षसि॥ योनशक्योबलाद्धर्तुंदेवैरपिसवासवैः॥ तत्वंप्रार्थयसेमंदबालश्चंद्रमसंयथा॥ देवैर्मनुष्यैर्गंधर्वैरसुरैरुरगैश्चयः॥ नशक्योढुं ॥राम॥
समरेशक्यस्त्वंनचबुध्यसेकेशवं॥ गृहीतुंकामोविक्रम्यसर्वेपलेनमाधवं॥ गृहीतुंनाशकत्तत्रतंत्वयाथ्ययसेबलात्॥ निर्मोचनेषट्सहस्राः पा ॥२९६॥
शैर्बद्ध्वामहासुराः गृहीतुकामविक्रम्यसर्वेयलेनमाधवं॥ गृहीतुंनाशकंस्त्वेनंतत्वंप्रार्थयसेबलात्॥ ४३॥ प्राग्ज्योतिषगतंशौरिंनरकःसह
दानवैः॥ गृहीतुंनाशक्नुवंस्तत्रतंप्रार्थयसेबलात्॥ ४४॥

वैशंपायन उ० ॥ सा भर्तुर्वचनं श्रुत्वा राजपुत्री यशस्विनी ॥ अन्वेश्यं विजानंती गांधारी वाक्यमब्रवीत् । गांधार्युवाच ॥ अनयाद्भूरितं क्षिप्रं राज्य
कामातुरात्मना ॥ न हि राज्यमवाप्तव्येनप्राकं सर्वार्थलोपिना ॥ ९ ॥ आमुक्तमपीदमखिलमविनीतेन सर्वकालं ह्येवार्थभ्रंशं गर्धो धृतराष्ट्रसुत
प्रिय ॥ १० ॥ यो जानन्न पापतामस्य तत्प्रज्ञामनुवर्तसे ॥ स एष काममन्युभ्यां प्रलुब्धो मोहमास्थित ॥ अशक्योद्य त्वया राजन् विनिवर्तयितुं ब
लात् ॥ राष्ट्रप्रदाने मूढस्य बालिशस्य दुरात्मन ॥ दुःसहायस्य लुब्धस्य धृतराष्ट्रोश्नुते फलं कथं हि स्वजने भेदमुपेक्षेत महामति ॥ भिन्नं हि स्व
जनं त्वां प्रप्रसहिष्यंति शत्रव ॥ या हि शक्या महाराज साम्नाभेदेन वा पुन ॥ निस्तर्तुमापदः स्वेषु दंडं कस्तत्र पातयेत् । वैशंपायन उ० ॥ शासनाद्धृ
तराष्ट्रस्य दुर्योधनममर्षणं ॥ मातुश्च वचनात् क्षत्ता सभां प्रावेशयत्पुन ॥ स मातुर्वचनाकांक्षी प्रविवेश पुन सभां ॥ अभिताम्रेक्षणः ॥ क्रोधान्नि
श्वसन्निव पन्नगः ॥ तं प्रविष्टमभिप्रेक्ष्य पुत्रमुत्पथमास्थितं ॥ विगर्हमाणा गांधारी समर्थं वाक्यमब्रवीत् ॥ दुर्योधन निबोधेदं वचनं मम पु
त्रक ॥ हितं ते सानुबंधस्य तथायत्यां सुखोदयं ॥ दुर्योधन यथा हि त्वां पिता भरतसत्तम ॥ भीष्मो द्रोणः कृपः क्षत्ता सुहृदां कुरुत तद्वच ॥ भीष्म
स्य तु पितुश्चैव मम चापचितिः कृता ॥ भवेद्द्रोणमुखानां च सुहृदां शाम्यता त्वया ॥ २१ ॥ न हि राज्यं महाप्राज्ञ स्वेन कामेन शक्यते ॥ अवाप्तुं रक्षि
तुं वापि भोक्तुं भरतसत्तम ॥ २२ ॥ न ह्यवश्येंद्रियो राज्यमश्नीयाद्दीर्घमंतरं ॥ विजितात्मा तु मेधावी स राज्यमभिपालयेत् ॥ सकामक्रोधौ हि पुरुष
मर्थेभ्यो व्यपकर्षत ॥ तौ तु शत्रू विनिर्जित्य राजा विजयते महीं ॥ छ ॥

॥भा॰उ॰॥ रणैर्धर्मंतरांचिरकाले ॥२७॥ महत्पदंमहद्राजविषयालयोरितिविग्रहः अविधेयानिअवशीकृतानि । आपादयितुंहंतुं ॥२८॥ क्षुद्राक्षेण
॥२२०॥

लोकेश्वरमपुत्वंहिमहद्देवंतदुरात्मभिः राज्यंनामेप्सितंस्थानंनशक्यमभिरक्षितुं इंद्रियाणिमहत्प्रेप्सुर्नियच्छेदर्थधर्मयोः इंद्रियैर्नियतैर्बु
द्धिर्वर्द्धतेग्निरिवेंधनैः अविधायानिदिव्यानिआपादयितुमप्यलंअविधेयाश्वादांताहयाः पथिकुसारथिं । यथाविजित्यमात्मानममात्या
न्विजिगीषते ॥ अमित्रान्वाजितामात्यःसोवशःपरिहीयते । आत्मानमेवप्रथमंदेशरूपेणयोजयेत् । ततोमात्यानमित्रांश्चनामोघंवि
जिगीषते वश्येंद्रियंजितामात्यः आत्मानमेवप्रथमंदेशरूपेणयोजयेत् । ततोमात्यानमित्रांश्चनामोघंविजिगीषते वश्येंद्रियंजितामात्यं
धृतदंडंविकारिषु परीक्ष्यकारिणंधीरमत्यंतंश्रीर्निषेवते ॥२९॥ क्षुद्राक्षेणेवजालेनझषावपिहितावुभौ कामक्रोधौशरीरस्थौप्रज्ञानंतौ
गोविलुंपतः ॥३०॥ याभ्यांदेहिदेवाःस्वर्गमाप्तिःस्वर्गस्यापिदधुर्मुखं । बिभ्यतोनुपरागस्यकामक्रोधौसुवर्धितौ ॥३१॥ कामक्रोधौचलोभौचदं ॥राम॥
भंदर्पंचभूमिप । सम्यग्विजेतुंयोवेदसमहींजयतेध्रुवं ॥३२॥ सततंनिगृहेसुत्तइंद्रियाणांभवेन्नृपः ईप्सितार्थंचधर्मंचद्विषतांचपराभवं ॥३३॥ ॥२२०॥
सूक्ष्मच्छिद्रेण ॥३०॥ अनुपरागस्यअनुपशान्तःस्यापिकामक्रोधौस्वर्गस्यनिरोधकावित्यर्थः ॥३१॥ अभिज्ञायंतेऽपास्तीत्यर्थः ॥ ३२

अनेन हि हता बाल्ये पूतना शकुनी यथा । गोवर्द्धनो धारितश्च गवार्थे भरतर्षभ ॥ ४५ ॥ अरिष्टो धेनुकश्चैव चाणूरश्च महाबल । अश्वराजश्च निहतः कं
सश्चारिष्टमाचरन् ॥ जरासंधश्च वक्रश्च शिशुपालश्च वीर्यवान् । बाणश्च निहतः संख्ये राजानश्च निषूदिताः । वरुणो निर्जितो राजा पावकश्चामितोज
सा पारिजातं च हरता जितः साक्षाच्छचीपतिः ॥ ४८ ॥ एकार्णवे च स्वपता निहतौ मधुकैटभौ ॥ जन्मांतरमुपागम्य हयग्रीवस्तथा हतः ॥ अयं कर्ता न
क्रियते कारणं चापि पौरुषे । यद्यदिच्छेदयं शौरिस्तत्तत्कुर्यादयत्नतः ॥ ५० ॥ तन्न बुध्यसि गोविंदं घोरविक्रममच्युतं । आशीविषमिव क्रुद्धं तेजोरा
शिमनिंदितं ॥ ५१ ॥ प्रधर्षयन्महाबाहुं कृष्णमक्लिष्टकारिणं । पतंगोग्निरिवासाद्य सामात्यो न भविष्यति ॥ ५२ ॥ इत्युद्योगपर्वणि भगवद्याने॰
वैशंपायन उ॰ । विदुरेणैवमुक्ते तु केशवः शत्रुपूगहा । दुर्योधनं धार्तराष्ट्रमभ्यभाषत वीर्यवान् ॥ १ ॥ एकोहमिति यन्मोहान्मन्यसे मां सुयोध
न । परिभूय सुदुर्बुद्धे ग्रहीतुं मां चिकीर्षसि ॥ २ ॥ इहैव पांडवाः सर्वे तथैवांधकवृष्णयः । इहादित्याश्च रुद्राश्च महर्षिभिः ॥ ३ ॥ एवमुक्त्वा महा
बाहुः केशवः परवीरहा । तस्यापि स्मयतः शौरेर्विद्युद्रूपा महात्मनः ॥ अंगुष्टमात्रास्त्रिदशा मुमुचुः पावकार्चिषः । अस्य ब्रह्मा ललाटस्थो रु
द्रो वक्षसि चाभवत् । लोकपाला भुजेष्वासन्नग्निरास्यादजायत ॥ आदित्याश्चैव साध्याश्च वसवोथाश्विनावपि ॥ ४ ॥ मरुतश्च महेंद्रेण विश्वे
देवास्तथैव च । बभूवुश्चैव रूपाणि यक्षगंधर्वरक्षसां । प्रादुरास्तां तथा दोर्भ्यां संकर्षणधनंजयौ । दक्षिणोथार्जुनो धन्वी हली रामश्च सव्यतः ।

॥भा॰उ॰ भीमो युधिष्ठिरश्चैव माद्रीपुत्रौ च पृष्ठतः ॥ अंधकावृष्णयश्चैव प्रद्युम्नप्रमुखास्ततः अग्रेबभूवुः कृष्णस्य समुद्यतमहायुधा। शंखचक्रगदाशार्ङ्ग
॥२२१॥ शक्तिलांगूलनंदकाः ॥ अदृश्यंतोद्यतानेव सर्वप्रहरणानि च नानाबाहुषु कृष्णस्य दीप्यमानानि सर्वशः ॥ नेत्राभ्यां नासिकायाश्च श्रोत्राभ्यां च स
मंततः ॥ प्रादुरासन्महारौद्राः सधूमाः पावकार्चिषः ॥ २४ रोमकूपेषु च तथा सूर्यस्येव मरीचयः तंदृष्ट्वा घोरमात्मानं केशवस्य महात्मनः ॥ न्यमीलयं
त नेत्राणि राजानस्त्रस्तचेतसः ॥ ऋते द्रोणं च भीष्मं च विदुरं च महामतिं ॥ संजयं च महाभागमृषींश्चैव तपोधनान् ॥ प्रादात्तेषां च भगवान् दिव्यं चक्षु
र्जनार्दनः ॥ तं दृष्ट्वा महदाश्चर्यं माधवस्य सभातले ॥ देवदुंदुभयो नेदुः पुष्पवर्षं पपात च २६ चचाल च मही सर्वा सागरश्चापि चक्षुभुः ॥ विस्मयं परमं
जग्मुः ॥ पार्थिवा भरतर्षभ ॥ २७ ततः स पुरुषव्याघ्रः संजहार वपुः स्वकं ॥ तं दिव्यमद्भुतं चित्रमृद्धिमंतमरिंदमः ॥ २८ ॥ ततः ॥ सात्यकिमादाय पाणौ
हार्दिक्यमेव च ॥ ऋषिभिस्तैरनुज्ञातो निर्ययौ मधुसूदनः २९ ॥ ऋषयोंतर्हिता जग्मुस्ततस्ते नारदादयः ॥ तस्मिन् कोलाहले वृत्ते तदद्भुतमिवाभव
त ॥ ३० ॥ तं प्रास्थितमभिप्रेक्ष्य कौरवाः सहराजभिः ॥ अनुजग्मुर्नरव्याघ्रं देवा इव शतक्रतुं ॥ ३१ ॥ अचिंतयन्नमेयात्मा सर्वं तद्राजमंडलं ॥ निश्चक्राम ॥राम॥
ततः शौरिः सधूम इव पावकः ॥ ३२ ततो रथेन शुभ्रेण महता किंकिणीकिना ॥ हेमजालविचित्रेण लघुना मेघनादिना ॥ सूपस्करेण शुभ्रेण ॥२२१॥
वैयाघ्रेण वरूथिना ॥ शैब्यसुग्रीवयुक्तेन प्रत्यदृश्यत दारुकः ॥ ३३ ॥ तथैव रथमास्थाय कृतवर्मा महारथः वृष्णीनां संमतो वीरो हार्दिक्यः प्र
त्यदृश्यत ॥ ३४ ॥ ततः

उपस्थितस्यं कौरिं अपास्य पूतमरिंदमं धृतराष्ट्रो महाराज पुनरेवाभ्यभाषत ॥ २४ ॥ यावद्बलं मे पुत्रस्य पश्यस्येतज्जनार्दन । प्रत्यक्षं तेन ते किंचित्य
रोक्षं शत्रुसूदन ॥ २५ ॥ कुरूणां शममिच्छंतं यतमानं च केशव । विदित्वैतां मयावस्थां मे नाभिशंकितुमर्हसि । न मे पापोऽस्त्यभिप्रायः पांडवान्प्रति के
शव । ज्ञातमेव हि ते वाक्यं यन्मयोक्तं ॥ सुयोधनः ॥ २६ ॥ जानंति कुरवः सर्वे राजानश्चैव पार्थिवाः । शमे प्रयतमानं मां सर्वयत्नेन माधव ॥ २७ ॥ वैशंपाय
न उ । ततोऽब्रवीन्महाबाहुर्धृतराष्ट्रं जनेश्वरं । द्रोणं पितामहं भीष्मं क्षत्तारं बाह्लिकं कृपं ॥ प्रत्यक्षमेतद्भवतां यद्वृत्तं कुरुसंसदि । यथावशिष्टश्च मंदो
रोषादपसमुत्थितः । वदत्यनीशमात्मानं धृतराष्ट्रो महीपतिः ॥ आपृच्छे भवतः सर्वान्गमिष्यामि युधिष्ठिरं ॥ आमंत्र्य प्रस्थितं शौरिं रथस्थं पुरुष
र्षभं ॥ अनुजग्मुर्महेष्वासाः प्रवीरा भरतर्षभा ॥ भीष्मो द्रोणः कृपः ॥ कर्णो धृतराष्ट्रोऽथ बाह्लिकः ॥ अश्वत्थामा विकर्णश्च युयुत्सुश्च महारथः । ततो
रथेन शुभ्रेण महता किंकिणीकिना ॥ कुरूणां पश्यतां द्रष्टुं स्वसारं स्वपितुर्ययौ ॥ २८ ॥ इत्युद्योगे भगवद्याने ॥ ॥ वैशंपायन उ ॥ प्रविश्याथ
गृहं तस्याश्चरणावभिवाद्य च ॥ आचख्यौ तत्समासेन यद्वृत्तं कुरुसंसदि ॥ १ ॥ वासुदेव उ ॥ उक्तं बहुविधं वाक्यं ग्रहणीयं सहेतुकं । ऋषिभि
श्च मया चोक्तं न च तद्गृहीतवान् ॥ २ ॥ कालपक्वमिदं सर्वं दुर्योधनवशानुगं ॥ आपृच्छे भवतीं शीघ्रं प्रयास्ये पांडवान्प्रति ॥ ३ ॥ किं वा
च्यं पांडवेयास्ते भवत्या वचनान्मया ॥ तद्ब्रूहि त्वं महाप्राज्ञे शुश्रूषे वचनं तव ॥ ४ ॥

॥भा॰उ॰ भूयान्पृथिवीपालनजो धर्मः ।५ श्रोत्रियस्य वेदाध्यायिनः सैः मंदस्यार्थज्ञानशून्यस्य अनुवाके नात्यंतं वेदाक्षरावृत्त्या हतानष्टा ।६ दंडनीतिःस्वा
॥२२२॥

कुंत्युवाच ।ब्रूयाःकेशवराजानंधर्मात्मानंयुधिष्ठिरं भूयांस्तेहीयतेधर्मोमापुत्रकवृथाकृथाः ।५ श्रोत्रियस्येवतेराजन्मंदकस्याविपश्चितः ।अ
नुवाकहतावुद्धिर्धर्ममेवैकमीक्षते ।६ ।अंगावेक्षस्वधर्मंत्वंयथासृष्टःस्वयंभुवा ।उरस्तःक्षत्रियःसृष्टोबाहुवीर्योपजीविता ।७ ।क्रूरायकर्मणेनि
त्यंप्रजानांपरिपालने ।शृणुचात्रोपमामेकांयावृद्धेभ्यःश्रुतामया ।८ ।मुचुकुंदस्यराजर्षेरददात्पृथिवीमिमां ।पुरावैश्रवणःप्रीतोनचासौतद्गृ
हीतवान् ।९ ।बाहुवीर्यार्जितंराज्यमश्नीयामितिकामये ।ततोवैश्रवणःप्रीतोविस्मितःसमपद्यत ।१० ।मुचुकुंदस्ततोराजासोन्वशासद्वसुं
धरां ।बाहुवीर्यार्जितांसम्यक्क्षत्रधर्ममनुष्ठितः ।११ ।यंहिधर्मंचरंतीहप्रजाराज्ञासुरक्षिताः ।चतुर्थंतस्यधर्मस्यराजाभारतविंदति ।१२
राजाचरतिचेद्धर्मंदेवत्वायैवकल्पते ।सचेदधर्मंचरतिनरकायैवगच्छति ।१३ ।दंडनीतिःस्वधर्मेणचातुर्वर्ण्यंनियच्छति ।प्रयुक्ता
स्वामिनासम्यगधर्मेभ्योनियच्छति ।१४ ।दंडनीत्यांयदाराजासम्यक्कार्त्स्न्येनवर्तते ।तदाकृतयुगंनामकालश्रेष्ठःप्रवर्तते ।१५॥ ॥ ॥उ॰भा॥
॥२२२॥

तिःस्वामिनाप्रयुक्तेतिसंवंधःधर्मेभ्यःअधर्मान्नियच्छतिनिर्वधंकरोतिदंडनीतिरेव ।१३ ।राजाधर्माधर्मवासवर्तयन् कृतत्रेतादीन्कालस्यलक्षकादणं
एवंचसर्वस्मिन्नपिकालेधर्म्यादितास्तस्माद्युगचतुष्टयमस्तीतिभावः ।१४॥१५॥

जगतः दोषेणसचराजादृश्यते ॥२०॥ फलंप्राप्तवानस्तीतिशेषाः ॥२२॥ नित्यमिति मानुषाश्चदेवताश्चसम्यताराधिताःसत्यः इहलोके आपुरा
दीनिपरलोकसाधनानिस्वधादिनिसत्कर्माणिचदधुः ॥२३॥ एततमहाकंचधर्मधर्मयुक्तं अधर्मंचाजन्मनेवेवस्वभावतएव अजापत्याः

कालेयाक्षरणराज्ञोराजावाकालकारणं ॥ इतितेसंशयोयाभूद्राजाकाल्यस्यकारणं ॥२४॥ राजाकृतयुगंस्रष्टात्रेतायाद्वापरस्यच यु
गस्यचचतुर्थस्यराजाभवतिकारणं ॥ कृतस्यकारणाद्राजास्वर्गमत्यंतमश्नुते ॥२५॥ प्रवर्तनान्नद्वापरस्ययथाभागमुपाश्नुते ॥ कलिप्रवर्तनाद्राज
पापमत्यंतमाश्नुते ततोवसतिदुष्कर्मानरके शाश्वतीः समाः राजदोषेणहि जगत्स्पृश्यते जगतःसचः ॥२६॥ राजधर्माणवेक्षस्व पितृपेतासहोचि
तान् नैतद्राजार्षिवृत्तंहि यत्रत्वंस्थातुमिच्छसि ॥२०॥ नहिवैक्लव्यसंसृष्टमानृशंस्येव्यवस्थितः प्रजापालनसंभूतंफलंकिंचिन्नलभ्यते ॥२१॥
यान्ति पापान्यशेषतः ५३ षड्भिःसहितां पुण्यां पुत्रमध्यापयच्छुकं मातापितृसहस्राणि पुत्रदारशतानि च संसारेष्वनुभूतानि यान्ति यास्य
न्ति चापरे ५४ हर्षस्थानसहस्राणि भयस्थानशतानि च दिवसे दिवसे मूढमाविशन्ति न पण्डितं ५५ ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणो
ति मे धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ५६ न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः नित्यो धर्मः सुखदुःखे त्व
नित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ५७ इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् स भारतफलं प्राप्य परं ब्रह्माधिगच्छ
ति ५८ यथा समुद्रो भगवान् यथा हि हिमवान् गिरिः ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ५९ इमां भारतमाख्यानं यः पठेत्सुसमाहितः सग
च्छेत्परमां सिद्धिमिति मे नास्ति संशयः द्वैपायनोष्ठपुटनिःसृतमप्रमेयं पुण्यं पवित्रमथ पापहरं शिवं च यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजले
रभिषेचनेन ६१॥ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां स्वर्गारोहणपर्वणि समाप्तम्॥ व भारतस्याध्ययनात्परमिकां सिद्धिं गच्छेदिति ... ान्वयः
यासेनाधीतं भारतमध्येतव्यमिति सर्वैः ५३ संध्यायां भारतं यां ...नीयमित्युक्तं तत्र पाठनयोग्यं भारतसारसंग्राहं चतुःश्लोकीं च प्रमाहरन्निति ६१ इति

भा॰ भी॰ टी॰
२८१

॥कर्ण उ०॥ जानाम्येवं महाबाहो सर्वमेतन्न संशयः ॥ यथा वदसि मे भीष्म कौंतेयं पैरमादिश अवकीर्णास्त्वहं कौंतेयस्त्वहं कुंत्वा सूतेन च विवर्धितः
भुक्त्वा दुर्योधनैश्वर्यं न मिथ्या कर्तुमिच्छति ॥२४॥ वसुदेवसुतो यद्वत्पांडवाय दृढव्रतः ॥ वसु चैव शरीरं च पुत्रा दारास्तथा यशः ॥२५॥ सर्वं दुर्योधन
स्यार्थे त्यक्तं मे भूरिदक्षिण ॥ मा चैतद्व्याधिमरणं क्षत्रं स्यादिति कौरव ॥२६॥ कोपिताः पांडवा नित्यं समाश्रित्य सुयोधनं ॥ अवश्यभावी ह्यर्थो
यं यो न शक्यो निवर्तितुं ॥२७॥ दैवं पुरुषकारेण को निवर्तितुमुत्सहेत ॥ पृथिवीक्षयशंसीनि निमित्तानि पितामह ॥२८॥ भवद्भिरुपलब्धानि कथितानि च सं
सदि ॥ पांडवा वासुदेवश्च विदिता मम सर्वशः ॥२९॥ अजेयाः पुरुषैरन्यैरिति तांस्ते सहामहे ॥ विजयिष्ये रणे पांडूनिति मे निश्चितं मनः ॥३०॥ न च शक्यमव
सृष्टुं वैरमेतत्सुदारुणं ॥ धनंजयेन योत्स्येहं स्वधर्मप्रीतमानसः ॥३१॥ अनुजानीहि मां तात युद्धाय कृतनिश्चयं ॥ अनुज्ञातस्त्वया वीर युध्येयमि
ति मे मतिः ॥३२॥ दुरुक्तं विप्रतीपं वा संरंभाच्चापलात्तथा ॥ यन्मयेह कृतं किंचित्तन्मे त्वं क्षंतुमर्हसि ॥३३॥ ॥भीष्म उवा॥ न चेच्छक्यमवसृष्टुं वैरमेतत्सुदा
रुणं ॥ अनुजानामि कर्ण त्वं युध्यस्व स्वर्गकाम्यया ॥३४॥ निर्मन्युर्गतसंरंभः कृतकर्मा रणे सह ॥ यथाशक्ति यथोत्साहं सतां वृत्तेषु वृत्तवान् ॥३५
अहं त्वामनुजानामि यदिच्छसि तदाप्नुहि ॥ क्षत्रधर्मजितांल्लोकानवाप्स्यसि धनंजयात् ॥ युध्यस्व निरहंकारो बलवीर्यव्यपाश्रयः ॥ धर्माद्धि युद्धाच्छ्रे
योन्यत्क्षत्रियस्य न विद्यते ॥ प्रशमे हि कृतो यत्नः सुमहान्सुचिरं मया ॥ न चैव शकितः कर्तुं कर्ण सत्यं ब्रवीमि ते ॥संजय उ०॥ इत्युक्तवति गांगेय
अभिवाद्यप्रकम्यत राधेयो रथमारुह्य प्रायात्तव सुतं प्रति ॥३६॥ इति श्री महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि सेका
पननामाध्यायः संपूर्णासमाप्तं ॥ शुभं भवतु मंगलं ददातु संवत् ॥ १८ ॥ ८१ ॥ शाके ॥ १७ ॥ ४६ ॥ मिति पौषसुदि ॥ १२ ॥ चंद्रवासरे ॥ ॥ ॥ ॥

राम
२८१

भा० भी०
२८०

ततस्ते पार्थिवासर्वे जग्मुःस्वानालयान्पुनः॥ तूष्णींभूते महाराज भीष्मे शांतनुनंदने॥१॥ श्रुत्वातु निहतं भीष्मं राधेयः पुरुषर्षभः॥ ईषदागतसंत्रास
स्त्वरयाभ्याजगामह॥ २ सददर्शमहात्मानं शरतल्पगतं तदा॥ जन्मशय्यागतंवीरंकार्तिकेयमिवप्रभुं॥ ३॥ निमीलिताक्षंतंवीरंसाश्रुकंठस्तदावृषः॥ भीष्मभी
ष्ममहावाहोप्रत्युवाचमहाद्युतिः॥ ४ राधेयोहंकुरुश्रेष्ठ नित्यमक्षिगतस्तव॥ द्वेष्योहंतत्सर्वत्रेति चैनमुवाचह॥ तच्छ्रुत्वा कुरुवृधोयेबलीसंवृतलोचनः॥ शनै
रुद्वीक्ष्यसस्नेहमिदंवचनमब्रवीत्॥ रहितंधिष्ण्यमालोक्य समुत्सार्यचरक्षिणः॥ पितेवपुत्रंगांगेयःपरिरभ्यैकपाणिना॥ ७॥ एह्येहिमेप्रतीपत्वंस्पर्धसे
त्वंमहास्पृह॥ यदिमांनाभिगच्छेनतते श्रेयोध्रुवंभवेत्॥ कौंतेयस्त्वंनराधेयोनतवाधिरथःपिता॥ श्रुतंहिमहावाहोदर्शितोनारदान्मया॥ कृष्णद्वैपाय
नाच्चपितस्तत्सत्यंनसंशयः॥ नचद्वेषोस्तिमेतातत्वयिसत्यंब्रवीमिते॥ तेजोवधनिमित्तंतुपरुषंत्वांसमब्रुवं॥ अकस्मात्पांडवान्सर्वानवाक्षिपसिसुव्रत
तं [illegible] तेनासिबहुशोराज्ञांचोदितः सूतनंदनः॥ जातोसिधर्मराजस्य ततस्तेयुधिरीदृशी॥ १२॥ नीचाश्रयान्मत्सरेण द्वेषिणागुणिनामपि॥ तेनासिबहुशोरूक्षं
श्रावितः कुरुसंसदि॥ जानामिसमरेवीर्यं शत्रुभिर्दुःसहंभुवि॥ ब्रह्मण्यतांचशौर्यंचदानेचपरमांस्थितिं॥ नत्वयासदृशःकश्चित्पुरुषेष्वमरोपम॥ कुलभेदभयाच्चाहं
सत्पुरुष उक्तवानिष्वस्त्रे भारसंधाने लाघवेस्त्रबलेनच॥ सदृशःफाल्गुनेनासि कृष्णेनचमहात्मनः॥ १६॥ कर्णकाशिपुरंगत्वा त्वयैकेनधनुष्मता॥ कन्यार्थे
कुरुराजस्यराजानोनिर्जितायुधि॥ १७॥ तथाचबलवान्राजाजरासंधोदुरासदः॥ समरेसमरश्लाघीनत्वयासदृशोभवेत्॥ १८॥ ब्रह्मण्यःसत्ययोधीचतेजसा
चबलेदेवगंधर्वसमःसंख्येमनुष्येरधिकोयुधि॥ १९॥ व्यपनीतोधर्ममन्युर्मेयःसांप्रतिपुराकृतः॥ दैवंपुरुषकारेणनशक्यमतिवर्तितुं॥ सोदर्यंपांडवावी
भ्रातरस्तेरिसूदन॥ संगच्छतैर्महावाहोममचेदिच्छसिप्रियं॥ २१ मयाभवतुनिर्वृत्तंवैरमादित्यनंदन॥ पृथिव्यांसर्वराजानोभवंत्वद्यनिरामयाः॥ २२ राम
२८०

नंदीगस्यने वीरं संप्याने कुरुसत्तमा ॥ अभिवाद्योपतस्थुर्वै क्षत्रिया क्षत्रियर्षभं ॥ ३ ॥ कन्याश्चंदनचूर्णैश्च लाजैर्माल्यैश्च सर्वशः ॥ अवाकिरंछांतनवं तत्र गत्वा सह
सहस्रशः ॥ स्त्रियो वृद्धास्तथा बालाः प्रेक्षकाश्च पृथग्जनाः ॥ समभ्ययुः शांतनवं भूतानीव तमोनुदं ॥ तूर्याणि समसंख्यानि तथैव नटनर्तकाः ॥ ५ ॥
पाः ॥ शिल्पिनश्च तथाजग्मुः कुरुवृद्धं पितामहं ॥ ५ उपारम्य च युद्धेभ्यः सन्नाहान्विप्रमुच्यते ॥ आयुधानि च निक्षिप्य सहिताः कुरुपांडवाः ॥ अन्वासत दुराध
र्षं देवव्रतमरिंदमं ॥ अन्योन्यं प्रीतिमंतस्ते यथापूर्वं यथावयः ॥ ७ ॥ सा पार्थिवशताकीर्णा समितिर्भीष्मशोभिता ॥ शुशुभे भारती दीप्ता दिवीवादित्यमंडलं ॥ वि
लं ॥ विबभौ च नृपाणां सा गंगासुतमुपासतां ॥ देवानामुपसंवेशं पितामहमुपासतां ॥ भीष्मस्तां वेदनां धैर्यान्निगृह्य भरतर्षभ ॥ अभितप्तः शरैश्चैव नः
निःश्वसन्नुरगो यथा ॥ शराभितप्तकायोपि शस्त्रसंतापमूर्छितः ॥ पानीयमभितिसंप्रेक्ष्य राज्ञस्तान्प्रत्यभाषत ॥ ११ ॥ ततस्ते क्षत्रिया राजन्समाजह्रुः समंततः
भक्ष्यानुच्चावचान्राजन्वारिकुंभांश्च शीतलान् ॥ उपानीतं तु पानीयं दृष्ट्वा शांतनवोब्रवीत् ॥ नाद्य तात मया शक्या भोगाः केचन मानुषाः ॥ अपक्रांतो मनुष्येभ्य
शरशय्यागतोस्म्यहं ॥ प्रतीक्षमाणस्तिष्ठामि निवृत्तं शशिसूर्ययोः ॥ एवमुक्त्वा शांतनवो निंदन्वाक्येन पार्थिवान् ॥ अर्जुनं द्रष्टुमिच्छामीत्युवाच भरत
॥ १५ अथोपेत्य महाबाहुरभिवाद्य पितामहं ॥ अतिष्ठत्प्रांजलिः प्रह्वः ॥ किं करोमीति चाब्रवीत् ॥ १६ ॥ तं दृष्ट्वा पांडवं राजन्नभिवाद्याग्रतः स्थितं ॥ अभ्यभाषत
धर्मात्मा भीष्मः प्रीतो धनंजयं ॥ १७ ॥ दह्यतीदं शरीरं मे संवृतस्य तवेषुभिः ॥ मर्माणि परिदूयंते मुखं च परिशुष्यति ॥ १८ ॥ वेदनार्तः शरीरस्य प्रयच्छापो ममार्जुन
त्वं हि शक्तो महेष्वासो दातुमापो यथाविधि ॥ १९ ॥ अर्जुनस्तु तथेत्युक्त्वा रथमारुह्य वीर्यवान् ॥ अधिज्यं बलवत्कृत्वा गांडीवं व्याक्षिपद्धनुः ॥ २० ॥ ॥

सर्वोपकारशौर्येद्वैः कुशले साधुशिक्षिताः ॥ तान्हत्वा जाह्नवीपुत्रः सेवाचतनयं तव ॥ धनं दत्त्वा विसृज्यंतां प्रजयित्वा किंसकाः ॥ एवं गतेमयेदानीवे ॥
पैः कार्यमिहास्त्यकौ ॥ ५७ ॥ सभ्यधर्मेनपप्राप्तं हिंसायामिमरर्तधम ॥ नैषधर्मोमहीपालः शास्त्रसगतस्यमे ॥ ५८ ॥ एवमिवसौरम्भाहदृग्ध्वा स्मिनाधिप
त्वावृत्तं तस्यपुत्रोहृष्यौ धनंस्तव ॥ वैधान विसर्जोमासस्य जयित्वायथाहंता ॥ ततसे विस्मयं तुम्र नीता जनपदे प्रवरा ॥ ६० ॥ स्थितिधर्मपरहृसा भीष्मस्य
[illegible] ॥ अपधानंतलोरत्वायितुस्तेम्नुजेश्वरा ॥ ६१ ॥ सहिता पांडवाः सर्वे कुरवश्च महारथा अग्रम्यमन्माननशयानेशयनेशुभे ॥ ६२ ॥ ते भिवाधमहात्मा
[illegible] भ्रासत्तां भीष्मस्य सर्वदेश्वसमेततः ॥ ६३ ॥ वीरास्वस्तिविरम्भेव ध्यावंतमासमापुता ॥ निविश्यतान्पो ज्वांश्चैव प्रीयमानानस्म
तास्यान् ॥ भी[illegible] [illegible] महावलः ॥ ६४ ॥ उवाच माधवः कृष्णे धर्मपुत्रं युधिष्ठिरं ॥ दिष्ट्या जयसि कौरव्य दिष्ट्या भीष्मोनिपातितः
६६ ॥ [illegible] महारथः ॥ [illegible] सर्वसास्त्रस्य पारगः ॥ त्वं तु नर्हिं संप्राप्य द्योघोरेण चक्षुषा ॥ एवमुक्तो धर्म
राजस्तु [illegible] ॥ ६८ ॥ [illegible] द्विजपः क्रोधान्[illegible] त्वं हि नः शरणं कृष्ण भक्तानाममयंकरः ॥ ६९ ॥ अनाश्चर्यो जयस्ते वा येषां त्वम्
सि केशवः रक्षिता समरे नित्यं त्वामिहतेरत्नतः ॥ ७० ॥ सर्वथा त्वां समासाद्य नाश्चर्यमिति मे मतः ॥ एवमुक्तः प्रत्युवाच स्मयमानो जनार्दनः ॥ तथैवैतन्नयुक्त ॥राम॥
वचने पार्थिवोत्तमः ॥ ७२ ॥ इति श्री भीष्मपर्वणि संजयवं [illegible] ॥ याज्ञ [illegible] ॥ ॥२७८॥

धनंजयमहाबाहो शिरो मेतालंबते दीयतामुपधानं वै यद्युक्तमिह मन्यते ३८ संजय उ० समारोप्य महच्चापमभिवाद्य पितामहं नेत्राभ्या
मश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ३९ आज्ञापय कुरुश्रेष्ठ सर्वशस्त्रभृतां वरः प्रेष्योहं दुर्धर्ष किं करोमि पितामहः ४० तमब्रवीच्छांतनवो
शिरो मे तात लंबते उपधानं कुरुश्रेष्ठ फाल्गुनस्य विधत्स्व मे शयनस्यानुरूपं वै शीघ्रं वीर प्रयच्छ मे त्वं हि पार्थः समर्थो वै श्रेयन्नतपर्वणा अनु
क्षत्रधर्मस्य वेत्तासि बुद्धिसत्वगुणान्वितः फाल्गुनोपि तथेत्युक्त्वा व्यवसायमरोचयत् प्रगृह्यानुमंत्र्य गांडीवं शरान्सन्नतपर्वणा अनुमा
न्य महात्मानं भरतानां महारथं ४४ त्रिभिस्तीक्ष्णैर्महावेगैरनुगृह्णाच्छिरः शरैः अभिप्राये तु विदिते धर्मात्मा सव्यसाचिना अतुष्यद्भ
रतश्रेष्ठो भीष्मो धर्मार्थतत्ववित् उपधानेन दत्तेन प्रत्यनंदद्धनंजयं ४६ प्राह सर्वान्समुद्दीक्ष्य भरतान्भारतं प्रति युधां श्रेष्ठं सुहृदां प्रीति
वर्धनं शयनस्यानुरूपं मे पांडवोपहितं त्वया यद्यन्यथा प्रपद्येथाः शपेयं त्वामहं रुषा ४८ एवमेव महाबाहो धर्मेषु परितिष्ठता
स्वप्तव्यं क्षत्रियेण राजन् शरतल्पगतेन वै ४९ एवमुक्त्वा तु बीभत्सुं सर्वांस्तानब्रवीद्वचः राजानो राजपुत्रांश्च पांडवेनाभितिष्ठते च पश्यध्वं तिमान्नृपाः शिर
वै श्रवणा क्षौतं यद्यंतं तद्दिवाकरः ५२ नूनं संप्राप्य युक्ते नरश्चेनोत्तमे स्वर्ग विमोक्षस्य समाप्त सुहृदः सुप्रियानि वः ५३ परिवा
रयध्वमत्र मम मामसद्भृतेन्नृपाः शिरयो विवस्वंतो मेवरूपं प्रियाप्रातः ५४ उपारमध्वं संग्रामाद्वैरमुत्सृज्य पार्थिवाः संजय उवाच उपाति
ष्ठन्नथो वैद्याः शल्योद्धरणकोविदाः ॥

किंच ज्योतिषामिति ज्योतिषां चंद्रादित्यादीनां अपि तत् ज्योतिः प्रकाशकं तत् ॥ येन सूर्यस्तपति तेजसेद्धः न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्यु
तो भांति कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति इत्यादिश्रुतेः ॥ अत एव तमसो ज्ञानात् परं तेनासंस्पृष्टमुच्यते ॥ आदित्यवर्णं तमसः पर
स्तादित्यादिश्रुतिभिः ज्ञानं च तदेव बुद्धिवृत्त्यावकाशमभिव्यक्तं ॥ तदेव रूपाद्याकारेण ज्ञेयं च ज्ञानेन गम्यं च अमानित्वमदंभित्वमित्यादि ल
क्षणेनोक्तेन ज्ञानसाधनेन प्राप्यमित्यर्थः ज्ञानगम्यं विशिनष्टि ॥ सर्वस्य प्राणिमात्रस्य हृदि विष्ठितं विशे ॥ षेणाप्रच्युतस्वरूपेण स्थितं

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठि
तं ॥१८॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः मद्भक्त एतद्विज्ञाय मद्भावायोपपद्य
ते ॥१९॥

राम

यथास्थितं क्षेत्रमिति पाठे अधिष्ठाय स्थितमित्यर्थः ॥ उक्तं क्षेत्रादिकमेतत्फलसहितमुपसंहरति ॥ इतीति इत्येवं क्षेत्रं महाभूतादि धृत्यंतं तथा ज्ञा १२५
नं च अमानित्वादि तत्त्वज्ञानार्थदर्शनांतं ॥ ज्ञेयं चानादिमत्परं ब्रह्मेत्यादि विष्टमित्यंतं च सिद्धादिभिर्विस्तरेणोक्तं सर्वं मयि समासं संक्षेपेणोक्तं ए
तन्मद्भक्तो ज्ञात्वा विवेकेनावगम्य मद्भावाय मद्रूपत्वायोपपद्यते योग्यो भवति ॥१९॥ श्रीरामाय नमो नमः ॥ राम राम

किं च सर्वेंद्रियेति सर्वेषां चक्षुरादीनां इंद्रियाणां गुणेषु रूपाद्याकारासु वृत्तिषु तदाकारेणाभासत इति तथा सर्वाणींद्रियाणि गुणांश्च तत्तद्विष
याकारेणाभासयतीति वा सर्वेंद्रियविवर्जितं च ॥ तथा च श्रुतिः ॥ अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः इत्यादि ॥ असक्तं संगशून्यं तथा
पि सर्वं बिभर्तीति सर्वस्याधारभूतं तदेव निर्गुणं सत्त्वादिगुणरहितं ॥ गुणानां सत्त्वादीनां भोक्तृ पालकं ॥ १४ ॥ किं च बहिरिति भूतानां चराचराणां स्वकार्याणां बा
हिरंतश्च तदेव ॥ सुवर्णमिव कटककुंडलादीनां ॥ अचरं स्थावरं जंगमं भूतजातं तदेव ॥ कारणात्मकत्वात्कार्यस्य एवमपि सूक्ष्मत्वात्तदवि

॥ सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं ॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १५ ॥ बहिरंतश्च भूतानामचरं चरमेव च ॥
॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥ अविभक्तं च भूतेषु विभक्तमिव च स्थितं ॥ भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
॥ १६ ॥

ज्ञेयं ॥ अविज्ञेयं अतो दूरस्थं तदिति स्पष्टज्ञानाविषयत्वान्न भवति ॥ अत एव अज्ञविदुषां योजनलक्षांतरितमिव दूरस्थं च ॥ सविकारायां प्रकृतेः परत्वात् विदुषां प्र
त्यगात्मकत्वादंतिके च तदेव ॥ तथा च मंत्रः ॥ तदेजति तन्नैजति तद्दूरे तद्वंतिके ॥ तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति ए
जति चलति नैजति न चलति ॥ तद्वु अंतिक इत्यर्थः ॥ किं चाविभक्तमिति ॥ भूतेषु स्थावरजंगमात्मकेषु अविभक्तं कारणात्मना अभिन्नं कार्यात्म
ना विभक्तं भिन्नमिव च स्थितं च तदेव ज्ञेयं ब्रह्म भूतानां भर्तृ पोषकं स्थितिकाले प्रलयकाले च ग्रसिष्णु ग्रसनशीलं सृष्टिकाले च प्रभविष्णु नानाकार्यात्म

ऽभिः साधनैर्यत् ज्ञेयं तदाह ज्ञेयमिति ॥ यत्तज्ज्ञेयं तत्प्रवक्ष्यामि ॥ श्रोतृरुच्युत्पादनाय तत्फलं दर्शयति ॥ यद्ज्ञात्वा अमृतं मोक्षं प्राप्नोति ॥ किं तत् अ-
नादिमत् आदिमत् न भवतीत्यनादिमत् परं निरतिशयं ब्रह्म ॥ अनादीत्येतावतैव बहुव्रीहिणा अनादित्वे सिद्धे पि पुनर्मतुपः प्रयोगः छांदसः ॥ यद्वा अ-
नादिमत्परमिति च पदद्वयं ॥ मम विष्णोः परं निर्विशेषं रूपं ब्रह्मेत्यर्थः ॥ तदेवाह न सत्तन्नासदुच्यते विधिमुखेन प्रमाणस्य विषयः सदित्युच्यते ॥ निषेध-

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १३ ॥ सर्व-
तःपाणिपादं तत्सर्वतोक्षिशिरोमुखं ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १४ ॥

स्य विषयस्तु असदित्युच्यते इदं तु तदुभयविलक्षणमविषयत्वादित्यर्थः ॥ १३ ॥ नन्वेवं सदसद्याः साक्षिलक्षणत्वे सति सर्वथा निर्विशेषत्वे इदं सर्वमित्यादि-
श्रुतिसर्ववित्प्रत्यक्षपरस्पराक्षि विविधैवक्ष्यमाणस्वाभावप्रसंगान्न लक्षिया चेत्सादि श्रुतिप्रसिद्धया औपाधिकरूपसर्वात्मतां तस्य दर्शयन्नाह सर्वत इति पंचभिः
सर्वतः पाणयः पादाश्च यस्य तत् सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य तत् ॥ सर्वतः श्रुतिमान् श्रवणेन्द्रिययुक्तं सत् लोके सर्वमावृत्य व्याप्य तिष्ठति सर्वप्राणिप्रवृत्तिभिः

[illegible]

किंच इंद्रियार्थेष्विति ॥ जन्मादिषु दुःखदोषानुदर्शनं पुनः पुनरालोचनं दुःखरूपस्य दोषस्यानुदर्शनमिति वा स्पष्टमन्यत् ॥ ९ ॥ किंच असक्ति
रिति असक्तिः पुत्रादिपदार्थेषु प्रीतित्यागः अनभिष्वंगः पुत्रादीनां सुखदुःखे चाहमेव सुखी दुःखी चेत्यध्यासतेरेकाभावः इष्टानिष्टयोरुपपत्तिषु
प्राप्तिषु नित्यं सर्वदा समचित्तत्वं ॥१०॥ किंच मयि चेति ॥ मयि परमेश्वरे अनन्ययोगेन सर्वात्मदृष्ट्या अव्यभिचारिणी एकांतभक्तिः ॥ विविक्तः शुद्धः ॥ चित्त
प्रकाशकः स देशस्तं सेवितुं शीलं यस्य तस्य भावस्तत्त्वं ॥ प्राकृतानां जनानां संसदि सभायां अरतिः रत्यभावः ॥ ११ ॥ किंच अध्यात्मेति ॥ आत्मानमधिकृत्य वर्तमा

इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ॥ ९ ॥ असक्तिरनभिष्वंगः पुत्रदा
रगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ १० ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विवि
क्तदेशसेवित्वमरतिर्जनसंसदि ११ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा ॥ १२ ॥

नं ज्ञानमध्यात्मज्ञानं तस्मिन्नित्यत्वं नित्यभावः ॥ तत्त्वंपदार्थशुद्धिनिष्ठत्वमित्यर्थः ॥ तत्त्वंपदार्थशुद्धिनिष्ठत्वमित्यर्थः ॥ तत्त्वज्ञानस्यार्थः प्रयोजनं मो
क्षः तस्य दर्शनं मोक्षस्य सर्वोत्कृष्टतालोचनमित्यर्थः ॥ एतत् अमानित्वमदंभित्वमित्यादि विंशतिसंख्याकं यदुक्तं मे तत् ज्ञानमिति प्रोक्तं ज्ञानसाध
नत्वात् अतोन्यथा अस्माद्विपरीतं मानित्वादि यदेतत् तदज्ञानमिति प्रोक्तं वशिष्ठादिभिः ज्ञानविरोधित्वात् अतः सर्वथा त्याज्यमित्यर्थः ॥ १२ ॥

भक्तानामहंउद्धर्त्तासंसारादित्यवादियत॥ त्रयोदशेथतत्सिद्धैतत्वज्ञानमुदीर्यते॥ तेषामहंसमुद्धर्त्तामृत्युसंसारसागरात्॥ भवामीतिपूर्वंप्रतिज्ञातंनचा
त्मज्ञानंविनासंसारादुद्धरणंसंभवतीतितत्वज्ञानोपदेशार्थंप्रकृतिपुरुषविवेकाध्यायआरभ्यते॥ तत्रयत्सप्तमेअध्यायेअपरापरेचद्वेप्रकृतिद्वयमु
क्तं। तयोरविवेकाज्जीवभावमापन्नस्यचिदंशस्यायंसंसारः॥ यावञ्चजीवोपभोगार्थमीश्वरःसृष्ट्यादिषुप्रवर्त्ततेतदेवप्रकृतिद्वयंक्षेत्रक्षेत्रज्ञशब्दवाच्यं
परस्परविविक्तंतत्वतोनिरूपयिष्यन्॥ श्रीभगवान्॥ इदमिति॥ इदंभोगायतनंशरीरंक्षेत्रमित्यभिधीयतेसंसारस्यप्ररोहभूमित्वात्॥ एतद्योवेत्तिअहं

॥अर्जुनउ॥ प्रकृतिंपुरुषंचैवक्षेत्रंक्षेत्रज्ञमेवच॥ एतद्वेदितुमिच्छामिज्ञानंज्ञेयंचकेशव॥ १॥ श्रीभगवानुउ॥ इदंशरीरंकौंतेयक्षेत्रमित्यभिधीयते॥ एत
द्योवेत्तितंप्राहुःक्षेत्रज्ञमितितद्विदः॥ २ क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारत॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तज्ज्ञानंमतंमम॥ ३॥ श्रीरामायनम

ममेतिमन्यतेतंक्षेत्रज्ञंप्राहुःसाक्षीबलवत्तत्फलभोक्तृत्वात्॥ तद्विदःक्षेत्रक्षेत्रज्ञयोर्विवेकज्ञाः॥ २॥ तदेवंसंसारिस्वरूपमुक्त्वा॥ इदानींतस्यैवपारमार्थिकम
संसारिस्वरूपमाहक्षेत्रज्ञमिति॥ तंचक्षेत्रज्ञंसंसारिणंवस्तुतःसर्वक्षेत्रेष्वनुगतंमामेवविद्धितत्वमसीतिश्रुत्यालक्षितेनचिदंशेनमद्रूपस्योक्तत्वा
त्॥ आदरार्थमेवतत्ज्ञानंमेति॥ क्षेत्रक्षेत्रज्ञयोर्येयंविवेकस्तद्येनज्ञानंतदेवमोक्षहेतुत्वान्मज्ञानंमतं॥ अन्यत्तुअध्यापांडित्यंबंधहेतुत्वादित्य
र्थः॥ तदुक्तं॥ तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये॥ आयासायापरंकर्मविद्यान्याशिल्पनैपुणमिति॥ ३॥ ॥ ॥ ॥

विंच। योनेति। प्रियंप्राप्ययोनहृष्यति। अप्रियंप्राप्ययोनद्वेष्टि इष्टस्यार्थेनाशेसतिनशोचति। अप्राप्तमर्थंनकांक्षति। शुभाशुभेपुण्यपापेपरित्यक्तुंशीलंय
स्यएवंभूतोभक्तायोभक्तिमान्समेप्रियः। १७ किंचसमइति। शत्रौचमित्रेचसमःएकरूपः मानापमानयोरपितथासमएवहर्षविषादशून्यइत्यर्थः। शी
तोष्णयोःसुखदुःखयोश्चसमःसंगविवर्जितः। कश्चिदप्यनाशक्तः। १८ तुल्येति। तुल्यानिंदास्तुतीयस्यमौनीसमतयाकुघेनकेनचिद्यथालब्धेनसंतु

योनहृष्यतिनद्वेष्टिनशोचतिनकांक्षति। शुभाशुभपरित्यागीभक्तिमान्यःसमेप्रियः। १७ समःशत्रौचमित्रेचतथामा
नापमानयोः। शीतोष्णसुखदुःखेषुसमःसंगविवर्जितः। १८ तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेनचित। अनि
केतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः। १९ येतुधर्म्यामृतमिदंयथोक्तंपर्युपासते। श्रद्दधानामत्परमाभक्तास्तेती
वमेप्रियाः। २०। इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां०द्वादशोध्यायः। १२ ॐनमोभगवतेवासुदेवायनमः॥

ष्टः। अनिकेतोनियतवासशून्यः। स्थिरमतिर्व्यवसितचित्तः एवंभूतोभक्तिमानमेप्रियोनरः। १९। उक्तंधर्मंज्ञानमुपसंहरतियेत्विति। यथोक्तप्रकारंधर्माद
नाम्रुतंअमृतत्वसाधनत्वात्। धर्म्यामृतमिदंमितिकेचित्पठंतितद्येउपासतेअनुतिष्ठंति। श्रद्दधानाःसंतोमत्परमाःसंतोमद्भक्तास्तेतीवमेप्रियाःइति
दुःखमव्यक्तवर्त्मेनद्दृष्टहविन्नमतोबुध। सद्यःसत्पदांभोजभक्तिसम्यक्समाभजेत। इतिसुबोधन्यांद्वादः। १२॥

टी.॥

एवंभूतस्य भक्तिस्वरूपस्य क्षिप्रमेव परमेश्वरप्रसादहेतुभूतधर्मानाह अद्वेष्टेत्यष्टभिः॥ सर्वभूतानां यथायथं मद्वेष्टा मैत्रः करुणश्च॥ उत्तमे द्वेषशून्यः समेषु मित्रतया वर्तमानः हीनेषु कृपालुरित्यर्थः॥ निर्ममो निरहंकारश्च कृपालुत्वादेवान्ये॥ सहसमे सुखदुःखे यस्य सः॥ क्षमी क्षमावान्॥ १३॥ संतुष्ट इति सततं लाभेऽलाभे च संतुष्टः प्रसन्नचित्तः॥ योगी अप्रमत्तः॥ यतात्मा संयतस्वभावः॥ दृढो मद्विषयो निश्चयो यस्य मय्यर्पिते मनोबुद्धियेन॥ एवंभूतो यो मद्भक्तः स मे प्रियः १४

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी॥ १३॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ १४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रि
यः॥ १५॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रिय॥ १६॥

किंच यस्मादिति॥ यस्मात्सकाशाल्लोको जनो नोद्विजते भयशंक्षोभं न प्राप्नोति॥ यश्च लोकान्नोद्विजते यश्च स्वस्य भाविकैर्हर्षादिभिर्हर्षादिभिर्मुक्तः॥ तत्र हर्षः स्वस्येष्टार्थलाभे तु उत्साहः॥ अमर्षः परस्परलोभोऽसहनं भयं त्रासः उद्वेगो भयादिनिमित्तश्चित्तक्षोभः एतैर्विमुक्तो मद्भक्तः॥ स मे प्रियः॥ १५॥ अनपेक्ष इति॥ अनपेक्षः यदृच्छयोपस्थितेऽप्यर्थे निस्पृहः॥ शुचिर्बाह्याभ्यंतरशौचसंपन्नः दक्षोऽनलसः॥ उदासीनः पक्षपातरहितः गतव्यथः॥ आधिरहितः॥ सर्वानदृष्टादृष्टार्थानारंभानु यथायोग्यं परित्यक्तुं शीलं यस्य सः॥ एवंभूतः स यो मद्भक्तः स मे प्रियः॥ १६॥

॥ राम॥
॥ १२२॥

किंच। योनेति। प्रियंप्राप्ययोनहृष्यति। अप्रियंप्राप्ययोनद्वेष्टिइष्टनाशेनाशोसतिनशोचति। अप्राप्तमर्थेनकांक्षति॥ शुभाशुभेपुण्यपापेपरित्यक्तुंशीलंय
स्य एवंभूतोभक्तिमान्यःसमेप्रियः।१७ किंचसमइति॥ शत्रौचमित्रेचसमः एकरूपः मानापमानयोरपितथासमएवहर्षविषादशून्यइत्यर्थः॥ शी
तोष्णयोःसुखदुःखयोश्चसमः संगविवर्जितः। क्वचिदप्यनासक्तः।१८ तुल्यइति। तुल्येनिंदास्तुतीयस्यमौनीसंयतवाक् येनकेनचिद्यथालब्धेनसंतु

योनहृष्यतिनद्वेष्टिनशोचतिनकांक्षति॥ शुभाशुभपरित्यागीभक्तिमान्यःसमेप्रियः।१७ समःशत्रौचमित्रेचतथामा
नापमानयोः॥ शीतोष्णसुखदुःखेषुसमःसंगविवर्जितः।१८ तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेनचित्॥ अनि
केतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः।१९ येतुधर्म्यामृतमिदंयथोक्तंपर्युपासते॥ श्रद्दधानामत्परमाभक्तास्तेती
वमेप्रियाः॥२०॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां० द्वादशोध्यायः।१२ ॐनमोभगवतेवासुदेवायनमः॥

ष्टः॥ अनिकेतोनियतवासशून्यः स्थिरमतिर्व्यवसितचित्तः एवंभूतोभक्तिमान्मेप्रियोनरः।१९॥ उक्तंधर्मज्ञानमुपसंहरति येत्विति॥ यथोक्तप्रकारंधर्म्यंए
वामृतंअमृतत्वसाधनत्वात्॥ धर्म्यामृतमिदमितिवाक्यं नितरां ये उपासते अनुतिष्ठंति॥ श्रद्दधानामत्परमाश्चसंतोमद्भक्तास्तेतीवमेप्रियाःइति
दुःखमयान्नावकर्मेनहृदिनमनोबुध॥ सत्ववस्त्वपदांभोजभक्तिसम्यक्मभजेत॥ इतिसुबोधिन्यांद्वादशः॥१२॥

एवम्भूतस्य भक्तस्य क्षिप्रमेव परमेश्वरप्रसाद हेतुभ धर्मानाह अद्वेष्टेत्यष्टभिः॥ सर्वभूतानां पद्यापधमद्वेष्टा मैत्रः करुण एव॥ उत्तमे द्विषपरन्यः समेषु मित्रतया
वर्तमान इति मैत्र हीनेषु कृपालुरित्यर्थः॥ निर्ममो निरहंकारश्च कृपालुत्वादेवान्ये॥ सह समे सुखदुःखे यस्य सः॥ क्षमी क्षमावान्॥ १३॥ संतुष्ट इति सततं लाभेऽ
लाभे च संतुष्टः प्रसन्नचित्तः॥ योगी अप्रमत्तः॥ यतात्मा संयतस्वभावः॥ दृढो मद्विषयो निश्चयो यस्य मय्यर्पिते मनोबुधि येन॥ एवंभूतो यो मद्भक्तः स मे प्रियः १४

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी॥ १३॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः॥ मय्यर्पितमनोबुधिर्यो मद्भक्तः स मे प्रियः॥ १४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रि
यः॥ १५॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः॥ १६॥

किं च यस्मादिति॥ यस्मात्सकाशाद्लोको जनो नोद्विजते भयं क्षोभनं प्राप्नोति॥ यश्च लोकान्नोद्विजते यश्च लाभादिके हर्षादिभिर्हर्षादिभिर्मुक्तः॥ तत्र हर्षः स्वस्ये
ष्टार्थलाभेनुत्साहः॥ अमर्षः परस्य लाभोऽसहनं भयं त्रासः उद्वेगो भयाद्विनिमित्तश्चित्तक्षोभः एतैर्विमुक्तो मद्भक्तः॥ स मे प्रियः॥ १५॥ अनपेक्ष इति॥ अनपेक्ष
यदृच्छयोपस्थितेप्यर्थे निस्पृहः॥ शुचिर्बाह्याभ्यंतरशौचसंपन्नः दक्षोऽनलसः॥ उदासीनः पक्षपातरहितः गतव्यथः॥ आधिरहितः॥ सर्वान्दृष्टानामारंभानु

पक्षमात्वर्तिस्तु शीलं यस्य सः॥ एवंभूतः स भक्तो मे प्रियः॥ १६॥

न हि द्वयोस्तरे किं नु श्रेष्ठा इत्यत आह ये त्विति द्वाभ्यां। ये त्वक्षरं पर्युपासते ध्यायंति ते पि मामेव प्राप्नुवंतीति द्वयोरन्वयः॥ अक्षरस्य लक्षणमनिर्देश्यमित्यादि अ
निर्देश्यं शब्देन निर्देष्टुमशक्यं॥ अतो व्यक्तं रूपादिहीनं॥ सर्वत्रगं सर्वव्यापि॥ अत एव त्वादेवाचिंत्यं॥ कूटस्थं कूटे मायाप्रपंचे अधिष्ठानत्वेन स्थितं॥ अतएव अच
लं वृद्ध्यादिरहितं॥ अत एव ध्रुवं नित्यं संनियम्य समत्व ॥४॥ ननु चेत्तेपि त्वामेव प्राप्नुवंति तर्हि तेषां पुरुषोत्तमहं क्व तत्तु अपेक्षया क्लेशाधिक्यं तु विशेषमाह क्ले

॥ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ॥ सर्व्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ॥३॥
॥ संनियम्येंद्रियग्रामं सर्व्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥४॥
॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां ॥ अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥

इति त्रिभिः॥ अव्यक्ते निर्विशेषे ब्रह्मण्यासक्तं चेतो येषां तेषां क्लेशोऽधिकतरः॥ हि यस्मादव्यक्तविषया गतिर्निष्ठा देहाभिमानिभिर्दुःखं यथा
भवत्येवमवाप्यते देहादिमानिनां निर्गुणब्रह्मणि निष्ठा दुर्घटत्वादिति भावः॥५॥ श्रीकृष्णः शरणं ममेति परमो मंत्रोऽयमष्टाक्षरः॥छ॥ ॥

गी॰ टी॰ १२० निर्गुणोपासनस्यैव सगुणोपासनस्य च श्रेयः। क्लेशतस्त्वित्येषां निर्गुणं तु दुःखोद्यमः। पूर्वाध्यायान्ते मत्कर्मकृदित्यनेन मत्परमस्यैवं भक्तिनिष्ठस्य श्रेष्ठत्वमुक्तं कौन्ते
य प्रतिजानीहीत्यादिना च तत्र तत्र तस्यैव श्रेष्ठत्वं वर्णितं। तथा तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत इत्यादिना च सर्वोत्तमत्वेनैवाक्षरं संतरस्मासीमा
दिना च ज्ञाननिष्ठस्य श्रेष्ठत्वमुक्तं। एवमुभयोः श्रैष्ठ्ये विशेषजिज्ञासया भगवन्तमर्जुन उवाच एवमिति एवं सर्वकर्मार्पणादिना सततयुक्ता त्वन्निष्ठाः संतो

अर्जुन उवाच एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ये चाप्यक्षरमव्यक्तं तेषां॰ के योगवि
त्तमा भगवानु॰ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः
॥२॥

ये भक्ताः त्वां विश्वरूपं सर्वज्ञं सर्वशक्तिं पर्युपासते ध्यायन्ति ये चाप्यक्षरं ब्रह्म अव्यक्तं निर्विशेषं उपासते॥ तेषामुभयेषां मध्ये के अतिशयेन योगविदः श्रेष्ठा इ राम
त्यर्थः॥ तत्रः प्रथमानां श्रेष्ठत्वमुत्तरं॥ श्रीभगवानुवाच मयीति मयि परमेश्वरे सर्वज्ञत्वादिगुणविशेषे मन आवेश्यैकीकृत्य युक्ता मत्परा इत्यर्थः॥ कर्मानुष्ठाना १२०
दिना मन्निष्ठाः सन्तः॥ श्रेष्ठया श्रद्धया युक्ता मे मामुपासते ते युक्ततमा ममाभिमताः॥ २॥ ॥ २ ॥ २ ॥ २ ॥

यस्मादेवं तस्मादिति ॥ तथा स्वामी ईशो जगतः स्वामिनं रत्नं प्रशस्यं प्रसादयामि ॥ कथं कायं प्रणिधाय दंडवत्प्रणम्य अतस्त्वं ममापराधं सोढुं
मर्हसि कस्य क इव पुत्रस्यापराधं हं पिता यथा सहते सखा मित्रस्यापराधं सखा निश्शसु धिवं धुर्यथा ॥ प्रियः प्रियायाः अपराधं तस्य
सहते ॥ ४४ ॥ एवं क्षमाप्य निजत्वा प्रार्थयते अदृष्टपूर्वमिति द्वाभ्यां हे देव एवमदृष्टं तं वरूपं दृष्ट्वा हृषितोऽस्मि तथा भयेन च मे मनः प्रव्यथितं प्रच
प्रचलितं ॥ तस्मान्मम भयानिवृत्तये तदेव रूपं दर्शय हे देवेश हे जगन्निवास प्रसन्नो भव ॥ ४५ ॥ तदेव रूपं विशेषयन्नाह ॥ किरीटिनमिति
किरीटवंतं गदावंतं चक्रहस्तं च त्वां द्रष्टुमिच्छामि ॥ एवं यथा दृष्टोऽसि ॥ तथैव अतो हे सहस्रबाहो हे विश्वमूर्ते ॥ इदं रूपं संहृत्य तेनैव किरीटादियुक्तेन

॥ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं ॥ पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ॥ ४४ ॥ अदृष्टपूर्वं हृषितोऽस्मि
दृष्ट्वा भयेन च प्रव्यथितं मनो मे तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव तेनैव रू
पेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ॥ तेजोमयं विश्वमनंतमाद्यं यन्मे
त्वदन्येन न दृष्टपूर्वं ॥ ४७ ॥

चतुर्भुजेन रूपेण भव आविर्भव ॥ तदेवं श्रीकृष्णमर्जुनः पूर्वमेवमपि किरीटिना युक्तमेव पश्यतीति गम्यते ॥ यत्तु पूर्वकं विश्वरूपं दर्शने
किरीटिनं गदिनं चक्रिणं च पश्यामीति ॥ नन्वत्र किरीटाद्यभिप्रायेण ॥ यद्वा एतावंतं कालं त्वया किरीटिनं च ...नं च सुप्रसन्नमुपपयं तमेवेदानी
त्नोऽस्मि तु निरीक्ष्य यस्मात् इत्येवं तत्र वचनयोः न किञ्चिद्विरोधः ॥ ४६ ॥ एवं प्रार्थितः संस्तस्मा आश्वासनाय श्रीभगवानुवाच मयेति त्रिभिः अर्जुन किमत्र
त्वं वियोगतो मया प्रसन्नेन कृपया तवेदं परमैश्वरमु रूपं दर्शितं आत्मनो मम योगात् ॥ योगमायासामर्थ्यात् परमत्वमेवाह ॥ तेजोमयं विश्वं विश्वात्मकं अनंतमा

किंच नमः इति। हे सर्व हे सर्वात्मन्। सर्वास्वपि दिक्षु तुभ्यं नमोऽस्तु। सर्वात्मकत्वमुपपादयन्नाह। अनंतवीर्य्येत्यमितसामर्थ्यं तथा। अमितो विक्रमः पराक्रमो यस्य स एवंभू-
तः १ त्वं सर्वं विश्वं सम्यगंतर्बहिश्च व्याप्नोषि। सुवर्णमिव कटककुंडलादि। स्वकार्य्यं व्याप्य वर्त्तसे ततः। सर्वस्वरूपोऽसि ॥४०॥ इदानीं भवंतं क्षमापयति सखेति द्वा-
भ्यां। तव प्रभावतः सखेत्येवं मत्वा प्रसभं हठेन नतिरस्कारेण यदुक्तं तत् क्षामये त्वामित्युत्तरेणान्वयः। किं तत्। हे कृष्ण हे यादव हे सखेति च। संबोधने च समानो नो हेतु-
तवेमं हि मानमिदं च विश्वरूपमजानता मया प्रमादात्प्रणयेन स्नेहेनापि वा यदुक्तमिति ॥४१॥ यच्चेति। हे अच्युत यच्च परिहासार्थं क्रीडादिषु तिरस्कृ-

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व। अनंतवीर्य्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥४०॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे
सखेति। अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥४१॥ यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु। एकोऽथवाप्यच्युत तत्स-
मक्षं तत्क्षामये त्वामहमप्रमेयं ॥४२॥ पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्। न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥४३॥

तोऽसि। एक एव त्वं सखीन्विना रहसि स्थितः तत्समक्षं वा। अथवा तत्समक्षं तेषां परिहसतां सखीनां समक्षं पुरतोऽपि। तत्सर्वमपराधजातं त्वामप्रमेयमचिन्त्यप्रभावं क्षामये क्षमां
कारयामि ॥४२॥ अचिन्त्यप्रभावमेवाह। पितेति। न विद्यते प्रतिमा उपमा यस्य सोऽप्रतिमः तथाविधः प्रभावो यस्य तत्संबुद्धिः हे अप्रतिमप्रभाव। त्वमस्य चराचरस्य पि-
ताजनकोऽसि। अत एव पूज्यश्च गुरोरपि गरीयान् गुरुतरः। अतो लोकत्रयेऽपि त्वत्समस्य एव तावदन्यो नास्ति। परमेश्वरस्यानेकत्वाभावात्। कुतोऽभ्यधिकः पुनः कु-

तत्र हेतुमाह कस्मादिति ॥ हे महात्मन् हे अनंत ॥ हे देवेश हे जगन्निवास कस्माद्धेतोस्ते तुभ्यं न नमेरन् नमस्कारं न कुर्युः यतो भवान् ब्रह्मणोऽपि गरीयसे गुरुतराय
आदिकर्त्रे च ब्रह्मणोऽपि जनकाय ॥ पितृ ॥ सत् व्यक्तं असत् अव्यक्तं च ताभ्यां परं मूलं कारणं यत् अक्षरं ब्रह्म तत् त्वमेव ॥ एतैरनेकैर्हेतुभिस्त्वा सर्वे नमंती
त्यनिचित्रमित्यर्थः ॥ ३७ ॥ किंच त्वमिति ॥ त्वमादिदेवः देवानामाद्यः ॥ पुरुषः पुराणः ॥ अनादिः पुरुषस्त्वं ॥ अतएव त्वमस्य विश्वस्य परं निधानं लयस्थानं तथा
विश्वस्य वेत्ता वेद्यश्चेति ॥ ज्ञाता च त्वं यच्च वेद्यं वस्तुजातं परं च धाम वैष्णवं पदं तद् अपि त्वमेवासि अतएव हे अनंत अनंतरूप त्वया इदं विश्वं ततं व्याप्तं ॥ एतेभ्यश्च स

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ॥ अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥ त्वमादिदेवः
पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं ॥ वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणः शशां
कः प्रजापतिस्त्वं प्रपितामहश्च ॥ नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥

नभिर्हेतुभिस्त्वमेव नमस्कार्य इति भा
व ॥ ३८ ॥ इतश्च त्वमपि नमस्कार्य इति वायुरिति ॥ वाय्वादिरूपत्वमिति सर्वदेवात्मकत्वोपलक्षणार्थमुक्तं ॥ प्रजापतिः पितामहः तस्यापि जनकत्वात्प्र
पितामहस्त्वं ॥ अतस्ते तुभ्यं सहस्रकृत्वः सहस्रशो नमोऽस्तु ॥ भूयोऽपि पुनरपि सहस्रकृत्वो नमो नम इति भक्तिश्रद्धाभरातिरेकेण नमस्कारं पुनरप्यनाधि

नंचेतद्विस्मः तत्त्रत्नोगरीयोयद्वाजयेम यदिवानो नंयेपुरेत्यादिपार्थवाक्यैनकार्पस्यमाह द्रोणञ्चेति। येभ्यस्त्वंशंकसेतानद्रोणादीनमयैवहतान्त्वंज
हि घातयामाप्यतिघ्नाः भयंसावकाशी। सपत्नान शत्रून्रणेयुद्धेनिश्चितजेतासि मोक्षासि। ३४॥ ततोमद्वचनेनद्भुतराष्ट्रं प्रतिसंजयउवाच। एतच्छ्रुत्वेति॥ ए
तत्पूर्वोक्तं वचनं पात्मर्वो केशवस्य वचनंश्रुत्वा वेपमानः कंपमानः किरीटि अर्जुनः॥ अतोजातिः संपुटीकृतहस्तः॥ कृतञ्जनातस्ह भ्यपुनरप्यहष्टत्रत्वा।
न॥ कथमाह॥ भयह्मीषोवेशात्गद्गद्विवर्णकंपनेनसहदन्नेतरत्निक्षमह्वंपथाभवतितथा॥ विच॥ भीतादविभीतः सन्प्रणम्यावनतोभूत्वाअर्जुन

द्रोणंच भीष्मंच जयद्रथंच कर्णंतथान्यानपियोधवीरान्। मयाहतांस्त्वंजहिमाव्यथिष्ठायुध्यस्वजेतासिरणेसपत्नान्। ३५। संजयउवाच॥ एतच्छ्रुत्वा
वचनंकेशवस्यकृतांजलिर्वेपमानःकिरीटी॥ नमस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीतभीतःप्रणम्य॥ अर्जुनउवाच॥ स्थानेहृषीकेशतवप्रकीर्त्या
त्याजगत्प्रहृष्यत्यनुरज्यतेच॥ रक्षांसिभीतानिदिशोद्रवन्तिसर्वेनमस्यन्तिचसिद्धसंघाः॥ ३६॥
उवाच॥ स्थानेइत्येवाहृषीकेशमर्जुनस्योक्तिः। ३५। स्था

नेइत्यव्ययंयुक्तमित्यस्मिन्नर्थेहेहृषीकेशयत्तएवंत्वमद्भुतप्रभावोभक्तवत्सलश्च॥ अतस्तवकीर्त्यामहात्म्यकीर्तनेनननवेवलमहमेवप्रहृष्यामि॥ किं
तुजगत्सर्वंप्रहृष्यति॥ अनुरागेणहर्षंप्राप्नोति॥ एतत्स्थानेयुक्तमित्यर्थः॥ तथाजगदनुरज्यतेचअनुरागंचोपैतिइतिपन्नरक्षांसिभीतानिदिशःप्रतिद्रव
न्ति॥ पलायतइत्यर्थः॥ सर्वेयोगतपोमंत्रादिसिद्धानांसंघानमस्यन्तिप्रणमन्तीत्यर्थः॥ एतच्चस्थानेयुक्तमेवनचित्रमित्यर्थः॥ ३६॥

विच ॥ तपतिति ॥ हेमहाबाहो महत् अनजितनव रूपं दृष्ट्वा लोकाः सर्वे प्रव्यथिताः अतिभीता । तथाहं च प्रव्यथितोस्मि कीदृशं रूपं बहुवक्त्राणि चय
स्मिन्नतत् ॥ बहवो बाहवश्च ऊरवः पादाश्च यस्मिन्नतत् बहूदराणि यस्मिन्नतत् कीभिः दंष्ट्राभिः करालं विकृततरं रौद्रमित्यर्थः ॥ न केवलं भीतोहमस्म्येताव
देव अपितु नभःस्पृशमिति ॥ नभःस्पृशतीति नभःस्पृक् तं अंतरिक्षव्यापिनमित्यर्थः ॥ दीप्ततेजोयुक्तं अनेके वर्णा यस्य तं अनेकवर्णं व्यात्तानि विवृता
न्याननानि यस्य तं ॥ दीप्तानि विशालानि नेत्राणि यस्य तं ॥ एवं भूतं त्वां दृष्ट्वा प्रव्यथितः अंतरात्मा मनो यस्य मोह धृतिं धैर्यं सुं शमं च न लभे ॥ २४ ॥ कि

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादं ॥ बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं ॥ २३ ॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ता
ननं दीप्तविशालनेत्रं ॥ दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो ॥ २४ ॥ दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ॥ दि
शो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥ भीष्मो द्रोणः सूतपुत्रस्तथासौ
चरस्वंतिमो ॥ २६ ॥

देवेश ते तव मुखानि दृष्ट्वा भयादेशेन दिशो न जानामि शर्म च सुखं न लभे भो जगन्निवास प्रसन्नो भव ॥ कीदृशानि मुखानि दंष्ट्राभिः करा
लानि कालानलः प्रलयाग्निस्तत्सदृशानि ॥ २५ ॥ पश्चात्पतत् दृश्यमिव सीमेन तस्मिन् त्वं गामि भावि जयपराजयपार्श्वे च मम संदेहं परिहरति यथा भागव
तोत्र तदृश्य नीनरपन्नस्त्वमी चेति पंचभि ॥ अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे अवनिपालानां जयद्रथादीनां राज्ञां संघैः सह त्वत्तव व
क्त्राणि विशंतीत्युत्तरेणान्वयः ॥ तथा भीष्मश्च द्रोणश्च असौ सूतपुत्र कर्णश्च ॥ न केवलं त एव विशंति अपि तु अस्मदीयैरपि योधमुख्यैः धृ
ष्टद्युम्नादयस्तैः सह ॥ २६ ॥

॥भा०टी०॥ किंच ॥ अनादीति ॥ अनादिमध्यांतं उत्पत्तिस्थितिप्रलयरहितं ॥ अनंतवीर्यप्रभावो यस्य तं ॥ अनंतबाहुं अनंता बाहवो यस्य तं ॥ शशिसूर्यौ नेत्रे यस्य ताहृशं
॥११५॥ त्वा पश्यामि ॥ तथा दीप्तहुताशोऽग्निर्वक्त्रेषु यस्य तं ॥ स्वतेजसा इदं विश्वं तपंतं संतापयंतं पश्यामि ॥ १९ ॥ किंच द्यावापृथिव्योरिति ॥ द्यावापृथिव्योरिदमंत
रं हि अंतरिक्षं त्वयैकेन व्याप्तं दिशश्च सर्वा व्याप्ताः ॥ अद्भुतं अदृष्टपूर्वं त्वदीयं इदं उग्रं घोरं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं अतिभीतं पश्यामीति पूर्व
स्यैवानुषंगः ॥ २० ॥ किंच ॥ अमी हीति ॥ अमी सुरसंघा भीताः संतः त्वा विशंति शरणं प्रविशंति ॥ तेषां मध्ये केचित् भीताः दूरत एव स्थिताः कृतसंपुटक

॥ अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं ॥ पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं ॥ १९ ॥ द्यावापृथिव्योरिदमंतरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः दृष्ट्वाद्भुतं रूपमिदं तवोग्रं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥ अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो
गृणंति ॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च
गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

रयुगलाः संतो गृणंति ॥ जयजयरक्षेति प्रार्थयंते स्वपक्षमन्यत ॥ २१ ॥ किंच रुद्रेति ॥ रु
द्राश्च आदित्याश्च वसवश्च ये च साध्या नाम देवाः विश्वेदेवाः ॥ अश्विनौ देवौ ॥ मरुतो मरुद्गणाः ॥ ऊष्माणं पिबंतीत्यूष्मपाः पितरः उष्मभागा हि पितर इ ॥राम॥
त्यादिश्रुतेः स्मृतेश्च ॥ यावदुष्णं भवेदन्नं तावदश्नंति वाग्यताः पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणा इति ॥ गंधर्वाश्च यक्षाश्च असुराश्चानिरंवना ॥११५॥
रूपः ॥ सिद्धानां संघाश्च ते सर्वे एव हि विस्मिताः संतः त्वां वीक्षंते इत्यन्वयः ॥ २२ ॥

भाषणमेवाह ॥ पश्यामीति सप्तदशभिः अर्जुन उवाच हे देव तव देहे देवानादित्यादीन्पश्यामि ॥ तथा सर्वान्भूतविशेषाणां जरायुजांडजादीनां संघां
श्च तथा दिव्यानृषीन्वसिष्ठादीन् ॥ उरगांश्च तक्षकादीन् ॥ तथा तेषां देवादीनामीशं स्वामिनं ब्रह्माणं च ॥ कथंभूतं कमलासनस्थं पृथ्वीपद्म
कर्णिकायां मेरौ स्थितं ॥ यद्वा ॥ त्वन्नाभिपद्मासनस्थं ॥ १५ ॥ किंच अनेकेति ॥ अनेकानि बाह्वादीनि यस्य तादृशं त्वां पश्यामि ॥ अनंतानि रूपाणि यस्य
तं त्वां सर्वतः ॥ पश्यामि ॥ न तव अंतं न मध्यं आदिं च न पश्यामि ॥ सर्वगतत्वात् ॥ १६ ॥ किंच ॥ किरीटिनमिति किरीटिनं मुकुटवंतं च ॥ गदिनं गदावंतं च चक्रि

॥ अर्जुन उ० ॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघा ॥ ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥ अनेकबाहूदरव
क्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपं ॥ नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपं ॥ १६ ॥ किरीटिनं गदिनं चक्रिणं च ॥ तेजोराशिं
सर्वतो दीप्तिमंतं ॥ पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयं ॥ १७ ॥ त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं ॥ त्वमव्ययः शाश्वतधर्म
गोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

णं चक्रवंतं च ॥ सर्वतो दीप्तिमंतं तेजःपुंजरूपं ॥ तथा दुर्निरीक्ष्यं द्रष्टुमशक्यं ॥ तत्र हेतुः दीप्तयोरनलार्कयोरिव
द्युतिस्तेजो यस्य तं अत एव अप्रमेयं एवंभूतमियत्ता निश्चेतुमशक्यं त्वां समंततः पश्यामि ॥ १७ ॥ यस्मादेवं तवैश्वर्यं तस्मात्त्वमिति त्वमेवाक्षरं परमं
ब्रह्म कथंभूतं ॥ वेदितव्यं मुमुक्षुभिः ॥ त्वमेवास्य विश्वस्य परं निधानं ॥ निधीयतेऽस्मिन्निति निधानं प्रलये आश्रयः अत एव त्वमव्ययः नित्यः शा
श्वतस्य नित्यस्य धर्मस्य गोप्ता पालकः सनातनश्चिरंतनः पुरुषो मम संमतोऽसि ॥ १८ ॥

किंच। दिव्येति। दिव्यानि माल्यांबराणि धारयतीति तथा दिव्यो गंधो यस्य तादृशमनुलेपनं यस्य तं सर्वाश्चर्यमयं
अनेकाश्चर्यप्रायं देवं द्योतनात्मकं अनंतं अपरिच्छिन्नं विश्वतः सर्वतो मुखानि यस्मिन् तं ॥११॥ विश्वरूपदी-
प्तेर्निरुपमत्वमाह। दिवीति। दिवि आकाशे सूर्यसहस्रस्य युगपदुत्थितस्य यदि युगपदुत्थिता भाः प्रभा
भवेत् तर्हि सा तदा महात्मनो विश्वरूपस्य भासः प्रभायाः कथंचित्सदृशी स्यात् नान्योपमास्तीत्यर्थः त

दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं। सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं ॥११॥ दिवि सूर्यसहस्रस्य भ-
वेद्युगपदुत्थिता। यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥१२॥ तत्रैकस्थं जगत्सर्वं प्रविभक्तमनेक-
धा। अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥१३॥ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः। प्रणम्य शिरसा देवं
कृतांजलिरभाषत ॥१४॥ तथाभूतं रूपं दर्शयामासेति पूर्वेणान्वयः ॥१२॥ ततः किं वृत्तमित्यपेक्षायामाह संज-
यः तत्रेति। अनेकधा प्रविभक्तं नानाविभागेनावस्थितं कृत्स्नं जगत् देवदेवस्य शरीरे तदैकत्र तदैव एकत्र स्व-
स्थितं तदा पांडवोऽर्जुनोऽपश्यत् ॥१३॥ एवं दृष्ट्वा किं कृतवानित्यत आह तत इति। ततो दर्शनानंतरं विस्मयेनावि-
ष्टो व्याप्तः सन् हृष्टानि पुलकितानि रोमाणि यस्य स धनंजयो देवं तमेव शिरसा प्रणम्य कृतांजलिः सपु

॥राम॥
॥२४॥

किंचुदेहेतितत्रानत्र परिश्रमेणुना वर्षकोटिभिरपि द्रष्टुमशक्यमेकत्स्नमपिनराचरसहितं जगतद्दहास्मिन्ममसदेहे अ
वयवरूपेणैकत्रैवस्थितं अधाधुनेवपश्यय ग्रान्यजगदाश्रयभूतंकारणस्वरूपं जगतश्चाविशेषादिकं तेआ
पराजयादिकंचयद्द्रष्टुमिच्छतितत्सर्वंपश्य ॥ ७ यदुक्तमर्जुनेनमन्यसेयदितच्छक्यमितितत्राह ॥ ननि
ति ॥ अनेनैवतुस्वीयेनचर्मचक्षुषामांद्रष्टुं नशक्यसिशक्तोनभवस्यतिअतोहंदिव्यसलौकिकंज्ञानात्मकंच
क्षुस्तेददामि ॥ तेनमेऐश्वरमसाधारणंयोगंयुक्तिंअघटितघटनासामर्थ्यंपश्य ॥ ८ ॥ एवमुक्त्वाभगवानर्जुनायस्वरूप
देहेकस्थंजगत्कृत्स्नंपश्याद्यसचराचरं ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥ ७ नतुमांशक्यसेद्रष्टुमनेनैव
स्वचक्षुषा दिव्यंददामितेचक्षुः पश्यमेयोगमैश्वरं ॥ ८ ॥ संज० ॥ एवमुक्त्वाततोराजन्महायोगेश्वरोहरिः ॥ दर्शया
मासपार्थायपरमंरूपमैश्वरं ॥ ९ ॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनं ॥ अनेकदिव्याभरणंदिव्यानेकोद्यतायु
धं ॥ दर्शितवान् ॥ तच्चदृष्ट्वार्जुनश्रीकृष्णंविज्ञापितवानितीममर्थंएवमुक्त्वेत्यादिभिः षड्भिः श्लोकैर्धृत
राष्ट्रंप्रतिसंजयउवाच ॥ एवमितिं ॥ राजन्हेधृतराष्ट्र ॥ महांश्चासौयोगेश्वरश्चमहायोगेश्वरोहरिः परमैश्वरं रूपंदर्शित
वान् ॥ ९ ॥ कथंभूतंतत्तदाहितत्रतत्राह अनेकेति अनेकानिवक्त्राणिनयनानिचयस्मिंस्तत्तत् अनेकाना
मद्भुतानांदर्शनंयस्मिंस्तत्तत् अनेकानिदिव्याभरणानियस्मिंस्तत्तत् ॥ दिव्यान्यनेकानिउद्यतानिआयु

१०

॥भी॰गी॰टी॰
॥११३॥

हो विगत एवेति भावः ॥२॥ किं च एवमिति । भवाप्ययौ हि भूतानां निमित्तादि मया श्रुतं । यथा चेदानीमात्मानं त्वमात्थ वि
ष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति त्वं कथयसि हे परमेश्वर एवमेतत् न अत्राप्यविश्वासो मम नास्तीत्यर्थः
तथापि हे पुरुषोत्तम ते ऐश्वर्यं शक्तिबलवीर्यतेजोभिः संपन्नं तद्रूपं कौतूहलाद्द्रष्टुमिच्छामि ॥३॥ न चाहं द्रष्टुमि
च्छामीत्येतावतैव त्वया तद्रूपं दर्शयितव्यम् । किं तर्हि मन्यस इति । योगिन एव योगास्तेषामीश्वरं मयोग्येनेन तद्रूपं द्र
ष्टुं शक्यमिति मन्यसे तर्हि तद्रूपवन्तमात्मानमव्ययं नित्यं मे दर्शय ॥४॥ एवं प्रार्थितः सन् तत्त्वद्भुतं रूपं दर्श

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर । द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥३॥ मन्यसे यदि तच्छक्यं मया द्र
ष्टुमिति प्रभो । योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ॥४॥ श्रीभगवानु॰ । पश्य मे पार्थ रूपाणि शतशोऽथ
सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥५॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा । ब
हून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥६॥

यिष्यन् सावधानो भवेत्यर्जुनमभिमुखीकरोति । श्रीभगवानु ॥राम॥
पश्येति चतुर्भिः पश्य एकैकस्य नानाविधत्वाद्रूपाणीति बहुवचनं अपरिमितान्यनेकप्रकाराणि अलौकिका ॥११३॥
नि मम रूपाणि पश्य वर्णाः शुक्लकृष्णादयः आकृतयोऽवयवसन्निवेशविशेषाः नाना अनेके वर्णाः आ
कृतयश्च येषां तानि नानावर्णाकृतीनि ॥५॥ तान्येव दर्शयति । आदित्यादीन्मम देहे पश्य मरुत एकोनपंचा
शद्देवविशेषाः । अदृष्टपूर्वाणि त्वया नान्येन वा पूर्वमदृष्टानि रूपाणि आश्चर्याणि अद्भुतानि ॥६॥

द्यूतमिति॥छलयतांअन्योन्यंवंचनपराणांसंबंधिद्यूतमस्मितेतेजस्विनांप्रभाववंतांतेजःप्रभावोस्मि
जेतृणांजयोस्मिव्यवसायिनामुद्यमवतांव्यवसायोस्मिसत्ववतांसात्विकानांसत्वमहं॥३६॥वृष्णीना
मि वासुदेवोयोत्वांसुपदिशामिधनंजयस्त्वमेवमहद्विभूतः॥मुनीनांवेदार्थमननशीलानांवेदव्या
सोहमस्मि॥कवीनांक्रांतदर्शिनांमध्येउशनानामकविःशुक्रः॥३७॥दंडइतिदमयतांदमकर्तृणांसंबंधी

द्यूतंछलयतामस्मितेजस्तेजस्विनामहं॥जयोस्मिव्यवसायोस्मिसत्वंसत्ववतामहं॥३६॥वृष्णी
नांवासुदेवोस्मिपांडवानांधनंजयः॥मुनीनामप्यहंव्यासःकवीनामुशनाःकविः॥३७॥दंडोदम
यतामस्मिनीतिरस्मिजिगीषतां॥मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहं॥३८॥यच्चापिसर्व
भूतानांबीजंतदहमर्जुनः॥नतदस्तिविनायत्स्यान्मयाभूतंचराचरं॥३९॥

दंडोस्मियेनासंयतानाम
पिसंयताभवंतिसदंडोमहद्विभूतिःजेतुमिच्छतांसंबंधिनीसामाद्युपायरूपानीतिरस्मिगुह्यानांगोप्या
नांगोपनेहेतुंमौनमवचनमहमस्मिनहितूष्णींस्थितस्याभिप्रायोज्ञायतेज्ञानवतांतत्वज्ञानिनांज्ञा
नमहं॥३८॥यदितियदपिचसर्वभूतानांबीजंप्ररोहकारणंतदहंतत्रहेतुःमयाविनायत्स्यात्भवे

अक्षराणामिति ॥ अक्षराणां वर्णानां मध्ये अकारोस्मि ॥ तस्य सर्ववाङ्मयश्रेष्ठत्वात् ॥ तथा च श्रुतिः अकारो वै
सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति ॥ सामासिकस्य समासमूहस्य मध्ये द्वंद्वः रामकृष्ण
त्वावित्यादिसमासोस्मि उभयपदप्रधानत्वेन श्रेष्ठत्वात् अक्षयः प्रवाहरूपः कालोहमेव कालः कलयतामित्र
पूर्वोक्तानामेकः संवत्सरादिनाशी रूपः काल उक्तः सत्वतस्मिन्नायुर्विच्छिरोसति हीयते अत्र तु प्रवाहात्मको
अक्षयः काल इत्यनयोर्विशेषः कर्मफलविधातृणां मध्ये विश्वतोमुखो धाता सर्वकर्मफलविधाताहमित्यर्थः ॥

अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च ॥ अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥ मृत्युः सर्वह
रश्चाहमुद्भवश्च भविष्यतां ॥ कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥ बृहत्साम तथा साम
नां साम्नां गायत्री छंदसामहं ॥ मासानां मार्गशीर्षोहमृतूनां कुसुमाकरः ॥ ३५ ॥

३४ मृत्युरिति संहारकारणानां म
ध्ये सर्वसंहर्ता मृत्युरहं ॥ भविष्यतां भाविकल्याणानां प्राणिनामुद्भव अभ्युदयोहं ॥ नारीणां स्त्रीणां मध्ये कीर्त्या
द्याः सप्तदेवतारूपाः स्त्रियोहं यासामाभासमात्रयोगेन प्राणिनः श्लाघ्या भवंति श्रेष्ठताः कीर्त्याद्याः स्त्रियो मद्वि
भूतीः ३४ बृहत्सामेति ॥ तामिद्धि हवामह इत्यस्यामृचि गीयमानं बृहत्साम तेन चेन्द्रः सर्वेश्वरत्वेन स्तूयत इति श्रे
ष्ठत्वात् छंदोविशिष्टानां मंत्राणां मध्ये गायत्रीमंत्रोहं द्विजत्वापादकत्वेन सोमाहरणेन च श्रेष्ठत्वात् कुसुमाकरो व
संतः ॥ ३५ ॥ ॥राम॥ ॥२२२॥

आयुधानामिति कामान्दोग्धीति कामधुक् प्रजनिः प्रजोत्पत्तिहेतुः कंदर्पः कामोस्मि । न केवलं संभोगप्रधानः कामो महिमभूमिः अशास्त्रीयत्वान् सर्पाणां सविषाणां राजा वासुकिरस्मि ॥२८॥ अनंत इति नागानां निर्विषाणां राजा अनंतः शेषोस्मि यादसां जलचराणां राजा वरुणोस्मि पितॄणां राज अर्यमाहमस्मि संयमतां नियमं कुर्वतां मध्ये यमोस्मि ॥२९॥ प्रह्लाद इति कलयतां वशीकुर्वतां गणयतां वा मध्ये कालोहं मृगेंद्रः सिंहः ॥३०॥ पवन इति पवतां पावयितॄणां वेगवतां वा वायुरस्मि रामो दाशरथिः यद्वा परशुरामः झषाणां मत्स्यानां मध्ये मकरो मत्स्यविशेषोहं स्रोतसां तत्र वाहोदकानां मध्ये भागीरथी ॥३१॥ सर्गाणामिति सृज्यन्त इति सर्गा आकाशादयः तेषामादिरन्तश्च मध्यं चैवाहं अहमेवादिश्च मध्यं

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥२८॥ अनंतश्चास्मि नागानां वरुणो यादसामहं पितॄणामर्यमा चास्मि यमः संयमतामहं ॥२९॥ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं मृगाणां च मृगेंद्रोहं वैनतेयश्च पक्षिणां ॥३०॥ पवनः पवतामस्मि रामः शस्त्रभृतामहं झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥३१॥ सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन ॥ अध्यात्मविद्या विद्यानां वादः प्रवदतामहं ॥३२॥

संचैवेत्थं स्रष्टृत्वादिकानंतं पारमैश्वर्यमुक्तं । अत्रतूत्पत्तिप्रलयस्थितयो मत्त एव निखिलेन मध्ये याः तत्तु च्युत इति विशेषः । अध्यात्मविद्या आत्मविद्याहं प्रवदतां वादिनां संबंधिनो वादजल्पवितंडाख्यास्त्रिविधाः कथास्तासां मध्ये वादोहं यत्र द्वाभ्यामपि प्रमाणतस्तर्केण च स्वपक्षः स्थाप्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तत्पक्षं दूषयति न तु स्वपक्षं साधयति सा वितंडा नाम कथा तत्र जल्पवितंडे विजिगीषमाणयोर्वादिनोः सत्त्वपरीक्षामात्रफले वादस्तु वीतरागयोः शिष्याचार्ययोर

॥भी॰गी॰टी॰ वेदानामिति ॥ वासवः इंद्रः भूतानां सर्वभूतानां चेतना ज्ञानशक्तिरहमस्मि ॥ २२ ॥ रुद्राणामिति यक्षरक्षसामिति गक्षसा नाम पि
॥१०२०॥ क्रूरत्वा हिंसाप्याय देहे मैहे कीट्कस्य निर्देशः तेषां मध्ये वित्तेशः कुबेरोस्मि पावकोग्निः शिखरिणां शिखरवतां वह्निना नीम
ध्येमेरुः ॥ २३ ॥ पुरोधसामिति पुरोधसां मध्ये देवपुरोहितत्वान्मुख्यं बृहस्पतिं मां विद्धि सेनानीनां मध्ये स्कंदो सेनायति स्कंदो
हमस्मि सरसां स्थिरजलाशयानां मध्ये समुद्रोस्मि ॥ २४ ॥ महर्षीणामिति गिरां वाचांपदात्मिकानां मध्ये एकमक्षरमोंकार
वेदानां सामवेदोस्मि देवानामस्मि वासवः ॥ इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥ रुद्राणां शंकरश्चास्मि
वित्तेशो यक्षरक्षसां ॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहं ॥ २३ ॥ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं
सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥ २४ ॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं ॥ यज्ञानां जपयज्ञो
स्मि स्थावराणां हिमालयः ॥ २५ ॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धा
नां कपिलो मुनिः ॥ २६ ॥ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ॥ ऐरावतं गजेंद्राणां नराणां च नराधिपं
राख्यं पदमस्मि ॥ २५ ॥ अश्वत्थ इति ॥ देवा एव संतो मंत्रदर्शनेन ये ऋषित्वं प्राप्तास्तेषां मध्ये नारदोस्मि सिद्धा ॥२॥ ॥रामः॥
नामुत्पत्तित एवाधिगतपरमार्थानां कपिलाख्यो मुनिरस्मि ॥ २६ ॥ उच्चैःश्रवसमिति ॥ अमृतार्थं क्षीराब्धिमथ्यमान ॥१९०॥
उद्भूतः उच्चैःश्रवसं नाम अश्वं मा विद्धि अमृतोद्भवमिति सर्वत्र ऐरावतादावपि संबध्यते नराधिपं राजानं मां विद्धि
॥ २७ ॥

एवंप्रार्थितस्सन् श्रीभगवानु॰।हंतेति।हंत ते इत्यनुकंपासंबोधने दिव्याः स्वमयाविभूतयस्ताः प्राधान्येन तुभ्यं कथयिष्या
मि यतो यासां विभूतिविस्तरस्यांतो यस्मात्तो नास्तीति अतः प्रधानभूताः काश्चिद्विभूतीः कथयिष्यामि।१९।तत्र प्रथममैश्व
रूपं कथयति।।अहमिति हे गुडाकेश सर्वेषां भूतानामाशयेषु अंतःकरणेषु सर्वज्ञत्वादिगुणैर्नियंतृत्वेनावस्थितः प
रमात्माहं।आदिर्जन्म मध्यं स्थितिः।अंतः संहारः सर्वभूतानां जन्मादिहेतुश्चाहमित्यर्थः।।२०।।इदानीं विभूतीः कथ
यति।।आदित्यानामित्यादिना यावदध्यायसमाप्ति।।आदित्यानां द्वादशमध्ये विष्णुर्वामनोहं ज्योतिषां प्रकाशकानाम

श्रीभगवानुवाच।हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।।प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे।।१९।।अह
मात्मा गुडाकेश सर्वभूताशयस्थितः।अहमादिश्च मध्यं च भूतानामंत एव च।।२०।।आदित्यानामहं विष्णुर्ज्योति
षां रविरंशुमान्।।मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी।।२१।।

अंशुमान् विश्वव्यापिरश्मियुक्तो रविः सूर्योहं
मरुतां वायूनां मध्ये मरीचिनामाहमस्मि यद्वा सप्त मरुद्गणा एव विशेषास्तेषां मध्ये इति नक्षत्राणां मध्ये चंद्रोहं अ
त्र चादित्यानामहं।विष्णुरित्यादिषु यत्र निर्धारणे षष्ठी क्वचिच्च भूतानामस्मि चेतनेत्यादिषु संबंधे षष्ठी तत्र
तत्रैव वक्ष्यिष्यामः विष्णुरित्यादिषु च नारेष पिष्ठ भावत्निशयमात्रविवक्षया विभूतित्वेन निर्दिश्यते अतः प
रं चाध्यायसमाप्तिपर्यंतं विभूतिचिंतनमात्मास्मावमः।२१।।आवहः प्रवहः विवहः परावहः उद्वहः संवहः परिवह इति
मरुद्गणाः।।२१।।

॥गी॰टी॰॥
॥१०८॥

किंजाहि स्वयमिति। स्वयमेव त्वमेवात्मानं वेत्थ जानासि नान्यः। तदप्यात्मनात्मनैव वेत्सि न साधनान्तरेण। अन्यथा माद्दरेणवद्धा संबोधयति हे पुरुषो
त्तम पुरुषोत्तम हे हेतुगर्भाणि संबोधनानि। हे भूतभावन भूतोत्पादक। भूतानामीश नियन्तः। देवानामादित्यादीनां देव प्रकाशक जगत्पते विश्वपाल
क। १५ यस्मात्त्वमासि अतः त्वमेव वेत्सि न त्वादृशस्तस्माद्वक्तुमर्हसीति। याश्चात्मनस्तव दिव्या अत्यद्भुता विभूतयस्ताः सर्वा अनुकूलमेवार्हसि याभ्यो
सि याभिरिति विभूतीनां विशेषणं स्पष्टार्थं। १६। कथयन प्रयोजनं दर्शयन प्रार्थयते कथं विद्यामिति द्वाभ्यां। हे योगिन् कथं केन विभूतिभेदेन सदा परि

॥ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम। भूतभावन भूतेश देवदेव जगत्पते। १५। वक्तुमर्हस्यशेषेण दिव्या ह्यात्मवि
भूतयः। याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि। १६। कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्। केषु केषु
च भावेषु चिन्त्योऽसि भगवन्मया। विस्तरेणात्मनो योगं विभूतिं च जनार्दन। भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मे

चिन्तयन्नहं त्वां विद्यां जानीयां विभूतिभेदेन चिन्त्योऽपि त्वं केषु केषु पदार्थेषु मया चिन्तनीयोऽसि। १७। तत्सर्वं सहि मे त्वोऽपि चिन्तितनीनं विभूतिभेदेन त्वचि
ते कथमाभवेत्तथा विभूतिभेदेन चिन्त्योऽपि त्वं केषु पदार्थेषु मया चिन्तनीयोऽसि। १७। तत्सर्वं सहि मे त्वोक्तं तेषां कथयेत्याह विस्तरेणेति। आत्मनस्तव
योगं सर्वज्ञत्वसर्वशक्तित्वादिलक्षणं योगैश्वर्यं विभूतिं च विस्तरेण पुनः। कथय पुनः हि यस्मात्त्वद्वाक्यामृतं पिबतो मम तृप्तिर्नास्त्यतो ब्रूहि

॥राम॥
॥१०८॥

उद्धियोगं दत्त्वा चतस्यानुभव पर्यन्तमापाद्या ऽविद्याकृतं संसारं नाशयामीत्यास्तेषामिति तेषामनुकंपार्थमनुग्रहार्थमेवाज्ञानाज्जातं तमः संसारा
ख्यं नाशयामि॥ कुत्र स्थितः सन् केन वा साधनेन तमो नाशयसीत्यत आह॥ आत्मभावस्थः बुद्धिवृत्तौ स्थितः॥ सन् भावनाविस्फुरताज्ञानलक्षणेन दी
पेन नाशयामि॥११॥ संक्षेपेणोक्ता विभूतीर्विस्तरेणाजिज्ञासुर्भगवन्तं स्तुवन्॥ अर्जुन उवाच परं ब्रह्मेति सप्तभिः परं ब्रह्म च परं धाम च आश्रयः॥
परमं च पवित्रं भवानेव कुत इत्यत आह॥ यतः शाश्वतं नित्यं पुरुषं पातपादिव्यं द्योतनात्मकत्वप्रकाशश्च॥ आदिश्चासौ देवश्चेति देवानामादिम्

तेषामेवानुकंपार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥११॥
॥अर्जुन उ०॥ परं ब्रह्म परं धाम पवित्रं परमं भवान्। पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं॥
॥१२॥ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा। असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे॥
सर्वमेतदृतं मन्ये यन्मां वदसि केशव॥ न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः॥१४॥

मित्यर्थः तथा अजं अजन्मानं विभुं च व्यापकं च अमेवाहुः॥१२॥ के ते ऋषयः भृग्वादयः सर्वे देवर्षिश्च नारदः॥ असितश्च देवलश्च व्यासश्च स्वयं त्वमेव च माक्षात्मम
ब्रवीषि॥१३॥ अतो ममेदानीं त्वदैश्वर्यसंभावनानिदर्शनमाह सर्वमिति॥ एतत्सर्वं यन्मां परं ब्रह्मेत्यादि सर्वमपि ऋतं सत्यं मन्ये यन्मां प्रति त्वं कथ
यसि न नो विदुः सुरासुरादीनां दर्शितमप्येव सत्यमहं न्यमाह न हीति॥ हे भगवन् तव व्यक्तिं देवा न विदुः॥ असमदनुग्रहार्थमियमपि व्यक्तिरिति न मतं

यथोक्तं विभूत्यादितत्वज्ञानस्य फलमाह एवमिति ॥ एवं भगवादिलक्षणं मम विभूतिं योगं चैश्वर्यं लक्षणं तत्त्वतो यो वेत्तिः स्तनि। घं सन्नियोगेन सद्दाम्यदृष्टीनेनयुक्ते। न भवति नास्त्यत्र सं
शयः ॥७॥ यथा विधियोगयैर्ज्ञानेन सम्यक्ज्ञानं वा प्रियस्त ईशीयति ॥ अहमिति चतुर्भिः ॥ अहं च सर्वस्य जगतः प्रभवः भगवादिमन्वादिरूपविभूतिद्वारेणोत्पत्तिहेतुः ॥ मत्त एव चास्य
बुधिर्ज्ञानमसंमोहइत्यादि सर्वं प्रवर्त्तत इति ॥ एवं मत्वा बुधा बुधाः विवेकिनो भावसमन्विता प्रीतियुक्ता मां भजन्ते ॥८॥ प्रीतिपूर्वकं भजनमेवाह मच्चित्ता इति मय्येव चित्तं

एवां विभूतिंयोगं च मम यो वेत्ति तत्त्वतः ॥ सोऽविकंपेन योगेन युज्यते नात्र संसयः ॥७॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥८॥ मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परं ॥ कथयन्तश्च मां नित्यं तुष्यन्ति
च रमन्ति च ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ॥ ददामि बुधियोगं तं येन मामुपयान्ति ते ॥१०॥ श्रीरामायनमोनमः ॥

येषां ते मच्चित्ताः मामेव गताः प्राप्ताः प्राणा इन्द्रियाणि येषां ते मद्गतप्राणाः मद्दर्शनं विना जीवनाहर्तिया ॥ एवंभूतास्तु बुधाः ॥ अन्योन्यं मानयोर्येतैः श्रुत्यादिप्रमाणैर्बोधयन्तः
संकीर्त्तयन्तः सन्तः नित्यं तुष्यन्ति ॥ अनुमोदनेन तुष्टिं यान्ति रमन्ति च निर्वृतिं यान्ति ॥९॥ एवंभूतानां च सम्यक्ज्ञानमहं ददामीत्याह तेषामिति ॥ एवं सततसत्यतयुक्तानां म ॥राम॥
य्यासक्तानां प्रीतिपूर्वकं भजतां तं बुधिरूपं योगमुपायं ददामि तिष्ठान्तमितेकं ॥ येन ते भक्ता मां प्राप्नुवन्तिः ॥१०॥ श्रीरामायनमोनमः ॥ श्रीरामायनमः ॥ राम॥ ॥१०८॥

लोमहेश्वरतामेव स्फुटयति बुधिरिति त्रिभिः । बुद्धिः सारासारविवेकेनैपुणं । ज्ञानमात्मविषयं असंमोहो व्याकुलत्वाभावः क्षमा सहिष्णुत्वं सत्यं यथार्थभाष
णं दमो बाह्येंद्रियाणि संयमः शमोंतःकरणसंयमः सुखमनुकूलसंवेदनीयं । दुःखं तद्विपरीतं भव उद्भवः । अभावस्तद्विपरीतः भयं त्रासः अभयं तद्विपरीतं । अ
स्पत्ता कस्पेतरेऽमन्त एवमवंतीत्यनेनान्वय ।४। किंच । अहिंसेति । अहिंसा परपीडानिवृत्तिः । समता रागद्वेषादिराहित्यं तुष्टिर्दैवलब्धेन संतोषः तपः शरीरशोषणं दा

बुधिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥४॥ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ॥ भवं
ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५॥ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ॥ मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥६॥

नां न्यायार्जितस्य धनादेः पात्रे समर्पणं यशः सत्कीर्तिः । अयशो दुष्कीर्तिः । बुध्येमतां मिमादयस्तद्विपरीतान्ताश्च बुद्ध्यादयो नानाविधिभावाः प्राणिनां मत्तः एका
शादेव भवंति ।५। किंच महर्षय इति । सप्त महर्षयो भृग्वादयः । सप्त ब्रह्माण इत्येते वै पुराणे निश्चयं गता इत्यादि पुराणप्रसिद्धाः । तेभ्योऽपि पूर्वे चत्वारो महर्षयः सनकादयः ।
तथा मनवः स्वायंभुवादयः मदीयो भावः प्रभावो येषां ते हिरण्यगर्भात्मनो ममैव मानसः संकल्पमात्राज्जाताः प्रभावमेवाह येषां भृग्वादीनां सनकादीनां च मनूनां च इमा ब्राह्मणाद्या लो
के वर्तमानाः यथायथं पुत्रपौत्रादिरूपाः शिष्यप्रशिष्यादिरूपाश्च प्रजाः जाताः प्रवर्तंते ६॥

उक्ताः संक्षेपतः पूर्वं सप्तमादौ विभूतयः दशमे प्रविततास्ताः सर्वत्रेश्वरदृष्टये। एवं तावत्सप्तमादिभिस्त्रिभिरध्यायैर्भजनीयं परमेश्वरतत्त्वं निरूपितं। तद्विभूत
यश्च सप्तमे रसोऽहमप्सु कौन्तेयेत्यादिना संक्षेपतो दर्शिता। नवमे चाहं क्रतुरहं यज्ञ इत्यादिना। अथेदानीं ता एव विभूतीः प्रपंचयिष्यन् तस्य भक्तोऽश्रव
णं पंचकरणीयत्वं करोपि ख्यातं। श्रीभगवानुवाच। भूय एवेति। महातोऽपुद्धासि वर्धमानपाने महात्मनि च ये यांचत्कुशलो बाहू यस्य हे महाबाहो भूय
एव मनः रपि मे वच। शृणु कथंभूतं परमं परमात्मनिष्ठं मदुक्तं मे अमृतेनेव प्रीतिं प्राप्नुवते ते तुभ्यं हितकाम्यया हितेच्छया पापहं वक्ष्यामि तत् १

॥श्रीभगवानुवाच॥ भूय एव महाबाहो शृणु मे परमं वचः॥ यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्य
या॥१ न मे विदुः सुरगणाः प्रभवं न महर्षयः॥ अहमादिर्हि देवानां महर्षीणां च सर्वशः॥२॥ यो
यो मामजमनादिं च वेत्ति लोकमहेश्वरं॥ असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥३॥ श्रीराम॥

णानंतिष्ठतीत्यर्थः॥ नदुर्लभं योगाशास्त्रस्तु सत्तसाहृनिशत्तवुसाकारतया स्थितिः यासांप्रज्ञातनामा सो समाधिरभिधी
यत इति॥ ३५॥ एतावास्मिल्लहनिश्चयइत्याह असंयतात्मनेति॥ अभ्यासवैराग्याभ्यामसंयत आत्मा चि ॥रा॰म॥
त्तं यस्य तेन पुंसा योगो दुःप्राप इति मे मतिः अभ्यासवैराग्याभ्यां वशीवर्ती आत्मचित्तं यस्य तेन पुनः प्रयत्ने ॥९०॥
वोपायेन प्रयत्नं कुर्वतो योगः प्राप्तुं शक्यः॥ ३६॥

अभ्यासवैराग्याभावेन कथमप्राप्तसम्यक्ज्ञानः किं फलमाप्नोत्यर्जुन उवाच अयतिरिति ॥ प्रथमं श्रद्धयोपेत एव योगे
प्रवृत्तः न तु मिथ्याचारतया ततः परं तु अयतिः न सम्यग्यतते शिथिलाभ्यास इत्यर्थः तथा योगाच्चलितं मानसं विषयप्र
वणं चित्तं यस्य मन्दवैराग्य इत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्य संसिद्धिं फलं ज्ञानमप्राप्य कां गतिं प्राप्नोति
३७ ॥ अस्याभिप्रायं विवृणोति कच्चिदिति कर्मणामीश्वरेऽर्पितत्वात्तदनुष्ठानाच्च न तावत्कर्मफलं स्वर्गादिकं प्रा

अर्जुन उ० ॥ अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥
कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥ एतन्मे सं
शयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

प्नोति योगानिष्पत्तेश्च न
मोक्षं प्राप्नोति ॥ एवमुभयभ्रष्टः ॥ अप्रतिष्ठो निराश्रयः अत एव ब्रह्मणः प्राप्त्युपाये पथि मार्गे विमूढः
सन् कच्चित् किं नश्यति किं वा न नश्यतीत्यर्थः नाशे दृष्टान्तः यथा छिन्नमभ्रं पूर्वस्मादभ्राद्विच्छिन्नमभ्रान्तरं चा
प्राप्तं सन्मध्य एव विलीयते तद्वदिति त्वयैवं सर्वज्ञेनायं मम संदेहो निरसनीयः त्वत्तोऽन्यस्तु संदेहनिवर्तको ना
स्तीत्याह एतन्मे इति एवं त एनं छेत्ता निवर्तकः स्पष्टमन्यत् ॥ ३८ ॥ ३८ ॥ ३८ ॥ ३८ ॥ ३९ ॥ ३९ ॥

॥गी॰टी॰
॥८१॥

अत्रोत्तरं॥श्रीभगवानु॰॥ पार्थेति सार्द्धैश्चतुर्भिः इहलोके नाशः उभयभ्रंशात्पातित्यं अमुत्र परलोके नाशो नरकप्राप्तिः
तदुभयं तस्य नास्त्येव यतः कल्याणकृत् शुभकारी कश्चिदपि दुर्गतिं न गच्छति॥ अयं च शुभकारी श्रद्धयोपायेप्रवृत्तत्वात्
तेनाति लोकारी सा पलालयत्नसंधयति॥४०॥ तर्हि किमसौ प्राप्नोतीत्यपेक्षायामाह प्राप्येति॥ पुण्यकारिणामश्वमे
धयाजिनां लोकान्प्राप्य तत्र शाश्वतीः समा बहून्संवत्सरानुषित्वा तान्सुखमनुभूय शुचीनां सदाचाराणां श्रीमतां
धनिनां गेहे स योगभ्रष्टो जन्म प्राप्नोति॥४१॥ अल्पकालाभ्यस्तयोगभ्रंशे गतिरियमुक्ता चिराभ्यस्तयोगभ्रंशे तु पक्षान्तरमा

॥श्रीभगवानु॰॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते॥ नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति॥४०॥ प्राप्य पु
ण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते॥४१॥ अथवा योगिनामेव कु
ले भवति धीमतां॥ एतद्धि दुर्लभतरं लोके जन्म यदीदृशं॥४२॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं॥ यतते च ततो भू
यः संसिद्धौ कुरुनंदन॥४३॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः॥३

अथवेति योगनिष्ठानां धीमतां ज्ञानिनां
ज्ञानिनामेव कुले जायते न तु पूर्वोक्तानामनारूढयोगानां कुले॥ एतज्जन्मसोति इह शंयद हतजन्मरानहि लोके दुर्ल
भतरं मोक्षहेतुत्वात्॥४२॥ ततः किमत आह तत्रेति सार्द्धेन तत्र द्विप्रकारेपि जन्मनि पूर्वदेहभवं पौर्वदेहिकं तमेव ब्र
ह्मविषयया बुद्ध्या संयोगं लभते॥ ततश्च भूयोधिकं संसिद्धौ मोक्षे निमित्तं प्रयत्नं करोति॥ तत्र हेतु॥ तेनैव नष्टदेहकृताभ्या ॥राम॥
सेन त्ववशोपि कुतश्चिदंतरायादनिच्छन्नपि संह्रियते विषयेभ्यः परावर्त्य ब्रह्मनिष्ठः क्रियते॥४३॥ श्रीकृष्णायनमः॥ ॥८१॥

तदेवं पूर्वाभ्यासवशेन प्रयुक्तः कुर्वन् शनैर्मुक्त अनन्तनिमदर्थे केमुत्य माप्नोनस्फुटयन्नसार्द्धेन जिज्ञासुरिति योगस्यस्वरूपं जिज्ञासुकरेकेवलं ननु प्राप्तायोगः। एवंभूतेयोगे प्रविष्टमात्रो
पियासवसी योगभ्रष्टोपिया यवसी योगभ्रष्टोपि। शब्दब्रह्मवेदमतिवर्तते वेदोक्तकर्मफलत्वान्प्रतिक्रमतिते। भ्योधिकं फलं प्राप्यमुच्यत इत्यर्थः॥ ४४॥ यद्येवं मंद प्रयत्नो
पि योगी परांगतिं याति तदा प्रयत्नादुत्तरोत्तरमधिकं मोसेयत्नं कुर्वन्योगेनैव संसिद्ध कल्पे विद्धुनायापः॥ सोनेकुजेन्मस्वपि चतेन योगेन सिद्धिस्तस्य

जिज्ञासुरपि योगस्य शब्दब्रह्मा निवर्तते॥ ४४॥ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः॥ अनेकजन्मसंसिद्धेस्ततो याति परांगतिं॥ ४५॥ तपस्विभ्योधिको
योगी ज्ञानिभ्योपि मतोधिकः॥ कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ ४६॥ योगीनामपि सर्वेषां मद्गतेनांतरात्मना श्रद्धावान्भजते यो मां स मे यु
क्ततमो मतः॥ ४७॥ इति श्री भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठमोध्यायः॥ ६॥ श्री॥ ॥

चित्तेन्योगेन शोशिधि सम्यकृतानो भत्वा ततश्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः। ४५ यस्मादेवं तस्मात् तपस्विभ्यः कृच्छ्रचांद्रायणादितपोनिष्ठेभ्यः। ज्ञानिभ्यः शास्त्रज्ञानवद्भ्योपि कर्मिभ्य इ
ष्टापूर्तकारिभ्योपि योगी श्रेष्ठोभिमतः तस्मात्त्वं योगीभव ४६ योगिनामपि मध्ये मद्भक्तः श्रेष्ठ इत्याह योगिनामिति मद्गतेन मय्यासक्तेन मय्यासक्तेनांतरात्मनामनसा सो
परमेण श्रद्धया युक्तः सन्भजते स योगयुक्तेषु श्रेष्ठो मम संमतः॥ ततो मद्भक्तो भवेति भावः॥ ४७॥ अनेन योगमवोज्ञद्योमक्तियोगाधिरोमसिं॥ तं वेदं यस्मानंदमाधवं भक्त्या शेनधि॥ ४७॥ इत्यध्यायः॥ ६॥

॥भा॰सै॰॥

॥ ९२॥

विते यमात्मनस्तत्वं सयोगं समुदीरितं॥ भजनीयमथेदानीमैश्वरं रूपमीर्यते॥ १॥ पूर्वाध्यायान्ते मद्गतेनान्तरात्मना योमां भजते स मे युक्ततमो मत इत्युक्तं तत्र कीदृशस्त्वं यस्य भ
क्तिः कर्तव्येत्यपेक्षायां स्वस्वरूपं निरूपयन् ॥ श्रीभगवानुवाच मय्यासक्तमना इति॥ मयि परमेश्वरे आसक्तमभिनिविष्टं मनो यस्य सः मदाश्रयः अहमेवाश्रयो यस्य अ
नन्यशरणः सन् योगं युंजन् अभ्यसन् असंशयं यथा भवत्येवं मां समग्रं विभूतिबलैश्वर्यादिसहितं यथा ज्ञास्यसि तदिदं मया वक्ष्यमाणं शृणु॥ १ वक्ष्यमाणं स्तौति ज्ञानमिति

॥श्रीभगवानुवाच॥ मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः॥ असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥ १॥ ज्ञानं तेहं सविज्ञानमिदं वक्ष्याम्यशेषतः॥ यज्ज्ञात्वा नेह भू
योन्यज्ज्ञातव्यमवशिष्यते॥ २॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ ३॥ श्रीकृष्णः शरणं मम नित्यं परमात्मा॥

ज्ञानं शास्त्रीयं विज्ञानमनुभावस्तत्सहितं इदं मद्विषयं अशेषतो वक्ष्ये॥ सा कल्येन वक्ष्यामि यत् ज्ञात्वा इह श्रेयोमार्गे वर्तमानस्य पुनरन्यत् ज्ञातव्यमवशिष्टं न भवति॥ ततैव कृतार्थो
भवतीत्यर्थः॥ मम भक्तिं विना तु मत्ज्ञानं दुर्लभं इत्याह मनुष्याणामिति॥ असंख्यातानां जीवानां मध्ये मनुष्यव्यतिरिक्तानां श्रेयसि प्रवृत्तिरेव नास्ति॥ मनुष्याणां च सहस्रेषु मध्ये कश्चिदेव पू
र्वकृतपुण्यवशात् सिद्धये आत्मज्ञानाय यतते॥ प्रयत्नं कुर्वतामपि सहस्रेषु कश्चिदेव पूर्वकृतपुण्यवशात्॥ आत्मानं दृष्ट्वा तादृशानां चात्मज्ञानिनां सहस्रेषु कश्चिदेव मां परमात्मा

॥ राम॥

॥ ९२॥

नमस्कारोहं न सा ते लोते विद्यते हैतव्य मित्युक्तं अस्य मित सहृत्यानां तत्र मस्ततं कामस्य शब्दः ॥३॥

एवंश्रोतारमभिमुखीकृत्य महाप्रास्रष्टादिकर्तृत्वेनपरवृत्तत्वं प्रकृतितानं निरूपमाहस्थूलसूक्ष्मभेदेन प्रकृतिद्वयमाह ॥ भूमिरितिद्वाभ्यां भूम्यादिश
ब्दैः ॥ पंचगंधादीनितन्मात्राण्युच्यन्ते ॥ मनःशब्देनतत्कारणभूतोहंकारः बुद्धिशब्देन तत्कारणंमहत्तत्वं ॥ अहंकारशब्देनतत्कारणमविद्यासंयुक्तमव्यक्तमित्यय
द्वाभूम्यादिशब्दैः ॥ पंचैव महाभूतानि सूक्ष्माणि ॥ संहैकीकृत्यगृहीतानि रूपं प्रधानं तदुपकारकत्वेनकार्यमेकं निर्मायत्वाच्छक्तिरष्टधाभिन्ना विभागंप्राप्ता ॥ चतुर्विंश

भूमिरापोनलोवायुः खंमनोबुद्धिरेव च ॥ अहंकार इतीयंमे
भिन्नाप्रकृतिरष्टधा ॥ ४ ॥ अपरेयमितस्त्वन्यांप्रकृतिं
विद्धिमेपराम् ॥ जीवभूतांमहाबाहोययेदंधार्यतेजगत् ॥ ५ ॥

तिभेदभिन्नैवेमस्येम्यां गर्भानविधस्यपाक्स्थायाष्टधाभिन्नोपक्रांतयावस्थमानस्ये चाध्यायेसमासेनैवपठितं चतुर्विंशतितत्वात्मनाप्रपंचयिष्यति महाभू
करोबुधिरव्यक्तमेव च ॥ इंद्रियाणिदशैकं च पंच चेंद्रियगोचराइति ॥ ४ ॥ अपरामिमांप्रकृतिमुपसंहरन्परांप्रकृतिमाह ॥ अपरेति ॥ अष्टधोक्तायाप्रकृतिः इय
मपरानिकृष्टानजडत्वात्परार्थत्वाच्च ॥ इतस्तुसकाशादन्यांमत्स्वरूपां ॥ अत्र मांजीवभूतांमम प्रकृतिं जानीहि ॥ ५ ॥ ॥ १ ॥ ॥ १ ॥ ॥ १ ॥

अनयोः प्रकृतित्वं दर्शयन् स्वस्वतरद्वाभ्यामस्याद्दिकारनत्वमाह एतद्दिति एते क्षेत्रक्षेत्रज्ञरूपे प्रकृती योनी कारणभूते येषां तानि एतद्योनी
निस्थावरजंगमात्मकानि सर्वाणि भूतानि इत्युपधारय बुध्यस्व तत्र जडा प्रकृतिर्देहरूपेण परिनमते चेतनानुमहं शाश्वते भोक्तृत्वेन देहेषु प्रविश्य स
कर्मनतानि धारयति । नेवमहीये प्रकृती मत्तः संभूते अतो हमेव कृत्स्नस्य प्राकृतिकस्य जगतः ॥ प्रभवः प्रकर्षेण भवत्यस्मादिति प्रभवः परं का
रणमहमित्यर्थः ॥ तथा प्रलीयते नेनेति प्रलयः ॥ संहर्ताप्यहमेवेत्यर्थः ॥ ६ ॥ यस्मादेवं तस्मान्मत्तः इति ॥ मत्तः सकाशात्परं अन्यत् जगतः स्

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि
सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥ रसोहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः ॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

ष्टिसंहारयोः स्वतंत्रं कारणं किंचिदपि नास्ति स्थितिहेतुरप्यहमेवेत्याह मयि सर्वमिदं प्रोतं ग्रथितं आश्रितमित्यर्थः ॥ दृष्टांतद्वयः जगतः स्थिति ॥ राम ॥
निहेतुत्वं प्रपंचयति रसोहमिति पंचभिः ॥ अप्सु रसोहं रसतन्मात्ररूपया विभूत्या अप्सु तेनाप्सु स्थितोहमित्यर्थः ॥ तथा शशिसूर्ययोः प्रभास्मि चंद्रार्के
षु प्रकाशरूपया विभूत्या तदाश्रयत्वेन स्थितोहमित्यर्थः ॥ सर्वेषु वेदेषु वैखरीरूपेषु तन्मूलभूतः प्रणवः ओंकारोस्मि ॥ खे ॥ टी ३ ॥
आकाशे शब्दः तन्मात्ररूपोस्मि नृषु पौरुषं उद्यमोस्मि ॥ उद्यमे हि पुरुषाः स्थिताः इति ॥ ८ ॥ श्रीमते रामानुजाय नमः ॥ रामाय नमो नमः ॥

किं च पुण्य इति पुण्योऽविकृतो गंधो गंधतन्मात्रं पृथिव्या आश्रयभूतमहमित्यर्थः ॥ यद्वा विभूतिरूपेण प्राधान्येनास्य विवक्षितत्वात्सुरभिगंधस्यै
वोल्लेखस्तथा विभूतित्वात्पुण्यो गंध इत्युक्तं ॥ तथा विभावसावग्नौ यत्तेजः सहजा दीप्तिः सा अहं ॥ सर्वभूतेषु जीवानां प्राणधारणं ॥ आयुरहमित्यर्थः
तपस्विषु वानप्रस्थादिषु द्वंद्वसहनरूपं तपोऽस्मि ॥ ९ ॥ किं च बीजमिति सर्वेषां चराचराणां भूतानां जीवनं बीजं कार्योन्मादनसमर्थं सनातनं नित्यं उ
त्पत्तिसर्वकार्येष्वनुस्यूतं रहदीमं भूतानिति विद्धि ॥ ननु प्रतिव्यक्ति विनश्यत्तत्कथं बुद्धिमतां बुद्धिः प्रज्ञाहमस्मि तेजस्विनां तेजः प्रगल्भ्यमहं ॥ १० ॥ किं

पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं ॥ बलं बलवतां चाहं कामरागविवर्जितं ॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

च बलमिति काम आप्राप्ते वस्तुन्यभिलाषो रागस्तु प्राप्ते पुनरभिलषिते प्राप्ते नित्युनरधिके चेतविनरं विजने अनात्मकस्तृष्णायरूपे ये पन्नाम न साभ्यां विव १४
र्जितं बलमहमस्मि सात्विकं स्वधर्मानुष्ठानसामर्थ्यमहमित्यर्थः ॥ धर्मेण विरुद्धः स्वदारेषु पुत्रोत्पत्तिमात्रोपयोगी कामोऽहं ॥ ११ ॥ किं च ये चेति ये
चान्येऽपि सात्विका भावाः शमदमादयः राजसाश्च हर्षदर्पादयः ॥ तामसाश्च शोकमोहादयः ॥ प्राणिनां स्वकर्मवशाज्जायंते ॥ तान्मत्त एव
जातान् इति विद्धि मदीयप्रकृतिगुणकार्यत्वात् एवमपि तेष्वपि अहं न वर्ते जीववत् तदधीनोऽहं न भवामीत्यर्थः ते तु मदधीनाः संतो मय्येव वर्त

एवंभूतं त्वां परमेश्वरमयं जनः॥ किमिति न जानातीत्याह त्रिभिरिति त्रिभिस्त्रिविधैरेभिर्भावैः क्रोधकामलोभादिभिर्गुणमयैर्गुणविकारैर्भा
वैर्मोहितं मिदं जगत् ।अतो मां नाभिजानाति। कथंभूतं एभ्यो भावेभ्यः परं एभिरसंस्पृष्टं ॥ एतेषां नियंतारं ॥अत एवाव्ययं निर्विकारमित्यर्थः १३ केन त
र्हि त्वां जनो जानातीत्यत आह॥ दैवीति दैवी अहो किकी अत्यद्भुतेत्यर्थः॥ गुणमयी सत्वादिगुणविकारात्मिका मम परमेश्वरस्य शक्तिर्माया दुरत्यया दुस्तरा हि प्र

॥ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ॥मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥१२॥ त्रिभिर्गुणमयैर्भावै
॥रेभिः सर्वमिदं जगत् मोहितं नाभिजानाति मामेभ्यः परमव्ययं ॥१३ दैवी ह्येषा गुणमयी मम माया दुरत्यया॥ मामेव
॥ये प्रपद्यंते मायामेतां तरंति ते॥ १४॥ न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः मायया पहृतज्ञाना आसुरं भावमा॥श्रिताः

सिद्धमेतत् ॥तथापि ये मामेवाव्यभिचारिण्या भक्त्या प्रपद्यंते भजंति ते मायामेतां दुस्तरामपि तरंति मम मां जानंतीति भाव॥ किमिति सर्वे त्वामेव जनं भजंतीति त ॥राम॥
त्राह न मामिति नरेषु अधमास्ते मां न भजंति॥ अधमत्वे हेतुः मूढा विवेकशून्याः न तु कृत ॥दुष्कृतिनः पापशीलाः अत एव मायया अपहृतं निरस्तं शास्त्राचा
जातमपि ज्ञानं येषां ते अत एवाहं भोदंभोमानक्रोधः पारुष्यमेव चेत्यादिना वक्ष्यमाणमासुरं भावं प्राप्तास्ततो न भावः भजंति ॥१५ ॥ ॥ ॥६४॥

तं सुकृतिनस्तु मां भजन्ति ते च सुकृततारतम्येन चतुर्विधा इत्याह चतुर्विधा इति पूर्वजन्मसु ये कृतपुण्या जनास्ते मां भजन्ति ते च चतुर्विधाः आ
र्तो रोगाद्यभिभूतः स यदि पूर्वं कृतपुण्यस्तर्हि मां भजति अन्यथा क्षुद्रदेवता भजन्नेव संसरति एवमुत्तरत्रापि द्रष्टव्यं जिज्ञासुरात्मज्ञानेच्छुः
अर्थार्थी अत्र वा परत्र वा भोगसाधनभूतार्थलिप्सुः ज्ञानी चात्मवित् १६ तेषां मध्ये ज्ञानी श्रेष्ठ इत्याह तेषामिति तेषां मध्ये ज्ञानी त
त्र हेतुः नित्ययुक्तः सदा मल्लिष्ठः एकस्मिन्नेव भक्तिर्यस्यतः इति ज्ञानिनो देहाद्यभिमानाभावेन चित्तविक्षेपाभावात् नित्ययुक्तस्य मेकां

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ १६ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशि ४
ष्यते प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः १७ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् आस्थितः स हि युक्तात्मा मामेवानुत्तमां ६६

तस्मादेतो नित्ययुक्तस्य हि विश्वतुसत्तमः इत्यर्थः १७ तर्हि किमितरे त्रयः संसरन्ति न हि न हीति सर्वे एवैते उदारा महान्तो मोक्षभाज एवेत्यर्थः ज्ञानी तु पु
नरात्मैवेति मे मतं निश्चयः यस्मात् स ज्ञानी युक्तात्मा मदेकचित्तः सन्ननुत्तमां सर्वोत्तमां गतिं मामेवास्थितः आश्रितवान् मद्भक्तिमप
र्थः ॥

॥भ॰ गी॰ टी॰॥ एवंभूतो मद्भक्तोऽतिदुर्लभ इत्याह बहूनामिति बहूनां जन्मनां किंचित्किंचित्पुण्योपचयेन अंते चरमे जन्मनि ज्ञानवान्सर्वमिदं चराचरं वासुदेव एवेति
॥२५॥ सर्वात्मदृष्ट्या मां प्रपद्यते भजति । अतः स महात्मा अपरिच्छिन्नदृष्टिः सुदुर्लभः ॥ १९ ॥ तदेवं कामिनोऽपि संतः कामप्राप्त्यर्थं परमेश्वरमेव ये भजं
ति ते कामान्प्राप्य शनैः मुच्यन्ते ये त्वन्ये राजसास्तामसाश्च कामाभिभूताः क्षुद्रदेवताः । ते संसरंतीत्याह कामैरिति चतुर्भिः तैस्तैर्भ

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिदं स महात्मा सुदुर्लभः ॥ १९ ॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ॥ तं
तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥

ये तु जना हि विषयैः कामैर्हृतविवेकास्ते तैः अन्याः क्षुद्रा भजन्ते प्रपद्यन्ते अन्यदेवता भजंतीति किं कृत्वा तत्तद्देवताराधने यो यो नियम उपवासादिलक्षणस्तं
तं नियमं स्वीकृत्य तत्रापि स्वकीयया प्रकृत्या पूर्वाभ्यासवासनया नियता वशीकृताः संतो देवतांतरविशेषं भजंते तेषां मध्ये ॥ २० ॥ यो य इति यो यो ॥राम॥
यां यां तनुं देवतारूपां मामेव मूर्तिं श्रद्धयार्चितुं प्रवर्तते तस्य तस्य भक्तस्य तत्तत्फलविषयां तामेव श्रद्धामचलां दृढामहं अन्तर्यामी विदधामि करोमि । ॥२५॥

ता: श्रद्धयेति स भक्तस्यायाः पृष्ठयाऽऽश्रद्धयायुक्तः ॥ तस्याः तन्नोराधनमीहते करोति ॥ ततस्तस्याः सकाशात् लभते कामान् ततो देवताविशेषाल्लभते किंतु मयैव

वतत्देवतान्तर्यामिणा विहितान् निर्मितान् हि स्फुटं एतत् देवतानां मदधीनत्वात् समस्तमिति भावेनर्थः ॥ २२ ॥ न देवं यद्यपि सर्वदापि देवतामेवमेव तत्तनमः अ

न्तवत्तु राधानमपि वस्तुतो मदाराधनमेव ॥ अहमेव तत्तत्फलदाता तथापि तुस्तस्मात् तदुक्तानां यतेषां तत्फलं सर्वेषामपि भवतीत्याह अन्तवदि

ति ॥ अल्पमेधसां परिच्छिन्नदृष्टीनां मयाराधनमपि तत्फलं अन्तवत् विनाशि भवति तत्र हेतुमाह देवान् यान्तीति देवयजः ॥ मद्भक्तास्तु अन्तवन्तो यान्ति

तया श्रद्धया युक्तस्तस्याराधनमीहते लभते च ततः कामान्मयैव विहितान् हि तान् ॥ २२ ॥ अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसां ॥ देवान्दे

वयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥ अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ॥ परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

मंतु अनन्तानन्दमनाद्यन्तं परमानन्दं प्राप्नुवंति ॥ २३ ॥ ननु च समाने प्रयासे महति सर्वेपि किमर्थं देवान्तराणि त्यक्त्वा त्वामेव भज

न्ति तत्राह अव्यक्तमिति अप्रपंचातीतं मां आत्मनो मनुष्यमत्स्यकूर्मादिभावं प्राप्तं मन्यन्ते अबुद्धयो मन्यन्ते ॥ तत्र हेतुः मम परं भावं स्वरूपमजानन्तः

कं तं अव्ययम् अनुत्तमं नित्यं परमात्मस्वरूपमजानन्तो गत्या स्वेच्छया लीलया विग्रहान् नाना विधान् भजिन स्वामिति मां परमेश्वरं कर्मनिर्मितमेति

कदेहं चदेवतान्तरं समं पश्यन्तो मन्दमतयो मानाश्रिया प्रसन्नाश्रिप्रफलदेवतान्तरं भजन्ति ते चाहमप्येनं न तत्फलं प्राप्नुवन्तीत्यर्थः ॥ २४

तेषां स्वात्मज्ञाने हेतुमाह नाहमिति ॥ सर्वस्य लोकस्य नाहं प्रकाशः प्रकटो भवामि ॥ किंतु मद्भक्तानामेवायं तो योगमायया समावृतः योगो युक्तिः मदीयः कोप्य
चिंत्यः प्रज्ञाविलासः स एव माया अघटमानघटीयसी तया संछन्नः अतः स्वमस्वरूपज्ञाने मूढः सन्नयं लोको अजमव्ययं मां न जानाति ॥ २५ ॥ सर्वज्ञत्वमम
स्वरूपमज्ञाने न हेतुरुक्तं ॥ न हेतु स्वस्य सर्वज्ञत्वमस्य मनावृतत्वात् पाक्षि तेन स्वर्थाय तस्य पाद्यत्वानमाह ॥ वेदेति समतीतानि विनिष्टानि वर्तमानानि च
भावीनि च त्रिकालवर्तीनि भूतानि स्थावरजंगमानि सर्वाणि अहं वेद जानामि ॥ मायाश्रयत्वात्मभास्यास्वाश्रयव्यामोहकत्वाभावात् इति भ्रमि

॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोयं नाभिजानाति लोको मामजमव्ययं २५ ॥
॥ वेदाहं समतीतानि वर्तमानानि चार्जुन ॥ भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥ द
॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ॥ सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥ २७ ॥ राम ॥ राम

मां तु न कोपि वेदेति मन्मायामोहितत्वात् नत्वस्मि धर्मलोपित्वे मायायाः ॥ स्वाश्रयाधीनत्वान्न मम व्यामोहकत्वं न ॥ २६ ॥ न केवलं मायाविषयत्वेन जीवा
नामप्यस्मत्स्वरूपज्ञानामुकरत्वं किं तर्हि इच्छाद्वेषसमुत्थेनेति ॥ सर्गे उत्पत्तिसमये ॥ स्थूलदेहोत्पत्तिसमये सर्गे ॥ सर्गस्थूलदेहोत्पत्तौ सत्यां
तो सत्यामनन्तरमनुकूले इच्छा प्रतिकूले च द्वेषः ताभ्यां समुत्थः समुद्भूतो यः शीतोष्णसुखदुःखादिद्वंद्वनिमित्तो मोहो विवेकभ्रंशस्तेन संमोहं महमेव सुखी दुःखीति

गाढं तमसि निवेशं प्राप्नुवंति ॥ तत्स्तन्निमत्तमाना
भावान्नमां भजन्ति निम्नाह २७॥

॥ राम ॥
९६ ॥

कुतस्तर्हि केचन त्वां भजन्तो दृश्यन्ते तत्राह ॥ येषामिति ॥ येषां तु पुण्याचरणशीलानां सर्वप्रतिबंधकं पापमंतगतं नष्टं ते द्वंद्वनिमित्तेन मोहेन निर्मुक्ता दृढव्रताः एका
न्तिनः संतो मां भजंति ॥२८॥ एवं च संभजतः सर्वे विविधार्थं विज्ञाय कृतार्था भवंतीत्याह जरामरणेति ॥ जरामरणयोर्निरासार्थं मामाश्रित्य ये प्रयतंते ते तत्परं ब्रह्म वि
दुः कृत्स्नमध्यात्मं च विदुः येन तत्प्राप्यते तं देहादिव्यतिरिक्तं शुद्धमात्मानं जानंतीत्यर्थः ॥ तत्साधनभूतमखिलं रहस्यं कर्म च जानंति ॥ न चैवंभूतानां यो

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणां ॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥२८॥ जरामरणमोक्षाय मामाश्रित्य यतंति ये ॥ ते
ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं ॥२९॥ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ॥ प्रयाणकालेपि च मां ते
विदुर्युक्तचेतसः ॥ इति श्रीमहाभारते भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे योगो नाम सप्तमोध्या
य ॥७॥

गभ्रंशसंकापीत्याह ॥ साधिभूताधिदैवमिति ॥ अधिभूताधिदैवाख्यानामर्थानामुत्तराध्याये व्याख्यास्यति ॥ अधिभूतेनाधिदैवेन च सह अधियज्ञेन च सहितं
ये मां जानंति ते युक्तचेतसः समाहितमनसः ॥ प्रयाणकालेपि मरणसमयेपि मां विदुर्न तु तदा व्याकुलीभूय मां विस्मरंति ॥ अतो मद्भक्तानां न योगभ्रं
शशंकेत्यर्थः ३० ॥ कृष्णभक्तैरयत्नेन ब्रह्मज्ञानमवाप्यते ॥३०॥ इति श्रीभगवद्गीतासूपनिषत्सु विज्ञानयोगाख्ये सप्तमे श्रीधरप्रकाशितसुबोधिन्यां सप्तमोध्यायः ॥७॥

॥भी॰ गी॰ टी॰॥ न केवलं मां स्मरन्मद्भावं प्राप्नोतीति नियमः॥ यं यं भावं देवतांतरं वा अन्यमपि अंतकाले स्मरन्देहं त्यजति तमेव स्मर्यमाणं भावं प्राप्नोति अंतकाले भावविप्राप्नोतीति हेतुः॥ सस्वभा

॥ ९८॥ वो भावना अनुचिंतनं तेन भावितो वासितश्चित्त॥६॥ यस्मात्पूर्ववासनैवांतकाले स्मृतिहेतुः॥ ननु तदा विवशस्य स्मरणोद्यमासंभवति॥ तस्मादिति॥ तस्मात्

सर्वेषु कालेषु मामनुस्मर चिंतय॥ संततं स्मरणं च चित्तशुद्धिं विना न भवति अतो युध्यस्व युध्यस्व चित्तशुध्यार्थकं स्वधर्मं चानुतिष्ठेत्यर्थः॥ एवं मय्यर्पितं मनः संकल्पा

यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरं॥ तं तमेवैति कौंतेय सदा तद्भावभावितः॥६॥ तस्मात्सर्वेषु कालेषु मा

मनुस्मर युध्य च मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः॥७॥ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना परमं पुरुषं दिव्यं याति पा

र्थानुचिंतयन्॥८॥

त्मकं॥ बुद्धिश्च अध्यवसायात्मिका यस्य स त्वं मामेव प्राप्स्यसि॥ असंशयः संशयोऽत्र नास्ति॥७॥ संततस्मरणस्य च अभ्यासोऽंतरंगं साधनमिति दर्शयन्नाह अभ्यासेति॥ अभ्यासः ॥राम॥

सजातीयप्रत्ययप्रवृत्तिः स एव योगः उपायस्तेन युक्तेन नान्यगामिना॥ अन्यत्र अन्यं विषयं गच्छतीत्येवंस्थितेन चेतसा दिव्यं द्योतनात्मकं परमेश्वरं चिंतयन् हे पार्थ ॥ ९८॥

तमेव याति॥८॥

पुनरप्यचिंतनीयं पुरुषं विशिनष्टि द्वाभ्यां कविमिति ॥ कविं सर्वज्ञं पुराणं अनादिसिद्धं ॥ अनुशासितारं नियंतारं अणोः सूक्ष्मादप्यणीयांतारं अणोः सूक्ष्माद् अप्यणीयांसं अतिसूक्ष्मं सर्वस्य धातारं पोषकं ॥ अपरिमितमहिमत्वादचिंत्यरूपं ॥ आदित्यवत्स्वपरप्रकाशात्मको वर्णः स्वरूपं यस्य तं तमसः प्रकृतेः परस्तात् वर्तमानं एवंभूतं पुरुषं प्रयाणकाले भक्त्या युक्तो निश्चलेन मनसा योऽनुस्मरेत् ॥ ९ ॥ मनोनैश्चल्ये हेतुः ॥ योगबलेन स्याकुसुषुम्नामार्गेन भ्रूमध्ये प्रा

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिंत्यरू-
पमादित्यवर्णं तमसः परस्तात् ॥ प्रयाणकाले मनसाचलेन भक्त्या युक्तो यो-
गबलेन चैव ॥ भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं
यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः ॥ यदिच्छंतो ब्रह्मचर्यं चरंति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥ श्रीरामायनमो नमः ॥ रामायनमो नमः ॥ राम ॥

णमावेश्येति ॥ स तं परं पुरुषं द्योतनात्मकं प्राप्नोति ॥ १० ॥ केषांचिदभ्यासयोगादपि प्राणवाधारणाभ्यासमंतरंगं विनसुः प्रतिजानीते यदक्षर-मितियदक्षरं वेदांतवदंति ॥ एतस्य वाक्यस्यास्य प्रशासनेगार्गि सूर्यचंद्रमसौ विधृतौ तिष्ठत इति श्रुतेः वीतरागा येऽभ्यासे यतयः प्रयत्नवंतो यद्विशंति ॥ यत् ज्ञातुमिच्छंतो गुरुकुले ब्रह्मचर्यं चरंति तत्ते तुभ्यं पदं गम्यतत्त्वमिति पदं प्राप्यं संक्षेपेण प्रवक्ष्ये तत्प्राप्त्युपायं कथयिष्यामीत्यर्थः ॥ ११

प्रतिज्ञातमुपायं योगमहत्त्वाभ्यासर्वेति। सर्वाणीन्द्रियद्वाराणि संयम्य प्रत्याहृत्य स्फुरादिभिर्बाह्यविषयग्रहणमकुर्वन्नित्यर्थः मनश्चहृदि निरुध्य वाह्यस्मरणमकुर्वन्नित्यर्थः मूर्धभ्रुवोर्मध्ये प्राणमाधाय योगस्य धारणां स्थैर्यमास्थित आश्रितवानस ॥१२॥ ओमित्येकाक्षरं तदेवब्रह्मवाचकत्वाद्ब्रह्मप्रतिमादिवत्ब्रह्मप्रतिकारात्ब्रह्मतत्व्याहरन्नुच्चारयन्। तद्वाच्यं चमामनुस्मरन्नेव देहं त्यजन्यः प्रकर्षेणायात्यर्चिरादिमार्गेणस परमांश्रेष्ठांगम

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च। मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥
॥ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥१३॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः। तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥ पुनः
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्। नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥

हुतां प्राप्नोति ॥१३॥ एवं चांतकाले धारणायामस्याप्तिर्नित्याभ्यासवत एव भवति नान्यस्येति पूर्वोक्तमेवानुस्मारयति। अनन्येति॥ नास्ति नास्मिन् चेतो यस्य तथाभूत सन्यो मां सततं निरंतरं नित्यशः प्रतिदिनं स्मरति॥ तस्य नित्ययुक्तस्य समाहितस्याहं सुखेन लभ्यो अस्मि नान्यस्य ॥१४॥ यद्येवं त्वं सुलभोऽसि ततः किं तस्मात्तवेत्यत आह मामिति॥ उक्तलक्षणा महात्मानो मां प्राप्य पुनर्दुःखालयमशाश्वतं च जन्म न प्राप्नुवंति॥ यतस्ते परमां सम्यक् सिद्धिं मोक्षमेव प्राप्ताः पुनर्जन्मनो दुःखानां

कालप्रयाणांतेनिमामुपैत्यजत्वात्तस्युक्तंवैमीवती ॥१५॥४

॥राम॥
॥२९६॥

एतदेव सर्वेषाम् लोकेषु पुनरावृत्तिदर्शनेन स्पष्टयति ॥ आब्रह्मेति ब्रह्मणो भवनं वासस्थानं लोकस्तमभिव्याप्य सर्वे लोकाः पुनरावर्तनशीलाः इह लोके
स्या । यि निवृत्तिं उत्पन्नानामनुत्पन्नज्ञानानां मद्भक्तानां पुनर्जन्म एवं क्रममुक्तिफलाभिरूपासनाभिर्ब्रह्मलोकं प्राप्ताः ॥ ते यदि मे तत्रोत्पन्नज्ञानानां ब्रह्मणा स-
ह मोक्षो नान्येषां मामुपेत्य वर्तमानानां पुनर्जन्म नास्त्येवेत्यर्थः ॥१६॥ ननु च तपस्विनो ब्रह्मलोकादिनाशित्वे न तत्र तिष्ठेयुः ॥ त्रिलोक्या उपस्थितानां लोकानां नैमित्ति-
कवर्जितानामित्यादि पुनरावृत्तिः ॥ त्रिलोकी सर्वान्धकारात्महर्लोकादीनां तु ब्रह्मलोकस्थत्वं गम्यते ॥ विनाशित्वे च सर्वेषामविशिष्टे कथमेषो विशेषः ॥ इत्यादि सापेक्षं वहू-
कस्यापि निमित्तेषो विशेष इत्यपेक्षमाणेन प्रलवर्षा पुनर्ब्रह्मणो अहरहनि त्रिलोकानामुत्पत्तिरु आत्रिर्निशि निशि च प्रलयो भवतीति दर्शय-

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥ मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥१६॥
सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥१७॥

न्नित्यनष्टास्त्वतोऽ ॥ अहोरात्रे विभजते सूर्यो मानुषदैविके इति ॥ सहस्रं युगानि पर्यन्तोऽवसानं यस्य तत् ब्रह्मणो यदहः ॥ तथा विदुः युगसहस्रमन्तो यस्याः तां रात्रिं च ये योग-
बलेन ये विदुः सर्वज्ञास्ते जना अहोरात्रविदः ॥ येषां तु केवलं चन्द्रार्कगत्यैव ज्ञानं तेषां तथाहोरात्रविज्ञानं न भवति ॥ अयं भावः दर्शितं ॥ युगसहस्रं चतुर्युगमभि-
प्रेत्य ॥ चतुर्युगसहस्रं तु ब्रह्मणोऽहरुच्यते ॥ इत्यादि पुराणोक्तेः ॥ ब्रह्मणोऽहनि महर्लोकादिवासिनामप्युपलक्षणार्थम् ॥ तत्रापि कालगणनाप्रकारः ॥ मनुष्याणां
यद्वर्षं तद्देवानामहोरात्रम् ॥ तादृशैरहोरात्रैः ॥ पक्षमासादिकल्पनया द्वादशवर्षसहस्रैश्चतुर्युगं चतुर्युगसहस्रं तु ब्रह्मणो दिनं ॥ तावत्येव रात्रिः तादृशैरहोरात्रैः

ततः किमत आह अव्यक्ताद् इति॥ कार्यस्याव्यक्तरूपं कारणात्मकं॥ तस्मात् कारणरूपात्॥ व्यज्यंते अभिव्यज्यंत इति व्यक्तयश्चराचराणि भूतानि प्रादु
र्भवंति॥ कदा अहरागमे ब्रह्मणो दिनस्योपक्रमे॥ तथा रात्र्यागमे तस्मिन्नेवाव्यक्तसंज्ञिके कारणरूपे प्रलयं यांति॥ यद्वा तेनोनात्रं विरद्देन तन्न विधीयते
किंतु ते पुनः सिद्धाहोरात्रविदो जनाः॥ यद्ब्रह्मणोऽहर्विदुस्तस्याहुराचार व्यक्तयः प्रभवंति॥ यां च सत्रिं विदुस्तस्यां रात्र्यागमे प्रलीयंत इति द्वयोरन्वयः॥१८

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके॥१८॥ भू
तग्रामः स एवायं भूत्वा भूत्वा प्रलीयते॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे॥१९॥ परस्तस्मा
त्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥२०॥ श्रीरामाय नमः

ततश्च कृतनाशाकृताभ्यागमसंकां वारयन्वैराग्यार्थं सृष्टिप्रलयविच्छेदं दर्शयति॥ भूतेति भूतानां चराचरप्राणिनां समूहो यः प्रागासीत् स एवायं अहरागमे भू
त्वा रात्र्यागमे प्रलीयते पुनरप्यहरागमे अवशः कर्मादिपरतंत्रः॥ प्रभवतीति नात्यस्त्यर्थः॥१९॥ लोकानामनित्यत्वमुक्त्वा परमेश्वरस्वरूपस्य नित्यत्वं दर्शयति परस्त
स्मादिति द्वाभ्यां तस्मात् चराचरकारणभूतादव्यक्तात्परः॥ अन्यो हि कारणभूतः द्विलक्षणो योऽव्यक्तश्चक्षुराद्यगोचरो भावः सनातनो अनादिः स तु सर्वेषु कार्यकार

णानद्रूपयोरान्योस्तु ज्ञानमिति विषयीति॥२०

॥राम॥
॥१००॥

अपि नायं प्रलयान्दर्शयन्नाह स्तत्र अव्यक्त इति। यो भावः अतीन्द्रियोक्षरः। यदिदेशनाद्याभूत्यमिति। तथा अक्षरएतत्भवतीदं विश्वं इत्यादि श्रुतिभ्य अक्षर इत्युक्तो तं मत्संगति गम्यं पुरुषार्थमाहुः॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्यादि श्रुतयः परमगतित्वमेवाहुः यं प्राप्य पुनर्न निवर्तन्ते इति तच्च ममैव धाम स्वरूपं॥ अतोहमेव परमा गतिरित्यर्थः॥२१॥ तत्प्राप्तौ च भक्तिरन्तरंगोपाय इत्युक्तमेवेत्याह पुरुष इति। स एवाहं परः पुरुषः। अनन्यया एकान्तभक्त्यैव लभ्यो नान्यथा परत्वमेवाह यस्यान्तःस्थानि भूतानि येन च कारणभूतेन सर्वमिदं जगत्ततं व्याप्तं॥२२॥ एवं परमेश्वरोपासकाः तत्पदं प्राप्य न निवर्तन्ते अन्ये चावर्तन्त इत्युक्तं। तत्र केन मार्गेण गता नावर्तन्ते केन वा गता आवर्तन्त इत्यपेक्षायामाह यत्रेति। यत्र यस्मिन्काले प्रयाता योगिनो अ

॥ अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥२१॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यान्तः
स्थानि भूतानि येन सर्वमिदं ततं॥२२॥ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥२३॥

नावृत्तिं। यस्मिन्काले प्रयाता आवृत्तिं यान्ति तं कालं वक्ष्यामीत्यन्वयः॥ अत्र च रश्मिसारी अतश्चायनेपि दक्षिणे इति स्मृतिन्यायेनोत्तरायणादिकालविशेषमरणस्य विवक्षितत्वात्तत्प्रदेशकालाभिमानिनीभिरग्निवाह्निवीभिर्देवताभिः प्राप्यो मार्ग उपलक्ष्यते अतोयमर्थः यस्मिन्कालाभिमानिनीदेवतोपलक्षिते मार्गे प्रयाता योगिनः उपासकाः कर्मिणश्च यथाक्रमं मनावृत्तिमावृत्तिं च यान्ति तं कालाभिमानिनीदेवतोपलक्षितं मार्गं कथयिष्यामीति अग्निर्ज्योतिः। कालाभिमानित्वाभावेपि भूयसा महरादिप्रायदेवतानां कालाभिमानित्वात्तत्स्वरूपादिवर्णनमिमादिविकालशब्देनोपलक्षणमविरुद्धं॥२

॥गी०टी०॥ तत्रार्चिरादिमार्गमाह अग्निरिति ॥ अग्निर्ज्योतिः शब्दाभ्यां तेर्चिषमभिसंभवं तीति श्रुत्युक्ता अर्चिरभिमानिनी देवतोपलक्ष्यते अहरिति दिवसाभिमानिनी
॥१०२॥ शुक्ल इति शुक्लपक्षाभिमानिनी उत्तरायणरूपाः षण्मासा इत्युत्तरायणाभिमानिनी ॥ एतच्चान्यासामपि श्रुत्युक्तानां संवत्सरदेवलोकादिदेवतानामुपल
क्षणार्थं एवंभूतो यो मार्गः तत्र प्रयाता गता ॥ भगवदुपासका जना ब्रह्म प्राप्नुवंतीति तथा च श्रुतिः ॥ तेर्चिषमभिसंभवत्यर्चिषोहरह्न आपूर्यमाणपक्षं
आपूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान् मासेभ्यो देवलोकमित्यादि ॥२४॥ आवृत्तिमार्गमाह धूम इति धूमाभिमानिनी देवता रात्र्यादिशब्दै
श्च पूर्ववद्देवरात्रिः कृष्णपक्षदक्षिणायनषण्मासाभिमानिन्यस्तिस्रो देवतास्तस्यंते एताभिर्देवताभिरुपलक्षितो यो मार्गस्तत्र प्रयातः ॥ कर्मी

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं ॥ तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥२४॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं ॥ तत्र
चांद्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते ॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ॥ एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः ॥२६॥ ७०॥

योगी चांद्रमसं ज्योतिस्तदुपलक्षितं स्वर्गलोकं प्राप्य तत्रेष्टापूर्त्तकर्मफलं भुक्त्वा पुनरावर्तते ॥ अत्रापि श्रुतिः ते धूममभिसंभवंतीत्यादिः ॥ तेद्वंनिवृत्तक
र्मसहितोपासनया क्रममुक्तिः ॥ काम्यकर्मभिः स्वर्गभोगानंतरमावृत्तिः निषिद्धकर्मभिस्तु नरकभोगानंतरमावृत्तिः शुद्धकर्मणां तु जंतूनामत्रैव पुनः पु
नर्जीवत्वे तिष्ठध्वं ॥२५॥ उक्तौ मार्गावुपसंहरति शुक्लेति ॥ शुक्ला अर्चिरादिगतिः प्रकाशमयत्वात् कृष्णा धूमादिगतिः तमोमयत्वात् ॥ एते गती मार्गौ ज्ञानकर्मा ॥राम॥
धिकारिणो जगतः ॥ शाश्वते अनादी संमते संसारस्यानादित्वात् तयोरेकया शुक्लया अनावृत्तिं मोक्षं याति अन्यया कृष्णया तु पुनरावर्त्तते ॥२६॥ ॥२८ ॥१०२॥

मार्गज्ञानफलं दर्शयन् भक्तियोगमुपसंहरति॥ नैते इति एते सृती मार्गौ मोक्षसंसारप्रापकौ जानन् कश्चिदपि योगी न मुह्यति॥ अतः स्वबुद्ध्या स्वर्गादिफलं न का
मयते॥ किंतु परमेश्वरनिष्ठ एव भवतीत्यर्थः॥ यस्य प्रमन्यत॥ २७॥ अध्यायार्थमष्टप्रश्नार्थनिर्णये सफलमुपसंहरति वेदेष्विति वेदेष्वध्ययनादिभिः यज्ञेषु च
नुष्ठानादिभिः॥ तपस्सु च कायशोषणादिभिः दानेषु सत्पात्रप्रदानादिभिः॥ यत्पुण्यफलं चोपदिष्टं शास्त्रेषु तत्सर्वमत्येति ततोऽपि श्रेष्ठं योगैश्वर्यं प्राप्नोति किं कृत्वा
इदमष्टप्रश्नार्थनिर्णये नोक्तं तत्त्वं विदित्वा ततश्च योगी ज्ञानी भूत्वा परमसुखं योगैश्वर्यं प्राप्नोति॥ किंचाद्यं जगन्मूलभूतं स्थानं विष्णोः परं पदं प्रा
प्नोति॥ २८॥ अष्टमे प्रविशिष्टेष्टसंरक्षा ध्यानतीर्थे॥ अविलम्बितभक्त्या मान्तिः स्यादिनारमवर्त्मना॥ टीकायामष्टमोऽध्यायः। एवं च प्राप्यते भक्तोऽपि

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन। २७ वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टं॥ अत्येति तत्
सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं। २८ इति श्री भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्ट
मोऽध्याय॥ श्रीभगवानुवाच॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १॥ अस्मिन्नवमे॥ नवमे तु निजैश्वर्येणासाम्य
येश्वर्यं च्यते॥ एवं तावत्सप्तमाष्टमयोः स्वीयं पारमेश्वर्यं तद्भक्तेश्च सफलं मनागनुप्रयुक्ताऽसम्यगप्यचिन्त्यं स्वकीयमैश्वर्यं भक्तेश्चासाधारणं प्रभावं प्रपंचयिष्यन्
भगवानुवाच इदं त्विति विशेषेण ज्ञातापेतनेनेति विज्ञानं तूपासनं तत्सहितं ज्ञानमीश्वरविषयमिदं तु अनसूयवे पुनः पुनस्त्वमाहात्म्यमेवोपदिशतीत्ये
वं परकारणेऽकस्मिन्नपि दोषदृष्टिरहिताय प्रवक्ष्यामि। तु शब्दो वैपरीत्यं तरे वा तदगुह्यतमं तस्मात्यादिवागुह्यं धर्मज्ञानं तमोदेहाद्व्यतिरिक्तस्य ज्ञानं
गुह्यतरं तत्तोऽपि तत्परमात्मज्ञानमतिरहस्यत्वान् गुह्यतमं यत् ज्ञात्वा अशुभात्संसारात्सद्य एव मुक्तो भविष्यति॥ १॥

॥भा०टी०॥ विद्य। राजविद्येति॥ इदंज्ञानंराजविद्याविद्यानांराजा॥ गुह्यानांच राजविद्या सगोप्येषु श्रेष्ठमित्यर्थः। राजदंतादित्वादि उपसर्जनस्य परत्वं उत्तमंपवित्र

॥१०२॥ मिदंश्रुत्वतपोवनादिभिः प्रत्यक्षावगमं च सुखं फलं धर्म्मधर्मोदनयेत। सर्वधर्म्मफलत्वात्। कर्त्तुंसुसुखं च सुखेनकर्तुंशक्यमित्यर्थः॥ अव्ययं च नक्षय

फलत्वात्॥२॥ नन्वेवमत्यान्निःश्रेयसकरत्वे केनाम संसारिणःस्युः तत्राह अश्रद्दधानाइति॥ अस्यभक्तिसहितज्ञानलक्षणस्य धर्म्मस्य साक्षिकर्म्मत्वेतिपर्यौदल

धर्मेअश्रद्दधानाः आस्तिक्येनास्वीकुर्वन्त॥ उपायांतरेण मत्प्राप्त्यर्थं कृतप्रयत्ना अपि मामप्राप्य मृत्युयुक्ते संसारवर्त्मनि निवर्त्तन्ते मृत्युव्याप्ते संसारमार्गे

राजविद्याराजगुह्यं पवित्रमिदमुत्तमं॥ प्रत्यक्षावगमंधर्म्यंसुसुखंकर्त्तुमव्ययं॥२॥ अश्रद्दधानाःपुरुषाधर्म्म
स्यास्यपरंतप अप्राप्यमांनिवर्त्तंते मृत्युसंसारवर्त्मनि॥३॥ मयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना॥ मत्स्थानि
सर्वभूतानिनचाहंतेष्ववस्थितः॥४॥

परिभ्रमंतीत्यर्थः॥३॥ नेदंवक्ष्यमाणप्रस्तुतस्यज्ञानस्यस्तुत्या श्रोतारमभिमुखीकृत्यतदेवज्ञानं कथयति॥ मयेतिद्वाभ्यां॥ अव्यक्ताअतींद्रि ॥राम॥

यामूर्त्तिः स्वरूपंयस्यतादृशेन मयाकारणभूतेनजगत्॥ ततंव्याप्तं॥ अतएवकारणभूते मयिस्थितानि मत्स्थानि सर्वाणि चराचराणिभूतानि ॥१०२॥

एवमपि घटादिषु मृदिव तेषु भूतेष्वहं न स्थितः असंगत्वात्॥४॥ उनामो भगवतेश्रीवासुदेवायनमः॥५॥ ॥५॥

किंचन वेत्ति न च मत्स्थितानि भूतानि अशेषं शयं गत्वा देव मम नु नर्हि व्यापकत्वमाश्रयत्वं च वस्तु लोके विरुद्धमित्याशंक्याह मे ईश्वर साधारणं योगं युक्तिं अघटित घटना चातुर्यमिदं पश्य
दृष्टिव्ययेोगमाह्ने मायावैभवस्याचिंतकत्वात्तात्कालिकं किंचिद्विरुद्धमित्यर्थः॥ अन्यदृष्ट्या पूर्वोक्तमेव पर्यायेणाह भूतानि बिभर्ति धारयतीति भूतभृत्॥ भूतानि भावयति पालयतीति भूतभाव
नः एवंभूतोपि मम आत्मा परस्वरूपं भूतस्थो न भवति अयं भावः यथा योऽहं देहं बिभ्रत्पालयंश्चाहंकारेण तत्संश्लिष्टस्तिष्ठति॥ एवमहं भूतानि धारयन्नपि गोपि तेष्वभिमानि नि

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं॥ भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥५॥ यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥६॥ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकां॥ कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं॥७

रहंकारत्वादिति॥५॥ असंश्लिष्टयोराधाराधेयभावे दृष्टान्तेनाह यथेति॥ अवकाशं विना अवस्थानानुपपत्तेर्नित्यमाकाशे स्थितो वायुः॥ सर्वत्रगतोपि महानपि नाकाशेन संश्लि
ष्यते निर्लेपत्वेन संश्लेषाभावात् तथा सर्वाणि भूतानि मयि स्थितानीति जानीहि॥६॥ तथैव असंगस्यैव योगमायया॥ स्थितौ हेतुत्वमुक्तं तथैव सृष्टिप्रलयहेतुत्वं
चाह सर्वेति कल्पक्षये प्रलयकाले सर्वाणि भूतानि मदीयां प्रकृतिं यान्ति॥ त्रिगुणात्मिकायां मायायां प्रलीयन्ते पुनस्तेषु कल्पादौ सृष्टिकाले तानि विशेषेण सृ
जामि॥७॥

॥भा॰ टी॰ ९ गी॰॥ नन्वसंगो निर्विकारश्च कथं सृजसीत्यपेक्षायामाह प्रकृतिमिति द्वाभ्यां स्वीयां स्वाधीनां प्रकृतिमवष्टभ्याधिष्ठाय प्रलये लीनां सं चतुर्विधमिमं सर्वं भूतग्रामं
॥ ॥१०३॥ कर्मादिपरवशं पुनः। पुनर्विविधं सृजामि कथं प्रकृतेर्वशात् प्राचीनकर्मनिमित्तं तत्तत्स्वभाववशात् ॥८॥ तर्हि नानाविधानि कर्माणि कुर्वतस्तव जीव
वद्बंधः। कथं नास्यादित्याशंक्याह। न चेति तानि सृष्ट्यादीनि कर्माणि मां न निबध्नंति कर्मासक्तिर्हि बंधहेतुः। सा चाप्तकामत्वान्मम नास्ति॥ अत उदासीनत्वेन
वर्धमानस्य मे बंधनाय भवंति॥ उदासीनत्वे कर्तृत्वानुपपत्तेः। कर्तृत्वे चोदासीनत्वानुपपत्तेरुदासीनवदित्युक्तं ॥९॥ तदेवोपपादयति मयेति मयाधिष्ठात्रा

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥ न च मां तानि कर्माणि निबध्नंति धनंजय उदासीनवदासीनमसक्तं तेषु कर्मसु
मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्तते ॥१०॥ अवजानंति मां मूढा मानुषीं तनुमाश्रितं। परं भावमजानंतो मम भूतमहेश्वरं ॥११॥

॥राम॥

निमित्तमात्रभूतेन प्रकृतिः। सचराचरं विश्वं सूयते जनयति अनेन मदधिष्ठानेन हेतुना इदं जगद्विपरिवर्तते पुनः पुनर्जायते सं॥नि॥धिमात्रेणाधिष्ठातृ
कर्तृत्वमुदासीनत्वं चाविरुद्धमिति भावः ॥१०॥ नन्वेवंभूतं परमेश्वरं त्वां किमिति केचिन्नाद्रियंते तत्राह द्वाभ्यां अवजानंतीति। सर्वभूतमहेश्वररूपं म ॥१०३॥
दीयं तत्त्वमजानंतो मूढा मामवमन्यंते॥ अवज्ञाने हेतुः शुद्धसत्त्वमयीं मयि तनुं स्वेच्छया मनुष्याकारामाश्रितवंतमिति ॥११॥ श्रीरामाय नमः

यमदंडोपमांघोरांचिक्षेपपरमाहवे॥तामापतंतींसहसातस्यबाहुबलेरितां॥११॥सात्यकिःसमरेराजन्द्विधाचिच्छेदसायकैः॥ततःप्रपा
तसहसामहोल्केवहतप्रभा॥शक्तिंविनिहतांदृष्ट्वापुत्रस्तवविशांपते॥महतारथवंशेनवारयामाससमाधवं॥१३॥तथापरिवृतंदृष्ट्वा
वार्ष्णेयानांमहारथं दुर्योधनोभृशंक्रुद्धोभ्रातॄन्सर्वानुवाचह॥१४॥तथाकुरुतकौरव्यायथावःसात्यकोयुधि॥नजीवन्प्रतिनिर्या
तिमहतोस्माद्रथव्रजात्॥तस्मिन्हतेहतंमन्येपांडवानांमहद्बलं॥तथेतिचवचस्तस्यपरिगृह्यमहारथाः॥१६॥शैनेयंयोधयामा
मासुर्भीष्मस्यात्मुघातरणेकांबोजराजोबलवान्वारयामाससंयुगे॥आर्जुनिंनृपतिर्विध्वाशरैःसन्नतपर्वभिः॥पुनरेवचतुःष
ष्ट्याराजन्विव्याधतंनृप॥सुदक्षिणास्तुसमरेपुनर्विव्याधपंचभिः॥सारथिंचास्यनवभिरिछन्भीष्मस्यजीवितं॥१९॥तद्युद्धमासी
त्सुमहत्तयोर्यत्रसमागमे॥यदभ्यधावद्गांगेयंशिखंडीशत्रुकर्षणः॥२०॥विराटद्रुपदौवृद्धौवारयंतौमहच्चमूं॥भीष्मस्ययुधिसंरब्धा
द्रवंतौरथौ॥अश्वत्थामारणेक्रुद्धःसमियाद्रथसत्तम॥ततःप्रववृतेयुद्धंतयोस्तस्यचभारत॥विराटोदशभिर्भल्लैराजघानपरंतप
पतमानंमहेष्वासंद्रोणिमाहवशोभिनं॥२३॥द्रुपदश्चत्रिभिर्बाणैर्विव्याधनिशितैस्तदा॥गुरुपुत्रंसमासाद्यप्रहरंतौमहाबलौ॥अश्व
त्थामानंततस्तौतुविव्याधबहुभिःशरैः॥विराटद्रुपदौवीरौभीष्मंप्रतिसमुद्यतौ॥२५॥तत्राद्भुतमपश्यामवृद्धयोश्चरितंमहत्॥दय
द्रौणिःसायकान्घोरान्प्रेष्यवारयतांयुधि॥सहदेवंतथायांतंकृपःशारद्वतोभ्ययात्यथानागोवनेनागंमत्तोमत्तमुपाद्रवत्॥कृप
श्चसमरेशूरोमाद्रीपुत्रंमहारथं॥आजघानशरैस्तूर्णंसप्तत्यारुक्मभूषणैः॥२८॥

॥भा०भी॥ १६८

तस्य माद्रीसुतस्चापं द्विधा चिच्छेद सायकैः ॥ अथैनं छिन्नधन्वानं विव्याध नवभिः शरैः ॥ सोन्यत्कार्मुकमादाय समरे भारसाधनं ॥ माद्रीपुत्रं
सुसंहृष्टो दशभिर्निशितैः शरैः ॥ आजघानोरसि क्रुद्धः इच्छन् भीष्मस्य जीवितं ॥ तस्यैव पांडवो राजन् शारद्वतमर्मर्षभ ३० आजघानो-
रसि क्रुद्धो भीष्मस्य वधकांक्षया ॥ ततो युद्धं समभवत् घोररूपं भयावहं नकुलं तु रणे क्रुद्धो विकर्णः शत्रुतापनः विव्याध सायकैः
षष्ट्या रक्षन् भीष्मं महाबलं ॥ ३३ नकुलोपि भृशं विद्धस्तव पुत्रेण धीमता ॥ विकर्णं सप्तसप्तत्या निर्बिभेद शिलीमुखैः ॥ ३४ तत्र
तौ नरशार्दूलौ भीष्महेतोः परंतपौ ॥ अन्योन्यं जघ्नतुर्वीरौ गोष्ठे गोवृषभाविव ॥ ३५ घटोत्कचं रणे यांतं निघ्नंतं तव वाहिनीं दुर्मुखः ॥
समभ्यापाद्भीष्महेतोः पराक्रमी ॥ ३६ हैडिंबस्तु रणे राजन् दुर्मुखं शत्रुतापन ॥ आजघानोरसि क्रुद्धः शरेणानतपर्वणा ॥ ३७ भीमसेन
सुतं चापि दुर्मुखः सुमुखैः शरैः ॥ षष्ट्या वीरो नदन् हृष्टो विव्याध रणमूर्द्धनि ॥ ३८ धृष्टद्युम्नं तथा यांतं भीष्मस्य वधकांक्षिणं ॥ हार्दिक्यो
वारयामास रथश्रेष्ठ महारथ ॥ ३९ हार्दिक्यं पार्षतस्चापि विध्वा पंचभिरायसैः ॥ पुनः पंचाशता तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ४० सो-
मदत्तिरथो भीमम् आजघान स्तनांतरे ॥ नाराचैर्नवभिस्तीक्ष्णै रुक्मपुंखैः संयुगे ४१ उरस्थेन च तेनैव भीमसेनः प्रतापवान् ॥ स्कंदः
शक्त्या यथा क्रौंचः पुरा नृपतिसत्तम ४३ तौ शरान् सूर्यसंकाशान् कर्मारपरिमार्जितान् ॥ अन्योन्यस्य रणे क्रुद्धौ चिक्षिपाते नरर्षभौ ॥ भीमो भीष्मवधा- ॥राम॥ १६८
कांक्षी सोमदत्तिं महारथं ॥ तथा भीष्मजये गृध्नुः सोमदत्तिस्तु पांडवं ॥ ४४ कृतप्रतिकृते यत्नौ योधयामासतू रणे ॥ युधिष्ठिरं तु कौंतेयं महत्या सेनया वृ-
तम्

नैवमवजानंतिमामूढाइतिश्लोकाद्वयेनक्षिप्रफलाशयादेवतांतरंभजंतेमांनादियंतइत्यभक्ताहर्षिताः। महात्मानस्तुमांपार्थेत्यादिनाभक्ताउक्ताः। तेत्रैकत्वे
नपृथक्त्वेनैवावापरस्मैपरस्मैयेनभजंतितेषांजन्ममृत्युप्रवाहोदर्वारइत्याहद्वाभ्यांत्रैविद्यामामिति। ऋग्यजुःसामलक्षणाविद्यायेषांतेत्रिविद्याः। त्रिविद्या
एवत्रैविद्याःस्वार्थेतद्धितःत्रिसोविद्यामधीयतेजानंतीतिवात्रैविद्यावेदत्रयोक्तकर्मपरायणाइत्यर्थः। वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वाभमैववरूपंदेवतांतरमि
त्यजानंतोपिवस्तुतःइंद्रादिरूपेणमामेवेष्ट्वासंपूज्ययज्ञशेषंसोमंपिबंतीतिसोमपाःतेनैवपूतपापाःशोधितकल्मषाःसंतःस्वर्गेतिस्वर्गेप्रतिगतियेप्रा

त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते। तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिविदेवभोगान्॥२०॥ तेतंभुक्त्वास्वर्गलोकंवि
शालंक्षीणेपुण्येमर्त्यलोकंविशंति। एवंत्रयीधर्ममनुप्रपन्नागतागतंकामकामालभंते॥२१॥ अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते। ते
षांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं॥२२॥

येयत्तेतेपुण्यफलंरूपंसुरेंद्रस्यलोकंस्वर्गमासाद्यप्राप्यदिविस्वर्गेदिव्यानुत्तमान्देवानांभोगा
नश्नंतिभुंजते॥२०॥ ततश्चतेतंभुक्त्वेति। तेस्वर्गकामास्तंप्रार्थितंविपुलंस्वर्गलोकंतत्सुखंभुक्त्वाभोगप्रापकेपुण्येक्षीणेसतिमर्त्यलोकंप्रविशं
तिपुनरप्येवमेववेदत्रयप्रविहितंधर्ममनुसृताःकामकामाःभोगान्कामयमानायातायातंलभंते॥२१॥ मद्भक्तास्तुमत्प्रसादेनकृतार्थाभवं
तीत्याहअनन्याइति। अनन्यानास्तिमद्व्यतिरिक्तेनान्यत्काम्यंयेषांतथाभूतायेजनामांचिंतयंतःसेवंते। तेषांनित्यंअभियुक्तानांसर्वदाम
देकनिष्ठानांयोगंधनादिलाभंक्षेमंचतत्पालनंमोक्षंवातैरप्रार्थितमप्यहमेववहामिप्रापयामि॥२२॥ ४॥ ॥ ॥ ॥

तस्यमाद्रीसुतश्चापंद्विधाचिच्छेदसायकैः॥ अथैनंछिन्नधन्वानंविव्याधनवभिःशरैः॥ सोन्यत्कार्मुकमादायसमरेभारसाधनं॥ माद्रीपुत्रं
सुसंहृष्टोदशभिर्निशितैःशरैः॥ आजघानोरसिक्रुद्धःइच्छन्भीष्मस्यजीवितं॥ तस्यैवपांडवोराजन्शारद्वतममर्षण॥ ३० ॥ आजघानो
रसिक्रुद्धोभीष्मस्यवधकांक्षया॥ ततोयुद्धंसमभवत्घोररूपंभयावहं॥ नकुलंतुरणेक्रुद्धोविकर्णःशत्रुतापनः॥ विव्याधसायकैः
षष्ट्यारक्षन्भीष्ममहाबलं॥ ३३ ॥ नकुलोपिभृशंविद्धस्तवपुत्रेणधीमता॥ विकर्णसप्तसप्तत्यानिर्बिभेदशिलीमुखैः॥ ३४ ॥ तत्र
तौनरशार्दूलौभीष्महेतोःपरंतपौ॥ अन्योन्यंजघ्नतुर्वीरौगोष्ठेगोवृषभाविव॥ ३५ घटोत्कचंरणेयांतंनिघ्नंतंतववाहिनीं दुर्मुखः॥
समरेप्रायाद्भीष्महेतोःपराक्रमी॥ ३६ ॥ हैडिंबस्तुरणेराजन्दुर्मुखंशत्रुतापन॥ आजघानोरसिक्रुद्धःशरेणानतपर्वणा॥ ३७ ॥ भीमसेन
सुतश्चापिदुर्मुखःसुमुखैःशरैः॥ षष्ट्यावीरोनदन्हृष्टोविव्याधरणमूर्द्धनि॥ ३८ ॥ धृष्टद्युम्नंतथायांतंभीष्मस्यवधकांक्षिणं॥ हार्दिक्यो
वारयामासरथश्रेष्ठमहारथ॥ ३९ ॥ हार्दिक्यंपार्षतश्चापिविव्याधपंचभिरायसैः॥ पुनःपंचाशतातूर्णंतिष्ठतिष्ठेतिचाब्रवीत्॥ ४० ॥ सो
मदत्तिरथोभीममाजघानस्तनांतरे॥ नाराचेनसुतीक्ष्णेनरुक्मपुंखेनसंयुगे॥ ४२ ॥ उरस्थेनबभौतेनभीमसेनःप्रतापवान्॥ स्कंदेः
शक्त्यायथाक्रौंचःपुरानृपतिसत्तम॥ ४३ ॥ तौशरान्सूर्यसंकाशान्कर्मारपरिमार्जितान्॥ अन्योन्यस्यरणेक्रुद्धौचिक्षिपातेनरर्षभौ॥ भीमोभीष्मवधा
कांक्षीसोमदत्तिंमहारथं॥ तथाभीष्मजयेगृध्नुःसोमदत्तिस्तुपांडवं॥ ४४ ॥ कृतप्रतिकृतेयत्तौयोधयामासतूरणे॥ युधिष्ठिरंतुकौंतेयंमहत्यासेनयावृ
तंभी

नेदेवमवजानंतिमामूढाइतिश्लोकाद्वयेनक्षिप्रफलाशयादेवतांतरंभजंतेमांनाश्रियंतइत्यभक्ताइदर्शिताः। महात्मानस्तुमांपार्थेत्यादिनाभक्ताउक्ताः तत्रैकत्वे
नपृथक्त्वेनवापरस्मैपवरयेनभजंतितेषांजन्ममृत्युप्रवाहोदुर्वारइत्याहत्रैविद्यामामिति॥ ऋग्यजुःसामलक्षणास्तिस्रोविद्यायेषांतेत्रैविद्या॥ त्रैविद्या
एवत्रैविधाः स्वार्थितक्षितः तिस्रोविद्याअधीयंतेजानंतीतिवात्रैविद्याविदस्तत्प्रोक्तकर्म्मपरायणाः। वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वामेवतद्रूपंदेवतांतरम
त्वजानंतोपिवस्तुतः इंद्रादिरूपेणमामेवेष्ट्वासंपूज्ययज्ञशेषंसोमंपिबंतीतिसोमपाः तेनैवपूतपापाःशोधितकल्मषाःसंतःस्वर्गतिंस्वर्गप्राप्तिंगतिंयेप्र

त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते॥ तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिविदेवभोगान्॥ २०॥ तेतंभुक्त्वास्वर्गलोकंवि
शालंक्षीणेपुण्येमर्त्यलोकंविशंति॥ एवंत्रयीधर्म्ममनुप्रपन्नागतागतंकामकामालभंते॥ २१॥ अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते॥ ते
षांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं॥ २२॥

र्थयंतेतेपुण्यफलंरूपंसुरेंद्रस्यलोकंस्वर्गमासाद्यप्राप्यदिविस्वर्गेदिव्यानुत्तमान्देवानांभोगा
नश्नंतिभुंजते॥ २०॥ ततश्चतेतंभुक्त्वेति॥ तेस्वर्गकामास्तंप्रार्थितंविपुलंस्वर्गलोकंतत्सुखंभुक्त्वाभोगप्रापकेपुण्येक्षीणेसतिमर्त्यलोकंप्रविशं
तिपुनरप्येवमेववेदत्रयविहितंधर्म्ममनुसरंतःकामकामाःभोगान्कामयमानायातायातंलभंते॥ २१॥ मद्भक्तास्तुमत्प्रसादेनकृतार्थाभवं
तीत्याहअनन्याइति॥ अनन्यानान्तिमद्यतिरिक्तेनान्यत्काम्यंयेषांतथाभूतायेजनामांचिंतयंतःसेवंते॥ तेषांनित्याभियुक्तानांसर्वदाम
देकनिष्ठानांयोगंधनादिलाभंक्षेमंचतत्पालनंमोक्षाख्यंचतैरप्रार्थितमप्यहमेववहामिप्रापयामि॥ २२॥ ७४॥ ॥ ॥ ॥

ननुचत्वद्व्यतिरेकेणवस्तुतोदेवतांतरस्याभावादिंद्रादिसेविनोपित्वद्भक्ताएवेतिकथंतेगतागतंलभेरंस्तत्राहयेपीति॥श्रद्धयोपेताभक्ताःसंतोयेपिज-
नाःयज्ञेनान्यदेवताइंद्रादिरूपायजंतेतेपिमामेवयजंतीतिसत्यं॥किंतुअविधिपूर्वकंमोक्षप्रापकंविधिविनायजंतिअतस्तेपुनरावर्तंते॥२३॥एतदे-
वविवृणोतिअहंहीति॥सर्वेषांयज्ञानांतत्तद्देवतारूपेणाहमेवभोक्ताप्रभुश्चस्वामीफलदातापिचाहमेवेत्यर्थः एवंभूतंमांतत्त्वेनयथावन्नाभिजानं-

येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः॥तेपिमामेवकौंतेययजंत्यविधिपूर्वकं॥२३॥अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच॥नतुमाम
भिजानंतितत्त्वेनातश्च्यवंतिते॥२४॥यांतिदेवव्रतादेवान्पितॄन्यांतिपितृव्रताः॥भूतानियांतिभूतेज्यायांतिमद्याजिनोपिमां॥२५॥

तिअतश्च्यवंतिप्रच्यवंतेपुनरावर्तंते॥२४॥यत्तुसर्वदेवतासुमामेवांतर्यामिणंपश्यंतोयजंतितेतुनावर्तंतेनदेवोपयाद्यपियांतीति॥देवव्रताइंद्रादि-
पुव्रतंनियमोयेषांतेअतएवतेदेवान्यांति॥पितृव्रतायेषांश्राद्धादिक्रियापरास्तेपितॄन्यांति॥भूतेज्याविनायकमातृकादिभूतपूजाये- ॥राम॥
षांतेभूतानियांति॥मांयष्टुंशीलंयेषांतेमद्याजिनस्तेतुमामेवाक्षयंपरमानंदरूपंनारायणंयांति॥२५॥ २५ २५॥ २५॥ २५ ॥२०५॥

न देवं स्वभक्तानां भक्ष्यपक्वलमुक्तं॥ अनायासलभ्यत्वं च स्वभक्तेर्दर्शयति पत्रमिति॥ पत्रपुष्पादिमात्रमपि मद्भक्त्या प्रीत्या यः प्रयच्छति तस्य प्रयतात्मनः
पादवच्छिन्नस्य मनिष्का भक्तस्य तत्पत्रपुष्पादिकं तेन भक्त्या उपहृतं समर्पितं अहमश्नामि प्रीत्या गृह्णामि॥ नहि महाविभूतिपतेः परमेश्वरस्य मम क्षुद्र
देवतानामिव बहुवित्तसाध्ययागादिभिः परितोषः स्यात्॥ किंतु भक्तिमात्रेण॥ अतो भक्तेन समर्पितं यत्किंचित्पत्रादिकं त्वमपि मदनुग्रहार्थमेवाश्नामी
ति भावः॥ २६॥ न च यज्ञपुष्पादिकमपि यज्ञार्थं पशुसोमादिद्रव्यवत् मदर्थमेवोपसेरपाद्य समर्पितं यत्किंचित्॥ स्वभावतो वा शास्त्रतो वा यत्किंचित्कर्म करो

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ २६॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौं
तेय तत्कुरुष्व मदर्पणं॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः॥ संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥ २८॥ श्रीमते रामानुजाय नमः॥

षि॥ तथा यदश्नासि॥ यत्जुहोषि॥ यद्ददासि॥ यत्तपस्यसि॥ तपः करोषि॥ तत्सर्वं मय्यर्पितं यथा भवत्येवं कुरुष्व॥ २७॥ एवं च शुभफलं प्राप्स्यसि न त्वशुभमे
ति एवं कुर्वन् कर्मबंधनैः कर्मनिमित्तैरिष्टानिष्टैः फलैर्मुक्तो भविष्यसि॥ कर्मणामपि समर्पितत्वेन तत्फलसंबंधानुपपत्तेः ते च मुक्तः सन् संन्यासयो
गयुक्तात्मसंन्यासः॥ कर्मणां मदर्पणं स एव योगस्तेन युक्तः॥ आत्मा चित्तं यस्य तथाभूतस्त्वं मां प्राप्स्यसि॥ २८॥

॥ गी०टी० ९ ॥ यदि भक्तोऽप्यरव्दमोऽसंस्तदा सितौ भक्तोऽपस्त्वसिंहसवापि किरागद्वेषादिकृतं वैषम्यमस्तीनेत्याह ॥ सम इति ॥ समोऽहं सर्वेष्वपि भूतेषु ॥ अतो मे मम न द्वेष्यः प्रियश्च
॥ १०६ ॥ नास्त्येव ॥ एवं सत्यपि ये मां भजन्ति ते भक्ता मयि वर्तन्ते ॥ अहमपि तेष्वनुग्राहकतया वर्ते ॥ अयं भावः यथाग्नेः स्वसेवकेष्वेव तमःशीतादिदुःखमपाकुर्वतो
ऽपि नावैषम्यं ॥ यथा वा कल्पवृक्षस्य तथैव भक्तपक्षपातितोऽपि मम नास्त्येव वैषम्यं ॥ किं तु मद्भक्तेरेवायं महिमेति ॥ २९ ॥ अपि च मद्भक्तेरत्वनर्वः प्रभावं
निदर्शयन्नाह ॥ अपि चेदिति ॥ अत्यंतदुराचारोऽपि नरो यदि अपृथक्त्वेनानन्यभक्तिर्मर्वत्मासिवश्रीनारायणं भजते तर्हि साधुः श्रेष्ठ एव स मंतव्यः । यतोऽसौ

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ॥ ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं ॥ २९ ॥ अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मंतव्य
ः सम्यग्व्यवसितो हि सः ॥ ३० ॥ क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति ॥ कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥ श्रीरामाय नमः ॥

सम्यग्व्यवसितः । शोभनमध्यवसायं कृतवान् ॥ ३० ॥ ननु कथं समीचीनाध्यवसायमात्रेण साधुर्मन्तव्यस्तत्राह क्षिप्रमिति दुराचारोऽपि त्वां भजन् शीघ्रं ॥ राम ॥
धर्मोचितो भवति ॥ ततश्च शश्वच्छांतिं चात्यन्तीमुपशान्तिं परमेश्वरनिष्ठां गच्छति प्राप्नोति ॥ कुतर्ककर्कशवादिनो नैतन्मन्येरन्निति शंकाव्याकुलं मनु ॥ १०६ ॥
न उत्साहयन्ति ॥ हे कौन्तेय भटदक्कादिमहाघोषपूर्वकं विवदमानानां सभां गत्वा बाहुमुत्क्षिप्य त्वं निःशंकं प्रतिजानीहि प्रतिज्ञां कुरु कथं मे मम परमे
श्वरस्य भक्तो दुराचारोऽपि न प्रणश्यति अपि तु कृतार्थ एव भवतीति । ततश्च ते तार्किका निर्विज्जं मर्विध्वंसितकुतर्का सन्तो निःशेषं त्वामेव गुरुत्वेनाश्रयेरन् ॥ ३१ ॥

॥भा॰ भी॰ गी॰ टी॰ ॥ एवंतावदध्यायद्वयेनकर्मयोगोपायोज्ञानयोगोमोक्षसाधनत्वेनोक्तः तमेवब्रह्मार्पणादिगुणविधानेनतत्त्वंपदार्थविवेकादिनाचप्रपंच-
॥७२॥ यिष्यन् ॥ प्रथमंतावत्परंपराप्राप्तत्वेनस्तुवन् ॥ श्रीभगवानुवाच ॥ इममितित्रिभिः ॥ अव्ययफलत्वादव्ययंइमंयोगंपुराहंविवस्वतेआ-
दित्यायकथितवान् ॥ सचविवस्वान्स्वपुत्रायमनवेप्राहमनु ॥ स्वपुत्रायेक्ष्वाकवेब्रवी ॥१॥ एवमिति राजानश्चतेऋषयश्च
राजर्षयोनिमिप्रमुखाः स्वपित्रादिभिरिक्ष्वाकुप्रमुखैःप्रोक्तमिमंयोगंविदुर्जानंति ॥ अधुनातुनामकारणमाह ॥ हेपरंतपसतु

श्रीभगवानु॰ ॥ इमंविवस्वतेयोगंप्रोक्तवानहमव्ययं ॥ विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेऽब्रवीत् १ एवंपरंपराप्राप्तमिमंराजर्षयोविदुः
सकालेनेहमहतायोगोनष्टःपरंतपः ॥२॥ सएवायंमयातेद्ययोगःप्रोक्तःपुरातनः ॥ भक्तोऽसिमेसखाचेतिरहस्यंह्येतदुत्तमं ॥३॥ ७॥

तायनसयोगःकालवशादिहलोकेनष्टःविछिन्नः ॥२॥ सएवायमितिसएवायंयोगोद्यविछिन्नेसंप्रदायेसतिपुनश्चमयातेतुभ्यंप्रोक्तः ॥राम॥
यतस्त्वंममभक्तोसिसखाचासिअन्यस्मैमयानोक्तोहियस्मादेतदुत्तमंरहस्यं ॥३॥ भगवतोविवस्वंतंप्रतियोगोपदेशासंभवं ॥७२॥
अर्जुनउ॰ ॥ अर्जुनउवाच अपरमिति ॥ अपरमर्वाचीनंतवजन्मपरंप्राक्कालीनंविवस्वतोजन्मतदाधुनिकस्त्वंचिरंतनायविवस्वतेत्वमा

यत्र चित्तप्रणिधानेनेंद्रियाणि नियंतुं शक्यंते तदात्मस्वरूपं देहादिभ्यो विविच्य दर्शयति इंद्रियाणीति देहादिभ्यो ग्राह्येभ्यः ॥ पराणि श्रेष्ठान्याहुः सू-
क्ष्मत्वात् प्रकाशकत्वाच्च अत एव तद्व्यतिरिक्तत्वमप्यर्थाद्देहाद्भवति ॥ इंद्रियेभ्यश्च संकल्पात्मकं मनः परं तत्प्रवर्तकत्वात् मनसस्तु निश्चया-
त्मिका परा निश्चयपूर्वकत्वात् संकल्पस्य यस्तु बुद्धेः परस्तत्साक्षित्वेनावस्थितः सर्वांतरः ॥ स आत्मा विमोहयति देहिनमिति देहिशब्दोक्त आ-

इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ॥ मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ॥ जहि शत्रुं महाबाहो कामरूपं दुरासदं ॥ ४३ ॥
इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो
नाम तृतीयोऽध्यायः ॥ ३ ॥

त्मा स इति परामृश्यते ॥ ४२ ॥ उपसंहरति एवमिति बुद्धेरेव विषयेंद्रियादिजन्याः कामादिविक्रियाः आत्मा तु निर्विकारस्तत्साक्षीत्येवं बुद्धेः पर-
मात्मानं बुद्ध्वा आत्मनैवं भूतनिश्चयात्मिकया बुद्ध्या आत्मानं ततः संस्तभ्य निश्चलं कृत्वा कामरूपं शत्रुं जहि मारय दुरासदं दुःखेनासादनीयं
दुर्ज्ञेयगतिमित्यर्थः ॥ स्वधर्मेण यमाराध्य भक्त्या मुक्तिमिता बुधाः ॥ तं कृष्णं परमानंदं तोषयेत्सर्वकर्मभिः ॥ सुबोधिन्यां तृतीयोऽध्यायः ॥ ३ ॥ १ ॥

दृष्टांतानिर्दिष्टं दर्शयन्वैरित्वं स्फुटयति ॥ आवृतंज्ञानमिति ॥ इदंमेवेव ज्ञानमेतेनावृतं ज्ञतस्याखलु भोगसमये कामः सुखहेतुरेवपरिणामेतुवैरितां प्रपद्यते इत्
निनः पुनस्तत्कालास्यमप्यनार्थानुसंधानात्दुःखहेतुर्वैरितित्युक्तं किंच विषयैः पूर्यमानो पियोदुः ॥ दुरपूर्यमानस्तसोषशांतापतेतु त्वादनलतुल्यः ॥ अनेन सर्वा
त्मतिनित्य[illegible]रीत्यमुक्तं ॥ ३९ ॥ इंद्रियाणितस्याधिष्ठानं कथयन्जयोपायमाह इंद्रियाणिमिहद्भ्यं विषयदर्शनश्रवनादिभिः संकल्पेनाध्यवसायेनच कामस्याविरोधस्य

आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणः ॥ कामरूपेणकौंतेयदु[illegible]रेणानलेन च ॥ ३९ ॥
इंद्रियाणिमनोबुधिरस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनं ॥ ४० ॥
तस्मात्वमिंद्रियाण्यादौ नियम्यभरतर्षभः ॥ पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनं ४१ ॥

दिंद्रियाणिष्ठानमुच्यते एतैरिंद्रियादिभिः दर्शनादिव्यापारवद्भिराश्रयभूतैर्विवेकज्ञानमावृत्यदेहिनंविमोहयति ॥ ४० ॥ यस्मादेवंतस्मात्वमितित्रादौमिमे
हात्सर्गमेवदंद्रियाणिमनोबुधिचनियम्यपापरूपमेनंकामंहिस्फुटंप्रजविघातह ॥ यद्वा प्रजहिपरित्यज्य ॥ ज्ञानमात्मविषयं विज्ञानंशास्त्रीयंतयोर्ना
परेद्यांज्ञं विज्ञानंविद्ध्यासनं विज्ञायप्रज्ञायंकुर्वीरितिप्रज्ञे ॥ ४१ ॥ ॥ छ ॥ श्री॰ ॥ श्री॰ ॥ श्री॰ ॥ श्री॰ ॥ श्री॰ ॥ श्री॰ श्री॰ ॥ श्री॰ श्री॰ ॥ श्री॰ श्री॰ ॥

तयोर्गुणोपायाग्रछेतिहितुक्तं तदेतदसहमानोर्जुनउवाच । अथकेनेति ॥ वृष्णिवंशोऽवतीर्णत्वाद्वार्ष्णेय हेवार्ष्णेय ॥ अयंपुरुषःपापंकर्तुमनिच्छन्नपिकेन
प्रयुक्तःप्रेरितोयंपुरुषःपापंच ॥ कामक्रोधौ विवेकबलेन निरुंधतोपिपुरुषस्य पुनःप्रायेणप्रवृत्तिदर्शनात् अन्यावपितयोर्मूलभूतः कश्चित्प्रवर्तकोस्तीति शंकमानः पृच्छति
प्रः ३६ ॥ अत्रोत्तरंश्रीभगवानुवाच कामएषइति ॥ यस्त्वयापृष्टोहेतुः एषकामएव ॥ ननुक्रोधोपिपृथक्त्वयोक्तः इंद्रियस्येंद्रियस्यार्थेइत्यत्र शास्त्रं ॥ न । नैतत्ततःपृथक्
किंतुक्रोधोप्येषएवकामस्वहिकेनचित्प्रतिहतः क्रोधात्मनापरिणमते ॥ ततःएवंप्रयत्नेनो क्रोधोपिक्रोधःकामसत्वयक्रोधजयप्रयत्नाभिप्रायेण कामेनैकीकृत्योच्य

अर्जुनउवाच ॥ अथकेनप्रयुक्तोयंपापंचरतिपूरुषः ॥ अनिच्छन्नपिवार्ष्णेय बलादिवनियोजितः ॥ श्रीभगवानुवाच ॥ कामएषक्रोधएषरजोगुणसमुद्भवः ॥ म
हाशनोमहापाप्मा विद्ध्येनमिहवैरिणं ॥ धूमेनाव्रियतेवह्निर्यथादर्शोमलेनच ॥ यथोल्बेनावृतोगर्भस्तथातेनेदमावृतं ॥ ३८ ॥ श्रीरामायनमः ॥

तेरजोगुणात्समुद्भवतीतितथा ॥ अनेनसत्वगुणाभावजसिद्धप्रयत्नेसतिकामोपिसुखीयत्नरतिसचित्तं ॥ एनंकामंहहमोक्षमार्गेवैरिणंविद्धि ॥ अयंचवद्ध्यमा
नःक्रमेणाहंतअयएवयतोभ्यासोदाशौसंधानुपत्तत्वाह महाशनमहद्शनंयस्य दुःखपूरस्तम्बर्च ॥ नत्वसात्मासंधातुंशक्यः यतोमहापाप्मात्युग्रः ३७ ॥ कामस्यवैरि
त्वंदर्शयति धूमेनेति ॥ यथाधूमेनसहजेनवह्निराव्रियतेआच्छाद्यते यथाचादर्शोमलेनागंतुकेनयथाचोल्बेनजरायुणागर्भवेष्टनचर्मणागर्भःसर्वतोनिरुद्धोभवतः ॥ तथाप्रकार

नन्वेवं प्रकृत्यधीनैव चेत्पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधवैयर्थ्यं प्राप्तमित्याशंक्याह इंद्रियस्येति वीप्सया प्रत्येकं सर्वेषामिंद्रियाणामित्युक्तं ॥ अ
र्थे स्वस्य विषये अनुकूले रागः ॥ प्रतिकूले द्वेषः इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यंभाविनौ ततश्च तदनुरूपा प्रवृत्तिरिति भूतानां प्रवृत्तिरिति भूता
योर्वशवर्ती न भवेदिति शास्त्रेण नियम्यते हि यस्मादस्य श्रेयोर्थिनस्तौ परिपंथिनौ विपक्षौ ॥ अयं भावः ॥ विषयस्मरणादिना रागद्वेषावुत्पा
द्यान्तरे पुरुषमनर्थगंभीरे स्रोतः पातयत्वं प्रकृतिर्बलात्कारयति ॥ शास्त्रं तु ततः प्रागेव विषयेषु रागद्वेषप्रतिबंधके परमेश्वरभजनादौ

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ॥ ३४ ॥
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

प्रवर्तयति ततश्चानर्थगंभीरस्रोतः पातात्पूर्वमेव नावमाश्रित्य नानर्थप्राप्तिरिति ॥ ३४ ॥ नन्वेवं साध्यावि किं पश्चाद्धितं हंसीप्रव्रजनप्रकाशस्वधर्मैवर्जित
अचिंतसके तर्हि स्वधर्मस्य युद्धादेः दुःखरूपस्य यथावत्कर्तुमशक्यत्वात् परधर्मस्य चाहिंसादेः सुकरत्वाद्धर्मत्वाविशेषाच्च तत्र प्रवर्तितुमिच्छं
धिवशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ती
त्याधि ९८॥

एवंभूतेश्वरज्ञानस्य फलमाह योमामिति ॥ एवमुक्तप्रकारेणासंमूढो निश्चितमतिः सन् यो मां पुरुषोत्तमं जानाति ॥ स सर्वभावेन सर्वप्रकारेण मामेव भजति ततः सर्ववि
भजतिततः सर्ववित्तोविभवति ॥ १९ ॥ अध्यायार्थमुपसंहरति इतीति ॥ इति अनेन संक्षेपप्रकारेण गुह्यतमं अतिरहस्यं संपूर्णं शास्त्रमेव यथोक्तं पुनर्न विंशति
श्लोकाध्यायमत्रेहि अनल्पमस्तुलघुत्वं ॥ अत एवैतत् मदुक्तशास्त्रं बुद्ध्वा बुद्धिमान् सम्यक् ज्ञानी स्यात् कृत कृत्यश्च स्यात् हे भारत त्वं कृत कृत्योसीति कं
वकृत्यमित्यभिभावाः ॥ २० ॥ संसारपाशिनं छित्वा स्वस्थं पंचदशेऽत्र सुः ॥ पुरुषः नमेयोगी खे परंपरमुपाश्रितः ॥ २१ ॥ सुबोधिन्यां टीकायां पंचदशोध्यायः ॥ आसु
रीसंपदं त्यक्त्वा दैवीमेवाश्रिता नराः ॥ मुमुक्षवः इति निर्णेतुं तद्विवेकोऽत्र षोडशे ॥ १ ॥ पूर्वाध्याये तेनं बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेत्युक्तं ॥ तत्र कस्य सत्वं

योमामेवमसंमूढो जानाति पुरुषोत्तमं ॥ स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुद्ध्वा बुद्धिमान् स्यात्
कृतकृत्यश्च भारत ॥ २० ॥ इति श्रीभगवद्गीतासु पंचदशोध्यायः ॥ श्रीभगवानुवाच अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥ दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं

बुद्ध्वा को वा न बुध्यत इत्यपेक्षायां तत्वज्ञानाधिकारिणो अनधिकारिणश्च विवेकार्थं षोडशाध्यायारंभः ॥ निरूपिते हि कार्याधिकारिणि तत्साभवति
तदुक्तं भवेत् ॥ भावो यो येन वोढव्यः स ग्राह्यो लौकिको यदा ॥ तदाकलस्य वोधेनि फलकं कानु निश्चयणइति ॥ तत्राधिकारि विशेषणभूतां दैवीसंप
दमाह ॥ श्रीभगवानुवाच ॥ अभयमिति त्रिभिः ॥ अभयं भयाभावः ॥ सत्वस्य चित्तस्य संशुद्धप्रसन्नता ॥ ज्ञाने योगे आत्मज्ञानोपाये व्यवस्थितिः पर
निष्ठा ॥ दानं स्वभोज्यस्यान्नादेर्यथोचितसंविभागः ॥ दमो बाह्येंद्रियसंयमः ॥ यज्ञो यथाधिकारं दर्शपूर्णमासादि स्वाध्यायो ब्रह्मयज्ञादिनिर्णयनं ॥ तप

किंचहसेति ॥ अहिंसा परपीडावर्जनं ॥ सत्यं यथादृष्टार्थभाषणं ॥ अक्रोधः ताडितस्यापि चित्तक्षोभानुत्पत्तिः ॥ त्यागः औदार्यं शांतिश्चित्तोपरतिः अपै
शुनं परोक्षे परदोषप्रकाशनं तद्वर्जनमपैशुनं ॥ भूतेषु दीनेषु दया ॥ अलोलुप्त्वं अलोलुपत्वं ॥ वर्णलोपश्चार्षः ॥ मार्दवं मृदुत्वम् अक्रौर्यं ह्रीः अकार्यप्रवृत्तौ लोक
लज्जा ॥ अचापलं व्यर्थक्रियाराहित्यं ॥ २ ॥ किंचतेति च प्रागल्भ्यं ॥ क्षमा परिभवादिषूत्पद्यमानस्य क्रोधस्य प्रतिबंधः ॥ धृतिर्दुःखादिभिरवसीदतश्चित्तस्य स्थिरी
करणं ॥ शौचं बाह्याभ्यंतरशुद्धिः अद्रोहो जिघांसाराहित्यं ॥ अतिमानिता आत्मन्यतिपूज्यत्वाभिमानः तदभावो नातिमानिता एतान्यभयादीनि ष

अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं ॥ २ ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥ भवंति
संपदं दैवीमभिजातस्य भारत ॥ ३ ॥ दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ॥ ४ ॥ दैवी सं
पद्विमोक्षाय निबंधायासुरी मता ॥ मा शुचः संपदं दैवीमभिजातोऽसि पांडव ॥ ५ ॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ॥ ॥ ॥

दैवीं आसुरीं संपदमभिजातस्य भवंति ॥ तदेवोक्तं सात्त्विकीं संपदमाह । लक्ष्य तदभिमुखेन जातस्य भाविकल्याणस्यैते भवंतीत्यर्थः ॥ आसुरी
मसंपदमाह दंभ इति ॥ दंभो धर्मध्वजित्वं दर्पो धनविद्यादिनिमित्तश्चित्तस्योत्सेकः ॥ अभिमानो व्याख्यातः ॥ क्रोधः प्रसिद्धः पारुष्यं निष्ठुरोक्तं अ
ज्ञानमविवेकः ॥ आसुरीमित्युपलक्षणं ॥ आसुरीं राक्षसीं च संपदमासुरीं भवितव्यजातस्य एतानि दंभादीनि भवंतीत्यर्थः ॥ ४ ॥ ॥ ॥

॥श्री॰गी॰टी॰॥
॥२३७॥

एतयोः संपदोः कार्यं दर्शयन्नाह दैवी संपदिति। दैवी या संपत् सा मोक्षाय दिष्टे तत्त्वज्ञाने ऽधिकारि। आसुरी या संपत् सा तु नियमेन संसाराय मता। एतच्च
श्रुत्वापि नूनमहमत्राधिकारी न भवामीति संदेहव्याकुलचित्तमर्जुनमाश्वासयति हे पांडव मा शुचः। शोकं मा कार्षीः यतस्त्वं संपदमभिजातो ऽसि॥५॥ सर्वप्राणिनामेता वर्जा
यितव्येति तदर्थमासुरीं संपदं प्रपंचयितुमाह द्वाविति। द्वौ द्विः प्रकारौ भूतानां सर्गौ भवतश्च नातु॥ असुरस्वभावप्रकारमाह केचन दैवी सुत्तासुरो
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता इत्यादिना नववध्यायोक्तप्रकृतिद्वैविध्येन विरोधः स्पष्टमन्यत्॥६॥ आसुरीं विस्तरेण निरूपयति प्रवृत्तिं चेत्यादि द्वा
दशभिः धर्मे प्रवृत्तिं निवृत्तिं अधर्मान्निवृत्तिं च असुरस्वभावा जना न जानंति॥ अतः शौचं नाचारः सत्यं च तेषु नास्ति॥ ननु वेदोक्तयोर्धर्माधर्मयोः॥ रक्ष

देवो विस्तरतः प्रोक्ता आसुरं पार्थ मे शृणु॥६॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः॥ न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥७॥ असत्यमप्रतिष्ठं ते जगदा
हुरनीश्वरं॥ अपरस्परसंभूतं किमन्यत्कामहैतुकं॥ प्रवृत्तिं निवृत्तिं च कथं विदुः कुतो वा धर्माधर्मयोरनंगीकरणे जगतः सुखदुःखाद्यवस्थाः स्यात् कथं वा
यौ॰ धारादिविषया सीता नामतिवर्तन स्वयं नंगीकरणे च कुतो जगदुत्पत्तिः स्यात्॥ अत आह असत्यमिति। नास्ति सत्यं वेदपुराणादि प्रमाणं यस्य
एवं न तादृशं जगदाहुः वेदानां प्रमाणमसत्यं तदर्थः। न तु नः प्रयोदेहस्य कर्त्रे मुक्तिर्भंजले पावर इत्यादि॥ अतएवं नास्ति धर्माधर्मव्यवस्थाप्रतिष्ठाव्य
वस्थाहेतुर्यस्य तत्ताादृशं। अनीश्वरं विश्वमप्रतिष्ठं॥ अतएव नास्ति ईश्वरः कर्ता नियंता यस्य तदीश्वरं जगदप्याहुः। न हि कुतो ऽस्य जगदुत्पत्तिं वदंतीत्यत आह अपरस्प
रसंभूतं अपरश्च परस्परं ता अन्योन्यतः॥ स्त्रीपुरुषमिथुनात् संभूतं जगत्॥ किमन्यत्कारणं नास्त्यन्यत्किं किंतु कामहेतुकमेव कामहेतुकं संपुरुष

॥राम॥
॥२३७॥

किंच एतामिति नास्तिकोयंतिकानां दृष्टिं दर्शनमाश्रित्य नष्टात्मानः मलीनस्यचित्ताः संतोल्पबुधयः दृष्टार्थमात्रामतयः उग्रकर्माणि येषां
तेअहितानां वैरिणो भूत्वा जगतः क्षयाय प्रभवंति उद्भवंतीत्यर्थः ॥९॥ अपि च कामिति दुःखेरण पूरयितुमशक्यं काममाश्रित्य दंभमानमदैर्युक्ताः संतः
देवताराधानादौ प्रवर्तंते कथं असद्ग्राहान् गृहीत्वा अनेन मंत्रेण एतां देवतामाराध्य महानिधीन् साधयिष्याम इत्यादि दुराग्रहान्मोहादेव गृहीत्वा
कृत्म प्रवर्तंते अशुचीनि मद्यमांसादि विषयाणि व्रतानि येषां ते ॥१०॥ किं च चिंतामिति प्रलयो मरणमेवांतो यस्यास्तामपरिमेयां परिमातुमशक्यां

एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुधयः ॥ प्रभवंत्युग्रकर्माणः क्षयाय जगतोहिताः ९ काममाश्रित्य दुःपूरं दंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तं
तेशुचिव्रताः १० चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते का
मभोगार्थमन्यायेनार्थसंचयान् ॥१२॥

॥ चिंतामाश्रिताः नित्यं चिंतापरा इत्यर्थः कामोपभोग एव परमो येषां ते एतावदिति कामोपभोग एव परमः पुरुषार्थो नान्य इत्ये
ति कृतनिश्चयाः ॥ अर्थसंचयानीहंत इत्यन्वयः तथा च बार्हस्पत्यं सूत्रं काम एवैकः पुरुषार्थः इति चैतन्यविशिष्टः कायः पुरुष इति च ॥११॥ अत एव
आशेति आशा एव पाशास्तेषां शतैर्बद्धाः इतस्ततश्चाकृष्यमाणाः कामक्रोधौ परमयनमाश्रिताः कामभोगार्थमन्यायेन चौर्यादिना

तेषां मनोरथं कथयन्नरकप्राप्तिमाह इदमद्येति चतुर्भिः प्राप्स्ये प्राप्स्यामि मनोरथं मनसः प्रियं शेषं स्पष्टं ॥ एको च त्रयाणां श्लोकानां स्पष्टान
विमोहिताः प्राप्तो नरके पततीति चतुर्णामन्वयः ॥१३॥ किंच ॥ असाविति सिद्धः कृतकृत्यः स्पष्टमन्यत् ॥१४॥ किंच ॥ आढ्य इति आढ्यो धनेन धनसंप
न्नः ॥ अभिजनवान्कुलीनः यक्ष्ये यागादनुष्ठानेनापि दीक्षितान्तरेभ्यः ॥ सकाशान्महतीं प्रतिष्ठां प्राप्स्यामि ॥ दास्यामि स्तावकेभ्यः मोदिष्ये ह

यदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥१३॥ असौ मया ह
तः शत्रुर्हनिष्ये चापरानपि ईश्वरोहमहं भोगी सिद्धोहं बलवान्सुखी १४ आढ्यो भिजनवानस्मि कोन्यो
स्ति सदृशो मया: यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः १५ अनेकचित्तविभ्रांता मोहजालसमावृताः
प्रसक्ताः कामभोगेषु पतंति नरकेशुचौ ॥१६॥

र्षं प्राप्स्यामि इत्यज्ञानेन विमोहिताः ॥ मिथ्याभिनिवेशं प्रापिताः ॥१५॥ एवंभूताः प्राप्नुवंति नियतं अनुकेति ॥ अनेकेषु मनोरथेषु प्रवृत्तं चित्तं अनेक
न विभ्रांतं विक्षिप्तं ॥ तेनैव मोहमयेन जालेन समावृताः मत्स्या इव सूत्रमयेन जालेन पंञ्जरित कामभोगेषु प्रसक्ताः अभिनिविष्टाः संतो हा पापुचैक
शमलेन नरके पतंति ॥१६॥

यस्य पदं ति च पर्स्ते षां मनोरथ उक्तः स केवलं संसारकारादिप्रधान एव नतु सात्विकः स्वभिनयेनाह ॥ आत्मसंभाविता इति द्वाभ्यां ॥ आत्मनैव संभाविताः पूज्यतां
नीताः नतु साधुभिः कैश्चित् अत एव स्तब्धा अनम्राः ॥ धनेन यो मानमदस्ताभ्यामन्विताः ते नामयज्ञैः नाममात्रेण ये यज्ञाः यद्वा दीक्षितः सोमयाजीत्येवमादि नाम
प्रसिद्धये ये यज्ञास्तैः दंभेन नतु श्रद्धया ॥ अविधिपूर्वकं च यजन्ते तथा ॥ १८ ॥ पूर्वकत्वमेव प्रपंचयति ॥ अहंकारमिति ॥ १८ ॥ अहंकारादीन् संश्रि

॥ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ॥ यजन्ते नामयज्ञैस्ते दंभेनाविधिपूर्वकं ॥ १७ ॥ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ॥ मामा
॥ त्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८ ॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥ ॥ ॥

ताः सन्तः आत्मपरदेहेषु स्वदेहेषु च चिदंशेन स्थितं मां प्रद्विषन्तो यजन्ते दंभयज्ञेषु अश्रद्धया ॥ अभावादात्मनो हृदये वा भीजा भवन्ति तथा परस्वादीनामप्यविध
नाहं साध्यो येनात्मा द्रोह मामात्ममेवा च क्षिपन्तः इति प्रसंगः स्तुतं ॥ अभ्यसूयकाः सन्मार्गवर्तिनां गुणेषु दोषारोपकाः ॥ १८ ॥ तेषां च कदाचिदप्यासुरस्वभाव
प्रवृत्तिर्न भवतीत्याह तानहमिति द्वाभ्यां तानहं मां द्विषतः क्रूरान्संसारेषु जन्ममरणमार्गेषु तत्रापि आसुरीष्वेव अतिक्रूरासु व्याघ्रसर्पादियोनिषु अजस्रमनव
रतं क्षिपामि तेषां पापकर्मणः फलं ददामीति १९

॥श्री·गी·टी·॥ किंच । आसुरीमिति । मामप्राप्यैवेत्येवकारेण मत्प्राप्तिसंका कुतस्तेषां मत्प्राप्त्युपायं सन्मार्गमप्राप्य ततोऽप्यधमां कृमिकीटादियोनिं गतिं यान्तीत्यु
॥२३९॥ क्तं ह्यसंशयः ॥२०॥ अज्ञानामासुरस्वभावानां मध्ये सकलभूतदोषत्रयं सर्वत्र वर्जनीयमित्याह त्रिविधमिति कामः क्रोधः लोभः इदं त्रिविधं नरकस्य
द्वारं ॥ अत एवात्मनो नाशनं नीचयोनिप्रापकं तस्मादेतत्त्रयं सर्वात्मना त्यजेत् ॥२१॥ त्यागे च विशिष्टफलमाह एतैरिति तमसो नरकस्य द्वारभूतै

॥आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ॥ मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिं ॥२०॥ त्रिविधं न
॥ रकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रि
॥ भिर्नरः आचरत्यात्मनः श्रेयस्ततो याति परां गतिं ॥२२॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः न स सिद्धिमवा
प्नोति न सुखं न परां गतिं ॥२३॥

एतैस्त्रिभिः कामादिभिर्मुक्तो नरः ॥ आत्मनः श्रेयः श्रेयसाधनं तपोयोगादि कर्माचरति ॥ ततश्च मोक्षं प्राप्नोति ॥२२॥ कामादित्यागश्च धर्माचरणं विना
न भवतीत्याह य इति ॥ शास्त्रविधिं नरः उत्सृज्य यः कामकारतो यथेष्टं वर्तते न स सिद्धिं तत्त्वज्ञानं न प्राप्नोति ॥ न च सुखमुपशमं न च परां गतिं मुक्तिं प्राप्नोति ॥२३॥ ॥राम॥
॥१३९॥

फलितमाह तस्मादिति । इदं कार्यमिदमकार्यमित्यस्यां व्यवस्थायां तव शास्त्रं प्रमाणं निपुणं हि कमेव प्रमाणं अतः शास्त्रविधानोक्तं कर्म ज्ञात्वा इह क-
र्माधिकारे वर्तमानो यथाधिकारं कर्म कर्तुमर्हसि तन्मूलत्वात् सत्त्वशुद्धिसम्यक्ज्ञानमुक्तीनामिति भावः ॥ २४ ॥ दैवदेते पसंपत्तिसविभागेन षोडशे
न त्वसतोऽधिकारस्तत्र सात्त्विकस्येति दर्शितं ॥ इति श्रीसुबोधिन्यां टीकायां षोडशोऽध्यायः ॥ उक्ताधिकारहेतूनां श्रद्धामुख्यान सात्त्विकी । इति सप्तद-
शेऽध्याये श्रद्धाभेदस्त्रिधोच्यते ॥ १ ॥ पूर्वाध्यायान्ते यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥ न स सिद्धिमवाप्नोतीत्यनेन शास्त्रविधिमुत्सृज्य का-
मकारेण वर्तमानस्य ज्ञानेऽधिकारो नास्तीत्युक्तं ॥ तत्र यः शास्त्रविधिमुत्सृज्य कामकारं विना श्रद्धया वर्तमानास्तेषां किमधिकारोऽस्ति वा नेति बुभुत्सया अर्जुन
उ० ॥ य इति ये त्वनवशास्त्रा विधिमुत्सृज्य यजन्ते रत्नवेनन धनार्थं तु धात्वर्थे वर्तमाना न ग्रहस्ते ॥ तेषां श्रद्धया पूजनानुपपत्तेः आस्तिक्यबुद्धिर्हि श्र-

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि २४ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशा-
स्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपत्तियोगो नाम षोडशोऽध्यायः ॥ अर्जुन उ० ॥ ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः । तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्त-
मः १

द्धानवतोऽशास्त्रार्थज्ञानवतो शास्त्रार्थसंभवति तानेवाधिकृत्य विधायप्रवर्ति श्रद्धायजनेऽसात्त्विका दैवादिमादुत्तरसुपपतेः ॥ अतो नानत्साम्या पिलो ग्र-
श्रयति त्वके बुध्या वाऽज्ञानया शास्त्रार्थं तावेऽप्ययन्लमयज्ञानं केवलमाचरयंति यत्त्वेनन प्रश्रया । केचिद्वृद्धव्यवहाराद्यनादेः प्रवर्तमानानां तेन्नेनोपपन्नः येषा-
स्तु विधिमुत्सृज्य दुःखबुध्या आलस्याधानादहम्मकेवलमाचारप्रयत्नेन श्रद्धयान्विताः तेनोपपन्नेषां कुत्र भिषयाका निष्ठा प्रश्न एतामेव विशेषेण प्रपच्छेति
किंचलो आहो रजः ॥ श्रयगतम इति ते यान्देवपूजादि प्रवृत्तिं किंसत्त्वसंस्थिता रजतः संस्थितवा तमः संस्थिता वेत्यर्थः । साधायः सात्त्विकत्वात्तत्र ज्ञाने शाउ

अत्रोत्तरं श्रीभगवानु· त्रिविधेति ॥ अयमर्थः शास्त्रज्ञानतः प्रवर्तमानानां परमेश्वरपूजाविषया सात्विकी एकविधैव श्रधा लोकाचारमात्रेणानुप्रव
र्तमानानां देहिनां या श्रधा सात्विकि राजसी तामसी चेति त्रिविधा भवति तत्र हेतुः स्वभावजस्वभावः पूर्वजन्मसंस्कारः तस्माज्जाता स्वभावजा ॥ स्वभावस्य
न्यथाकर्तुं समर्थे हि शास्त्रोक्तं विवेकज्ञानं तत्तु तेषां नास्ति ॥ अतः केवलं पूर्वस्वभावेन भवतीति श्रधा त्रिविधा भवति तामिमां त्रिविधां श्रधां शृणु तद्
तदुक्तं सायात्मिकाबुधिरेकेह कुरुनंदनेत्यादिना ॥२॥ ननु च श्रधसान्विसेव सत्वकार्यत्वेन त्वयैव श्रीवभगवता उद्दिष्टं प्रतिनिर्दिष्टत्वात् यथोक्तं शास्त्रो
द्दमस्ति तितिक्षेत्रयः सत्वंद्यास्मृतिः तदुस्यागोऽस्त्हा ह्रीद्यादिस्वनिवृत्तिः धृतिरित्येता सत्वस्य घतयदति ॥ अतः कथमस्यास्त्रैविध्यमुच्यते तत्रा

श्रीभगवानु ॥ त्रिविधा भवति श्रधा देहिनां सा स्वभावजा सात्विकी राजसी चैव तामसी चेति तां शृणु ॥२॥ सत्वानुरूपा सर्वस्य श्रधा भवति रजसी ॥ श्रधा
मयोयं पुरुषो यो यछ्रद्धः स एव सः ॥३॥

तथापि रजस्तमोयुक्तपुरुषाणां सत्वयुक्तेन रजस्तमोभिभवेन श्रधस्य त्रैविध्यान श्रधयापि त्रैविध्यं वक्तव्यमित्याह स
त्वानुरूपेति सत्वानुरूपा सत्वतारतम्यानुसारिणी सर्वस्य विवेकेनोवानो लोकस्य श्रधा भवति तस्मात् पुरुषः लौकिकः श्रधा भवति श्रधाविका
यत इत्यर्थः ननु देवाह्यो पञ्चदशपादस्यो राजसी श्रधा यस्य स सत्वरः तादृश्या श्रधया युक्तः स एव सः सर्वदा तत्तो त्कर्षेण सात्विकश्रधया युक्तः पुरुषः सएव नरस्त
दृशावस्कारेण सात्विकश्रधायुक्तः ॥ स एव भवति यस्तु रजउत्कर्षेण राजसश्रधायुक्तः सयुरस्तादृशा एव भवंति यस्तु तमसयुक्तोत्कर्षेण तामसश्रधायुक्त
स्तादृश एव भवंतीति लोकाचारमात्रेण प्रवर्तमाने — सात्विकराजसतामसश्रद्धाव्यवस्था शास्त्रजनितं विवेकज्ञानयुक्तानां तु स्वभावविजये

सात्विकराजसतामसानामुत्तरोत्तरं ३

सात्विकादिभेदमेव कार्यभेदेनप्रपंचयंति यजंतइति सात्विकाजनाः सत्वप्रकृतीन्देवेनेयपूजंतेपूजयंती राजसास्तु रजःप्रकृतीन्यक्षान्राक्षसांश्चजयंते एतेभ्योन्येतु विल
क्षणास्तामसाजनास्तामसानेवप्रेतान्भूतगणांश्चयजंते सत्वादिप्रकृतीनांतत्रदेवतानांपूजादिविभित्तन्नत्पूजकानांसात्विकात्वादि ज्ञातव्यमित्यर्थः ४ राजसतामसेषुपु
नर्विशेषांतरमाह अशास्त्रविहितमशास्त्रमितिद्वाभ्यां शास्त्रविधिमजानंतोपिकेचित्प्राचीनासंस्कारपुण्यसंस्कारेणसात्यकाएवभवंति केचित्तुमध्यमाराजसाभवंति अध
मास्तुतामसाभवंतियेपुनस्तेतमंदभाग्याआगतायुगतयाधंजसंगेनतदाचारेणकामेतुसंतु अशास्त्रविहितंघोरंभूतपीडाकरंतपस्तप्यंते तत्रहेतुतवःदंभाहंका

यजंतेसात्विकादेवान्यक्षरक्षांसिराजसाः प्रेतान्भूतगणांश्चान्येयजंतेतामसाजनाः अशास्त्रविहितंघोरंतप्यंतेयेतपोधनंजय ॥
दंभाहंकारसंयुक्ताःकामरागबलान्विताः ५ कर्षयंतःशरीरस्थंभूतग्राममचेतसः मांचैवांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयान् ६ ॥ श्रीराम

राभ्यांसंयुक्ताः तथाकामोभिलाषः रागआसक्तिः बलंवाग्रहः एतैरन्विताः संतस्तानासुरनिश्चयान्विद्धीत्युत्तरेणान्वयः ५ किंचकर्षयंतइति शरीरस्थंप्राकामोलि
षः सन्न्वालमाग्रहः एतैरन्वयः संसस्तानांसमूहंकर्षयंतः वृथैवोपवासादिभिः कृशंकुर्वंतः अचेतसः अविवेकिनः मांचतत्साक्षितयांतःशरीरस्थंदेहमा
स्थ्यादेहमध्येस्थितंमदाज्ञालंघनेनैवेतिकर्षयंतः वृथैवोपवासादिभिः येतानासुरनिश्चयान् आसुरोअतिक्रूरोनिश्चयोयेषांतान्‌ःसंतएवतपश्चरंतिनिश्चयोयेषांतास्तान्वि
द्धि ६

॥गी॰टी॰॥
॥१४१॥

आहारादिभेदादपि सात्विकादिभेदं दर्शयितुमाह आहारस्त्विति त्रयोदशभिः सर्वस्यापि जनस्यापि आहारोऽन्नादिः सत्वादिगुणत्रयेण त्रिविधः प्रियो भवति
तथा यज्ञस्तपो दानानि च त्रिविधानि भवन्ति तेषां वक्ष्यमाणमिमं भेदं शृणु एतेन राजसतामसाहारपरित्यागेन सात्विकाहारपरिसेवया सत्ववृद्धौ यत्नः
कर्तव्य इति दर्शितं कथ्यते ७ तत्राहारत्रैविध्यमाह आयुरिति त्रिभिः आहु जीवि॰ तं सत्वमुत्साहः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं चित्तप्रसादः
प्रीतिरभिरुचिस्ते आयुरादीनि वि॰ वर्धनाः विवृद्धिकाराः ते च रस्याः रसवन्तः स्निग्धाः स्नेहयुक्ताः स्थिराः देहे शक्तांशेन चिरकालावस्थायिनः हृद्याः हृ

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ७ आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः
स्थिरा हृद्या आहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ९

द्याः दृष्टमात्रेऽपि हृदयंगमाः एवंभूता आहारा भोज्यद्रव्याः सात्विकस्य प्रियाः ८ तत्राह कट्विति अतिशब्दः कट्वादिषु सप्तस्वपि संबध्यते अतिकटुर्निंबादिः राम
निंबादिः अत्यम्लो निस्तवलो तनु प्रसिद्धः अतितीक्ष्णो मरिचादिः अतिरूक्षः कंगुकोद्रवादिः अतिविदाही राज्यादिः अतिक हाहृदयः राजसस्येष्टाः प्रियाः दुःखं ४७१
तत्कालिकं दुःखं पश्चाद्भावि शोकः पश्चाद्भाविदौर्मनस्यं आमयो रोगः एतानि प्रददातीति प्रयच्छन्ति ९ ॥ ॥ ॥ ॥

न्नचायामिति यातोयामः प्रहरोयस्य यद्भक्ष्यं नातिरसं तत्यातयामं पाचावस्थायां शपूमित्यर्थः गतरसं निःपीडितसारं पूतिदुर्गंधं पर्युषितं दिनां
तरपक्वं उच्छिष्टं अन्यथा भुक्तावशिष्टं अमेध्यामभक्ष्यं कलंजादि एवंभूतं भोज्यं तामसस्य प्रियं १० यज्ञोपि त्रिविधः तत्र सात्विकं यज्ञमाह अफलाकां
क्षिभिर्हीनैः पुरुषैः विविधैः विधिना शास्त्रावश्यकतया विहितो यज्ञ इज्यते अनुष्ठीयते स सात्विकोयज्ञः कथं इज्यते यष्टव्यमेवेति यज्ञानुष्ठानमेव कार्यं

यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं १० अफलाकांक्ष
भिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः ११ अभिसंधाय तु फलं दंभार्थमपि चै
वयत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं प

नाप्यनेन फलं साधनीयमित्येवं मनः समाधाय एकाग्रं कृत्वेत्यर्थः ११ राजसं यज्ञमाह अभिसंधायेति फलमभिसंधाय उद्दिश्य तु यत्तु इज्यते यतः कि
यज्ञेदंभार्थं च महत्वस्यापनाय तं यज्ञं राजसं विद्धि १२ तामसं यज्ञमाह विधिहीनमिति विधिहीनं शास्त्रोक्तविधिशून्यं असृष्टान्नं ब्राह्मणे
भ्यो न सृष्टान्नं निष्पादितमन्नं यस्मिन् मंत्रैर्हीनं यथोक्तदक्षिणारहितं च श्रद्धाशून्यं यज्ञं तामसं परिचक्षते कथयन्ति शिष्टाः १३ ॥ १३ ॥

तपसः सात्त्विकादिभेदं दर्शयितुं पृथक्तावच्छारीरादिभेदेन तस्य त्रैविध्यमाह देवद्विजेति त्रिभिः प्राज्ञाः गुरुव्यतिरिक्ताः अन्येपि तत्त्वविदः देवद्विजगुरुप्राज्ञादिपूजनं शौ
चादिकं शारीरं शरीरनिष्पन्नं तप उच्यते १४ वाचिकं तप आह अनुद्वेगेति उद्वेगं भयं न करोतीत्यनुद्वेगकरं वाक्यं सत्यं च श्रोतुः प्रियं च हितं च परिणा
मे सुखकरं स्वाध्यायाभ्यसनं वेदाभ्यासश्च वाचा निष्पन्नं तपः वाङ्मयं १५ मानसं तप आह मनस इति मनसः प्रसादः स्वच्छता सौम्यत्वमक्रूरता
मौनं मुनेर्भावः मननमित्यर्थः आत्मनो विनिग्रहः विषयेभ्यः प्रत्याहारः भावसंशुद्धिः व्यवहारे मायाराहित्यं इत्येतन्मानसं तपः १६ तदेवं शारीर

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते १४ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् स्वाध्या
याभ्यसनं चैव वाङ्मयं तप उच्यते १५ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६ श्रद्धया
परया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते सत्कारमानपूजार्थं तपो दंभेन चैव यत् क्रियते तदिह प्रोक्तं राजसं च
लमध्रुवं १८

वाङ्मनोभिर्निर्वृत्तं त्रिविधं तपो दर्शितं तस्य त्रैविध्यं गतस्य सात्त्विकादिभेदेन त्रैविध्यमाह श्रद्धयेति त्रिभिः त्रिविधमपि तपः श्रद्धया युक्ताः अफ
लाकांक्षिभिः पुरुषैः एकाग्रचित्तैर्नरैः कृतं तत्सात्त्विकं १७ राजसमाह सत्कारेति साधुकारः साधुरयमिति नायकः स्तुत्यादिः वाक्पूजा मानः प्रत्युत्था
नाभिवादनादिः देहिकी पूजा अर्थलाभादिः एतदर्थं दंभेन च यत्तपः क्रियतेऽत्र तदेवचयन् १८ ॥

तामसंतपउदाहृतम्मूढेतिमूढग्राहेनाविवेककृतेनदुराग्रहेनात्मन॥पीडयायत्तपःक्रियतेपरस्योत्सादनार्थंपस्यविनाशार्थंवाभिचाररूपेणत
त्तामसमुदाहृतंकथितं॥१९॥इदानींक्रमप्राप्तमेवदानस्यत्रैविध्यमाहदातव्यमिति॥दातव्यमित्येवंनिश्चयेनयद्दानंदीयते॥अनुपकारिणेप्रत्युपकारासम
र्थायः॥देशेकुरुक्षेत्रादौ॥कालेग्रहणादौ॥पात्रेचेतिदेशकालसाहचर्यात्सप्तमीप्रयुक्ता॥पात्रंचतादृशंतपः॥श्रुतादिसंपन्नाःपात्रमपेक्ष्य

॥मूढग्राहेणात्मनोयत्पीडयाक्रियतेतपः॥परस्योत्सादनार्थंवातत्तामसमुदाहृतं॥१९॥दातव्यमितियद्दानंदीयतेनुपकारिणे॥
॥देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतं॥यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः॥दीयतेचपरिक्लिष्टंतद्दानंराजसमुदाहृतं॥२१॥

र्थेः॥यद्यापाश्रमतिचतुर्वेदेषु॥पात्ररक्षकापेक्षार्थे॥सहिसर्वस्माद्दायकात्रागादातर[illegible]तीत॥यदेवंभूतंतद्दानंसात्विकं॥२०॥राजसंदानमाहयत्त्विति॥कालां
तरेचमांप्रत्युपकारमेतौकरिष्यतीत्येवमर्थंफलंवास्वर्गादिकमुद्दिश्ययत्तुनर्दानंदीयतेपरिक्लिष्टंचित्तक्लेशसंयुक्तंयथाभावंतत्येवंतद्दानंराजसमुदाहृतं॥२१॥ ॥ ६

गी॰ टी॰ ॥
॥ १४३ ॥

नामसं दानमाह ॥ अदेशेति ॥ अदेशे ति अशुचिस्थाने अकाले अशौचसमये अपात्रेभ्यो विटनटादिभ्यो यद्दानं दीयते देशकालपात्रसंपत्तावपि असत्कृतं पादप्रक्षालनादिसत्काररहितं ॥ अवज्ञातं तिरस्कारयुक्तं एवंभूतं दानं तामसमुदाहृतं ॥ २२ ननु चैवं विचार्यमाणे सर्वमपि यज्ञतपोदानादि राजसतामसप्रायमेवेति
प्रायमेवेति सर्वे यज्ञादि यथाविधि अनुष्ठानं अनन्यविधत्वादि सात्विकव्यापारं प्रकारं दर्शयितुमाह ॥ ॐ तत्सदिति ॥ ॐ तत्सदित्येवं त्रिविधो ब्रह्मणः परमात्म

॥ अदेशे अकाले यद्दानमपात्रेभ्यश्च दीयते ॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतं ॥ २२ ॥
॥ ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

नो निर्देशो नामव्यपदेशः स्मृतः शिष्टैः तत्र ॐ इति प्रसिद्धं अथ तदिति श्रुतिप्रसिद्धेः सदिति च सद्रूपत्वान्नाम ॥ जगत्कारणत्वेनाति प्रसिद्धत्वात् तदिति सर्वेषां परोक्षत्वात्
दे सदिति सद्रूपत्वान्नाम प्रशस्तत्वादिभिः सच्छब्दो ब्रह्मणो नाम ॥ अयं त्रिविधोऽपि नामनिर्देशो यज्ञादिवैगुण्यपरिहारार्थं तत्तुल्यस्य नामस्य प्राशस्त्यं दर्शयति तेन त्रिवि

इदानीं प्रणवकर्मोदाहरणादीनां प्रशस्तत्वं दर्शयन् ॐकारस्य तावदाह तस्मादिति ॥ यस्मादेवं ब्रह्मणो निर्देशः प्रशस्तः तस्मादोमित्युदाहृत्य उच्चार्य ब्रह्मवादिनां यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततं सर्वदा त्रैवर्णिकानामपि प्रवर्त्तन्ते सगुणा भवन्तीत्यर्थः ॥ २४ ॥ द्वितीयं नाम प्रशंसति तदिति ॥ तदित्युदाहृत्येति पूर्वस्मादनुषंगः तदित्युदाहृत्य मुमुक्षुभिर्मोक्षकाङ्क्षिभिः फलाभिसंधिमकृत्वा यज्ञाद्याः क्रियाः क्रियन्ते ॥ ततश्चित्तसौ धनद्वारेण फलसंकल्पत्यागेन मुमुक्ष

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधेयज्ञाः सततं ब्रह्मवादिनां ॥ २४ ॥ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥ श्रीमते रामानुजाय नमः ॥

फलसंधाय कृत्वा तच्छब्दनिर्देश्याः प्रशस्ता इत्यर्थः ॥ २५ ॥ सच्छब्दस्य प्राशस्त्यमाह सद्भाव इति द्वाभ्यां ॥ सद्भाव इति अस्तित्वे वेदवक्तृस्य पुत्रादिकमस्तीत्यस्मिन्नर्थे ॥ साधुभावे च साधुत्वे च वेदवक्तृः स्य पुत्रादिश्रेष्ठ इत्यस्मिन्नर्थे सदित्येतत्प्रयुज्यते प्रशस्ते मांगलिके विवाहादि कर्मणि च सदिदं कर्मेति सच्छब्दो युज्यते प्रयुज्यते संगच्छत इति वा ॥ २६ ॥ किंच यज्ञ इति यज्ञादिषु च या स्थितिः ॥ तात्पर्येणावस्थानं तदपि सदित्युच्यते ॥ यस्य चेदं नामत्रयं सरव

किं च परमात्मार्थे यः प॥ लेयस्स तत्तदर्थैकर्म्मस॥ जोमहारत्वं ग्रहां गलापरिमार्गनोफलेपरंगमालिकाल्लि क्रियातस्सिधयेयदिन्यत्कर्मः क्रियते
उघामघालि लोकेत्र धर्माजुनादि विषयं॥ तत्र कर्म तदर्थीयंत ज्ञापि व्याविहारिसदित्येवाभिधीयते॥ यस्मादेवमंत्र प्रशस्तमे तन्नाम त्रयं यस्मा
देतत्सर्वं कर्म गुणपूर्णं कीनेये दिति तात्पर्यार्थः॥ अत्र चार्पवस्तमवमस्या विधिकल्पवे विधेयं स्तूयतेव स्थितीमायात॥ अपरेनुप्रवर्तते विधा

अश्रद्धयाहुतं दत्तं तपस्तप्तं कृतं चयत॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥२८॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा
र्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥१७॥

नोक्ताः किं पुनर्नेमोक्षकांक्षिभिः इत्यादिना द्विधित पापपरनमनीपल्माप॥ ननु सद्भावे साधुभावे चेत्या
दिष्वप्रवृत्पार्थतात्मनशंगच्छनरीतिश्लोक्ताक्रमेणविधिकल्पेवः ज्यायसी ॥२२॥ इदानीं सर्वकर्मस्तुप्रथये प्रश्नमर्थमप्राधान्यं तस्सर्वं निरं ति प्रपयेति
अश्रद्धयाहुतं हवनं दत्तं दानं तप्तं निवर्तितं तपः॥ यद्वापरमपिकृतं कर्म तत्सर्वं मसदित्युच्यते॥ यतस्तत्ते परलोकान्तरे न फलमिति॥ विगुणत्वात॥ नोइह न चा
स्मिँल्लोके फलं तिश्रयं षास्करत्वात॥ २८॥ अजस्मनमोभांपीमक्राक्षप्रधासतत्वमपि स्थितः॥ तन्वशानेधिकारी पनादि निहमप्तदरोस्थिते सुबोधिन्यां टीका

श्रद्धात्रयविभागः॥१७॥

॥राम॥
॥१४४॥

न्यासत्यागविभागेन सर्व्वगीतार्थसंग्रहं स्पष्टमष्टादशे प्राह परमार्थविनिर्णयं अत्र च सर्व्वकर्म्माणि मनसा संन्यस्यास्ते सुखं वशी संन्या
सयोगयुक्तात्मेत्यादिषु कर्म्मसंन्यास उपदिष्टः त्यक्त्वा कर्म्मफलासंगं नित्यतृप्तो निराश्रयः सर्व्वकर्म्मफलत्यागं ततः कुरु यतात्मवानि-
त्यादिषु च फलमात्रत्यागेन कर्म्मानुष्ठानमुपदिष्टं नच परस्परविरुद्धं सर्व्वज्ञः परमकारुणिको भगवानुपदिशेत् अतः कर्म्मसंन्यासस्य तदनुष्ठानस्य

अर्जुन उवाच संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं त्यागस्य च हृषीकेश पृथक्केशिनिषूदन १

चाविरोधप्रकारं बुभुत्सुरर्जुन उवाच संन्यासस्येति भो हृषीकेश सर्व्वेन्द्रियनियामक हे केशिनिषूदन केशिनाम्नो हि महतो हयाकारस्य दैत्यस्य युद्धे मुखं
व्यादाय भक्षयितुमागच्छतः तं तत्र सैन्येव बाहुना कर्क्कटिकाफलवत् तं विदार्य निषूदितवान् अतएव हे हे संबोधनं संन्यासस्य तत्त्वं पृथक्विविधेमीछे
सि. १

तत्रोत्तरं ॥श्रीभगवानु०॥ काम्यानामिति पुत्रकामो यजेत स्वर्गकामो यजेतेत्येवमादिकामोपबंधेन विहितानां काम्यानां कर्मणां न्यासं त्यागं संन्यासं कवयो विदुः सम्यक्फलैः सह कर्मणामपि न्यासं संन्यासं पंडिता विदुः जानंतीत्यर्थः सर्वेषां काम्यानां नित्यनैमित्तिकानां च कर्मणां फलमात्रत्यागं प्राहुस्त्यागं विचक्षणाः निपुणाः ननु स्वरूपतः कर्मत्यागं विना नित्यनैमित्तिकानां फलाभावात् विद्यमानस्य फलस्य कथं त्यागः स्यात् नहि वंध्यायाः पुत्रत्यागः संभवति उच्यते यद्यपि स्वर्गकामः पशुकाम इत्यादिवत् संध्यामुपासीत यावज्जीवमग्निहोत्रं जुहोतीत्यादिषु फलविशेषो न श्रूयते तथा

श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २ ५

ष्वपुरुषव्यापारे प्रेक्षावंतं प्रवर्तयितुमशक्तेश्च नित्यविधिर्विश्वजिनेत्यादि स्विवशाम्यातः किमपि फलमाक्षिप्यत एव नचोपात्तदुरितक्षय
स्वसिद्धेरेव विधेः प्रयोजनमिति मंतव्यं पुरुषमित्यनुपपत्तेः परं हस्य श्रूयते हि ब्धपिफलं सर्व एते पुण्यलोका भवंतीति कर्मणा पितृलोक इति धर्मेणापा राम
पमपनुदतीत्येवमादिषु तस्मात्युक्तमित्ये कर्मफलत्यागं विचक्षणा इति २ १४५

ननु च फलत्यागेन पुरुषस्य निःफलेषु कर्म्मसु प्रवृत्तिरेव स्यात् ॥ तन्न सर्वेषामपि कर्म्मणां संयोगपृथक्त्वेन विविदिषार्थेन॰यावि
नियोगात् ॥ तथा च श्रुतिः तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति ॥ अतः प्रतिपदोक्तं स
र्व्वं फलं बन्धकत्वेन त्यक्त्वा विविदिषार्थं सर्व्वं कर्म्मानुष्ठातव्यं त एव ॥ विविदिषा च नित्यानित्यवस्तुविवेकेन निवृत्तदेहाद्यभिमानतयोत्पु
धेयक त्वकृष्णाना नावस्थर्येते च सत्त्वशुद्ध्यर्थे ज्ञानादिनुधेय यथोचितमावश्यकं कर्म्म कुर्म्मव्वृतः ॥ तत्फलत्यागेन समानस्वरूपेणात
यावत्प्रवृत्तिः ॥ कुर्म्मन्नेवेह कर्म्माणि जिजीविषेच्छतं समा इति ॥ ततः परं तु सर्व्वकर्म्मनिवृत्तिः स्वत एव भवति ॥ ननु उक्तं नैष्कर्म्म्यसिद्धौ प्रत्य
क्प्रवणतां बुधेः कर्म्माण्युत्पाद्य शुद्धितः कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इवेति तदुक्तं च भगवता यस्त्वात्मरतिरेव स्यादा
त्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यत इति ॥ वसिष्ठेन चोक्तं ॥ न कर्म्माणि त्यजेद्योगी कर्म्मभिस्त्यज्यते ह्यसौ ॥ कर्म्म
णो मूलभूतस्य संकल्पस्यैव नाशत इति ज्ञाननिष्ठाविक्षेपकत्वमालक्ष्य त्यजेद्धा ॥ ननु उक्तं भगवता तावत्कर्म्माणि कुर्वीतेतया
वता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥ ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ॥ सलिंगानाश्रमांस्त्यक्त्वा चरेद् विधि
गोचर इत्यादि ॥ अलमतिप्रसंगेन प्रकृतमनुसरामः

अविदुषः फलत्यागमात्रमेव त्याग प्राग्दर्शितः कर्म्मत्यागस्त्वेव देवमतांतरनिरासेन द्रढीकर्तुं मतभेदं दर्शयति ॥ त्याज्यमिति । दोषवद्धिंसा
दिदोषवत्त्वेन बंधकमिति हेतोः सर्व्वमपि कर्म्म त्याज्यमित्येके सांख्याः प्राहुः मनीषिणस्तत्रायमयं भावः ॥ न हिंस्यात्सर्वा भूतानीति हि निषेधः पुरु
षस्यानर्थहेतुर्हिंसेत्याह ॥ अग्नीषोमीयपशुमालभेतेत्याद्याकारकविधिस्तु हिंसायाः क्रतूपकारकत्वमाह अतो भिन्नविषयत्वे
न सामान्यविशेषन्यायाः हेगोचरत्वा ॥ द्रव्यसाध्येषु च सर्व्वेष्वपि कर्म्मसु हिंसादिसंभवात्सर्व्वमपि कर्म्म त्याज्यमेवेति तदुक्तं ॥ दृष्टवदानु

त्याज्यं दोषवदित्येके कर्म्म प्राहुर्म्मनीषिणः ॥
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे ॥ ३ ॥

अविवेकः सह्यविशुद्धिक्षयातिशययुक्त इति अपरे तु मीमांसकाः ॥ यज्ञादिकं कर्म्म न त्याज्यमिति प्राहुः अयं भावः ॥ क्रत्वर्थापि सती हि ॥ राम ॥
सा पुरुषे नैव वर्तते अन्यथा ॥ सन्न्यायाद्येन पिकृतापुरुषस्य पुरुषस्य पापहेतुरेव तथा हि ॥ विधिर्विधेयस्य तस्य तदुद्देनानुष्ठानं विदधते ॥ नारथ्य ॥ २४६ ॥
त्तु स्वप्नात्वा छेषवत्त्वस्य ॥ नन्वेवं निषेधो निषेधस्य नार्थ्यं म पेक्षते जपुमान्नापेक्षितत्वात् ॥ अन्यथा तानप्रमादादिकृते दोषाभावप्र
संगान्न तदेवं समानविषयत्वेन सामान्याप्यास्त्रस्य विशेषेण बाधान्नास्ति दोषवत्त्वं अतो नित्यं यज्ञादि कर्म्म न त्याज्यमिति अनेन विधिनि

विधेयोः समानविषयत्वाभावात्तयोः सामान्यविशेषभावाभावादित्यर्थः ॥ ३ ॥

एवं मतभेदमुपन्यस्य स्वमतं कथयितुमाह निश्चयमिति ॥ तत्रैवं विप्रतिपत्ते त्यागे निश्चयं मे वाचनाच्छृणु त्यागस्य लो
कप्रसिद्धत्वात् । किमत्र श्रोतव्यमिति मावमंस्था हे पुरुषव्याघ्र त्यागोऽयं दुर्बोधः हि यस्मादयं कर्मत्यागस्तत्त्वविद्भि
स्तामसादिभेदेन त्रिविधः सम्यग्विविच्य प्रकीर्तितः ॥४॥ त्रैविध्यं च नियतस्य तु संन्यासः कर्मणाइत्यादिना वक्ष्यति । प्र
थमं तावन्निश्चयमाह यज्ञदानेति द्वाभ्यां मनीषिणां विवेकिनां पावनानि चित्तशुद्धिकराणि येन प्रकारेण कृतानि
तानि पावनानि भवंति तं प्रकारं दर्शयन्नाह ॥ एतानीति ॥ यानि यज्ञादिकर्माणि मया पावनानीत्युक्तान्येतान्यपि कर्तव्या

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥४॥ यज्ञदानतपःकर्म न त्या
ज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणां ॥५॥ एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते ॥ मोहात्तस्य परित्यागस्तामसः प
रिकीर्तितः ॥७॥ नि कथं संगं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलं मीश्वराराधनतया कर्तव्यानि ॥ फलानि च त्यक्त्वा क
र्तव्यानीति निश्चितं मे मतं अत एवोत्तमं ॥६॥ प्रतिज्ञातं त्यागस्य त्रैविध्यमिदानीं दर्शयति नियतस्येति त्रिभिः का
म्यस्य कर्मणो बंधकत्वात्संन्यासो युक्तः नियतस्य तु नित्यस्य पुनः कर्मणः संन्यासस्त्यागो नोपपद्यते सत्वशुद्धि
द्वारा मोक्षहेतुत्वात् । अतस्तस्य परित्याग उपादेयत्वेऽपि त्याज्यमित्येवं लक्षणान्मोहादेव भवेत् ॥ स च मोहस्य ताम
सत्वात्तामसः परिकीर्तितः ॥७॥७॥७॥

॥भ॰ टी॰
॥२५७॥

राजसं त्यागमाह दुःखमिति आत्मबोधं विना केवलं दुःखमित्येवं ज्ञात्वा शरीरायासभयान्नित्यं कर्म त्यजेदिति यत् । ता
दृशस्त्यागो राजसः दुःखस्य राजसत्वात् अतस्तं राजसः पुरुषस्त्यागस्य फलं ज्ञाननिष्ठालक्षणं नैव लभेतेत्यर्थः ॥८॥ सा
त्विकं त्यागमाह कार्यमिति ॥ कार्यमित्येवं बुद्ध्या नियतं अवश्यकर्तव्यतया विहितं कर्म संगं फलं च त्यक्त्वा क्रियत इति यत्
तादृशस्त्यागः सात्विको मतः ॥९॥ एवंभूतसात्विकत्यागपरिनिष्ठितस्य लक्षणमाह न द्वेष्टीति ॥ सत्वसमाविष्टः सत्वे

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ॥ स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥ कार्यमित्येव यत्क
र्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ॥९॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ॥ सत्वत्या
गी सत्वसमाविष्टो मेधावी छिन्नसंशयः ॥१०॥

न सम्याप्तः सात्विकत्यागी ॥ अकुशलं दुःखावहं शिशिरे प्रातःस्नानादिकं
कर्म न द्वेष्टि कुशले च सुखके कर्मणि माघादिमध्याह्नस्नानादौ नानुषज्जते प्रीतिं न करोति न तत्र हेतुः मेधावी स्थि
रबुद्धिः यत्र परिभवादिमहदपि दुःखं सह्येन स्वर्गादिसुखं च संप्रेते । तत्र किमर्थं तत्तात्कालिकसुखं दुःखं चैव ॥रा॰ मा॰॥
मनुसंधानवानित्यर्थः ॥ अतएव छिन्नः संशयो मिथ्याज्ञानं दैहिकसुखदुःखयोरुपादित्सापरिजिहीर्षालक्ष ॥२५७॥
णा यस्य सः ॥१०॥ १०॥ १०॥ १०॥ श्री॥

नन्वेवंभूतात्कर्म्मफलत्यागीनो वरं सर्वकर्म्मत्यागः। तथासतिकर्म्मविधिक्षेपाभावेन ज्ञाननिष्ठा सुखं संपद्येतेत्यत्राह नेति
हभृता देहात्माभिमानवता निःशेषेण कर्म्माणि त्यक्तुं नहि शक्यं। तदुक्तं न हि कश्चित्क्षणमपि जातु तिष्ठत्यक
र्म्मकृदित्यादिना तस्मात् यस्तु कर्म्माणि कुर्वन्नपि कर्म्मफलत्यागी स एव मुख्यस्त्यागीत्यभिधीयते। ११। एवंभूतस्य कर्म्मफल
त्यागस्य फलमाह अनिष्टमिति। अनिष्टं नारकित्वं इष्टं देवत्वं मिश्रं मनुष्यत्वं एवं त्रिविधं पापपुण्यस्य चोभयमिश्रस्य

॥नहिदेहभृताशक्यं त्यक्तुं कर्म्माण्यशेषतः॥ यस्तुकर्म्मफलत्यागी सत्यागीत्यभिधीयते ॥११॥

स ॥अनिष्टमिष्टं मिश्रं च त्रिविधं कर्म्मणः फलं॥ भवत्यत्यागिनां प्रेत्य नतु संन्यासिनां क्वचित् ॥१२॥

सचकर्म्मणोयत्त्वं प्रसिद्धं तत्सर्वमत्यागिनां सकामानामेव प्रेत्य परत्र भवति नितेषां त्रिविधाकर्म्मसंभवात्। ननु सं
न्यासिनां क्वचिदपि भवति। संन्यासिशब्देनात्र फलत्यागसाम्यात्साधुकृताः। कर्म्मफलत्यागिनो गृह्यंते। अनाश्रितः क
र्म्मफलं कर्म्म करोति यः स संन्यासी च योगी चेत्येवमादौ च फलत्यागिषु संन्यासिशब्दप्रयोगदर्शनात्। तेषां सात्वि
कानां पापसंभवात्। ईश्वरार्पणेन च पुण्यफलस्यत्यक्तत्वात् त्रिविधमपि कर्म्मफलं न भवतीत्यर्थः ॥१२॥१२॥

॥गी॰टी॰॥
॥२५८॥

मनुचकर्म्मिकुर्वतःकर्म्मफलंकथंनभवेदित्याशंक्यसंगत्यागिनोनिरहंकारस्यसतःकर्म्मफलेनलेपोनास्तीत्युपपादयि
तुमाह। पंचेमानीतिपंचभिःसर्व्वकर्म्मणांसिद्धयेनिष्पत्तयेइमानिवक्ष्यमाणानिपंचकारणानिमेवचनान्निबोधजानीहि
आत्मनःकर्तृत्वाभिमाननिवृत्त्यर्थमवश्यमेतानिज्ञातव्यानीत्येवंतेषांस्तुत्यर्थमाह सम्यक्ख्यायतेज्ञायतेपरमात्मानेने
तिसांख्यंकृतंकर्म्मतस्यांतःसमाप्तिरस्मिन्निति कृतांतःतस्मिन्वेदांतःसिद्धांतइत्यर्थःयद्वासंख्यायंतेगण्यंतेतत्वान्यस्मिन्नि
तिसांख्यंकृतःअंतोनिर्णयोयस्मिन्नितिकृतांतेसांख्यशास्त्रमेवतस्मिन्प्रोक्तानि॥ अतःसम्यक्निबोधेत्यर्थः॥१३॥ ता
न्येवाह अधिष्ठानमिति॥ अधिष्ठानंशरीरंकर्त्ताचिज्जडग्रंथिरहंकारःपृथग्विधंअनेकप्रकारंकरणंचक्षुःश्रोत्रादिविवि

पंचेमानिमहाबाहोकारणानिनिबोधमे॥ सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्व्वकर्म्मणां॥१३॥ अधिष्ठानंतथाकर्त्ता
करणंचपृथग्विधं॥ विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं॥ शरीरवाङ्मनोभिर्यत्कर्म्मप्रारभतेनरः॥ न्याय्यंवाविपरीतंवा
पंचैतेतस्यहेतवः॥ तत्रैवंसतिकर्त्तारमात्मानंकेवलंतुयः॥ पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः॥१६॥

धाश्चकार्या
तःस्वरूपतश्चपृथग्भूताःचेष्टाःप्राणापानादीनांव्यापाराःअत्रचएतेषुदैवंचैवपंचमंकारणंचक्षुराद्यनुग्राहकमादित्या
दिसर्व्वप्रेरकोंतर्यामीवा॥१४॥ एतेषामेवसर्व्वकर्म्महेतुत्वमाह शरीरेति यथोक्तैःपंचभिःआरभ्यमाणंकर्म्मत्रिष्वेवांतर्भवतीत्यंशरी
रवाङ्मनोभिरित्युक्तंशारीरंवाचिकंमानसंचत्रिविधंकर्म्मेतिप्रसिद्धेःशरीरादिभिर्यद्यत्कर्म्मधर्म्यंवाअधर्म्यंवाकरो
तिनरःतस्यसर्व्वस्यकर्म्मणः एतेपंचहेतवः॥१५॥ ततःकिमतआह तत्रेति॥ तत्रसर्व्वस्मिन्कर्म्मणिएतेपंचहेतवइतिएवंस
तिकेवलंनिरुपाधिकमसंगमात्मानंतुयःकर्त्तारंपश्यति। शास्त्राचार्योपदेशाभ्यामसंस्कृतबुद्धित्वान्नदुर्मतिरसौ

॥रामा॥
॥२५८॥

कस्तर्हि सुमतिः यस्य कर्म्मलेपो नास्तीत्युक्तमित्यपेक्षायामाह यस्येति। अहमिति कृतोहं कर्त्तेत्येवंभूतो भावोभिप्रायो यस्य ना
स्ति यद्वा अहंकृतो हंकारस्य यः स्वभावः कर्तृत्वाभिनिवेशो यस्य नास्ति शरीरादीनामेव कर्म्मकर्तृत्वालोचनादित्यर्थः अत ए
व यस्य बुद्धिर्न लिप्यते इष्टानिष्टबुद्ध्या कर्म्मसु न सज्जते। अत एवंभूतो देहादिव्यतिरिक्तात्मदर्शी सन्निमांल्लोकान्सर्वानपि प्राणि
नो लोकदृष्ट्या हत्वापि विविक्तया स्वदृष्ट्या न हन्ति न च तत्फलैर्निबध्यते बंधनं न प्राप्नोति किं पुनः सत्वशुद्धिद्वारा अपरोक्षज्ञानो
त्पत्तिहेतुभिः कर्मभिस्तत्संबंधं मुंचतीत्यर्थः। तदुक्तं ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेनेति। १७ हत्वापि
न हंति न निबध्यत इत्येतदेवोपपादयितुं कर्म्मचोदनाप्राः कर्म्माश्रयस्य च कर्म्मफलादेरेणां च त्रिगुणात्मकत्वात् गुणात्मसा

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान्न हंति न निबध्यते॥१७॥ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा क
र्म्मचोदना करणं कर्म्म कर्त्तेति त्रिविधः कर्म्मसंग्रहः॥१८॥ मनः तत्संबंधो नास्तीत्यभिप्रायेण कर्म्मचोदनां कर्म्माश्रयं चा

ह ज्ञानमिति। तत्र कर्म्मप्रवृत्तिहेतुरित्यर्थः। यद्वा वेदेनेति विधिनुच्यते न तदुक्तं भेदैः चोदना चोपदेशश्च विधिश्चैकार्थवाचि
न इति तत्रश्चायमर्थः। उक्तलक्षणं त्रिगुणात्मकं ज्ञानादित्रयमवलंब्य कर्म्मविधिः प्रवर्त्तते न इति देतोक्तं त्रैगुण्यवि
षया वेदा इति। तथा च करणं साधकतमं। कर्म च कर्तुरीप्सिततमं। कर्त्ता क्रियाणां वर्तकः। कर्म्म संगृह्यतेस्मिन्निति क
र्म्मसंग्रहः करणादि त्रिविधं कारकं क्रियाश्रय इत्यर्थः। संप्रदानादिकारकद्वयं तु परंपरया क्रियानिर्वर्तकमेवं केवलं न
तु साक्षात् क्रियायाश्राश्रयः। अतः करणादित्रितयमेव क्रियाश्रय इत्यर्थः॥१८॥ १९॥ ॥ ॥

ततः किमत आह ज्ञानमिति गुणाः सम्यक् कार्यभेदेन संख्यायंते प्रतिपाद्यंते अस्मिन्निति गुणसंख्यानं शास्त्रं तस्मिन् ज्ञानं कर्म
च क्रियाकर्ता च प्रत्येकं सत्वादिगुणभेदेन त्रिधैवोच्यते तान्यपि ज्ञानादीनि यथावच्छृणु त्रिधैवेत्येवकारेण गुणत्रयो
पाधिव्यतिरेकेणात्मनः स्वतः कर्त्रादित्वनिषेधार्थः चतुर्दशेऽध्याये तत्र सत्वं निर्मलत्वादित्यादिना गुणानां बंधकत्वप्रकारो
निरूपितः सप्तदशेऽध्याये यजंते सात्विका देवानित्यादिना गुणकृतं त्रिविधस्वभावनिरूपणेन रजस्तमःस्वभावं प
रित्यज्य सात्विकाहारादिसेवया सात्विकः स्वभावः संपादनीय इत्युक्तं इह तु क्रियाकारकफलादीनामात्मासंबंधो ना

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः॥ प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि॥१९॥ सर्वभूतेषु येनैकं भा
वमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं॥२०॥ पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्वि
धान्॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं॥२१॥

स्तीति दर्शयितुं सर्वेषां त्रिगुणात्मकत्वमुच्यत इति विशे
षो ज्ञातव्यः॥१९॥ तत्र ज्ञानस्य सात्विकादित्रैविध्यमाह सर्वभूतेष्विति त्रिभिः सर्वेषु भूतेषु ब्रह्मादिस्थावरांतेषु
विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तं अनुस्यूतं एकमव्ययं निर्विकारं भावं परमात्मतत्वं येन ज्ञानेनेक्ष
ते आलोचयते तज्ज्ञानं सात्विकं विद्धि॥२०॥ राजसं ज्ञानमाह पृथक्त्वेनेति॥ पृथक्त्वेन तु यज्ज्ञानं भिन्नत्वेनैव विर
रां सर्वेषु भूतेषु देहेषु नानाभूतान् वस्तुतः एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखदुःखित्वादिरूपेण विलक्षणा

तामसं ज्ञानमाह ॥ यत्त्विति। एकस्मिन्कार्ये देहे प्रतिमादौ वा। तत्त्वावनपरिग्रहेणैव सक्तं एतावानेवात्मा ईश्वरो वेत्यभिनिवेशयुक्तं ॥ अहेतुकं निरुपपत्तिकं। अतत्त्वार्थवत्
परमात्मावलंबनशून्यं ॥ अत एवाल्पं तुच्छं अल्पविषयत्वादल्पफलत्वाच्च ॥ यदेवंभूतं ज्ञानं तत्तामसमुदाहृतं ॥ २२ ॥ इदानीं त्रिविधं कर्माह ॥ नियतमिति त्रि
भिः। नियतं नित्यतया विहितं संगरहितं अभिनिवेशशून्यं ॥ अरागद्वेषतः पुत्रादिप्रीत्या वा शत्रुद्वेषेण वा यत्कृतं न भवति फलं प्राप्तुमिच्छतीति फल
प्रेप्सुः। तद्विलक्षणेन निष्कामेन कर्त्रा यत्कृतं कर्म तत्सात्त्विकमुच्यते ॥ २३ ॥ राजसं कर्माह ॥ यत्त्विति ॥ यत्तु कर्म कामेप्सुना फलं प्राप्तुमिच्छता साहंकारेण

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकं ॥ अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं ॥ २२ ॥ नियतं संगरहितमरागद्वेषतः कृतं ॥ अफलप्रेप्सुना कर्म यत्त
त्सात्त्विकमुच्यते ॥ २३ ॥ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतं ॥ अनुबंधं क्षयं हिंसामनवेक्ष्य च पौरु
षं। मोहादारभ्यते कर्म तत्तामसमुदाहृतं ॥ मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २५ ॥ २६ ॥

वा मत्समः कोऽन्यः श्रोत्रियो लोके इत्येवं निरूढाहंकारयुक्तेन तथा क्रियते यच्च पुनर्बहुलायासं अतिक्लेशयुक्तं तत्कर्म राजसमुदाहृतं ॥ २४ ॥ तामसं कर्माह ॥ अनुबंध
मिति ॥ अनुबध्यत इत्यनुबंधः पश्चाद्भावि शुभाशुभं। क्षयं वित्तव्ययं हिंसां परपीडां च पौरुषं स्वसामर्थ्यं च अनवेक्ष्य अपर्यालोच्य केवलं मोहादेव यत्क
र्म आरभ्यते तत्तामसमुदाहृतं। कर्तारं त्रिविधमाह ॥ मुक्तसंग इति त्रिभिः। मुक्तसंगः त्यक्ताभिनिवेशः। अनहंवादी गर्वोक्तिरहितः ॥ धृतिर्धैर्यं उत्साह उद्यमः ताभ्यां
समन्वितः संपन्नः। आरब्धस्य कर्मणः सिद्धौ वा असिद्धौ वा निर्विकारो हर्षविषादशून्यः एवंभूतः कर्ता सात्त्विक उच्यते ॥ २६ ॥

॥गी०टी०॥ राजसं कर्त्तारमाह॥ रागीति रागी पुत्रादिषु प्रीतिमान् कर्म्मफलप्रेप्सुः कर्म्मफलकामी लुब्धः परस्वाभिलाषी हिंसात्मको मारकस्वभावः। अशुचिः विहितशौचशू-
॥२५१॥ न्यः लाभालाभयोर्हर्षशोकाभ्यामन्वितः कर्त्ता राजसः परिकीर्त्तितः तामसं कर्त्तारमाह॥ अयुक्त इति अयुक्तः अनवहितः प्राकृतः। विवेकशून्यः स्तब्धः अ-
नम्रः शठः शक्तिगूहनकारी। नैष्कृतिकः पराऽवमानी॥ अलसः अनुद्यमशीलः विषादी शोकशीलः॥ यदद्य श्वो वा कार्यं तन्मासेनापि न संपादय-
स दीर्घसूत्री॥ एवंभूतः कर्त्ता तामसः कर्त्तृत्रैविध्येनैव ज्ञानादेरपि त्रैविध्यमुक्तं। धर्म्मैस्त्रैविध्ये न चर्त्ते यस्यापि त्रैविध्यमुक्तं वेदितव्यं॥ बुद्धेस्त्रैविध्येन धारणस्य

रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥२७॥ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी
दीर्घसूत्री च कर्त्ता तामस उच्यते ॥२८॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु॥ प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥ प्रवृत्तिं च निवृत्तिं च कार्याका-
र्य्ये भयाभये बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥३०॥ यया धर्म्ममधर्म्मं च कार्यं चाकार्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी
॥३१॥

उक्तं भविष्यति ॥२८॥ इदानीं तु बुद्धेर्धृतेश्चापि त्रैविध्यं प्रतिजानीते। बुद्धेरिति स्पष्टार्थः ॥२९॥ तत्र बुद्धेस्त्रैविध्यमाह प्रवृत्तिं चेति त्रिभिः प्रवृत्तिं धर्म्मे निवृत्तिं अधर्म्मे ॥राम॥
यस्मिन्देशे काले च यत्कार्यमकार्यं च भयाभये कार्यानिमित्ते वा यथातत्त्वोदयं बंधकं वा मोक्षदं इति या बुद्धिः। अन्तःकरणं वेत्ति सा सात्त्विकी यया पुमान् ॥२५०॥
वेत्तीति वक्तव्ये करणे कर्तृत्वोपचारः काष्ठानि पचन्तीतिवत् ॥३०॥ राजसीं बुद्धिमाह ययेति। अयथावत् संदेहास्पदत्वेनेत्यर्थः। स्पष्टमन्यत् ॥३१॥

तामसीं बुद्धिमाह अधर्ममिति अधर्ममिति पर्येतया हिंसां बुद्धिस्तामसीत्यर्थः बुद्धिरन्तःकरणं पूर्वोक्तं ज्ञानं तु तद्वृ-
त्तिः धृतिरपि तद्वृत्तिरेवायद्वा अन्तःकरणस्य धर्मिणो बुद्धिरध्यवसायलक्षणा वृत्तिर्नैश्चल्यादेर्धारादीनां तद्वृत्ती-
नां बहुत्वेपि धर्म्मधर्म्मिणोरभयसाधनत्वेन प्राधान्यात्तेनात्रैविध्यमुक्तं उपलक्षणं चैतन्न स्यात्तं॥ इदानीं
धृतेस्त्रैविध्यमाह॥ धृत्येति त्रिभिः योगेन चित्तैकाग्र्येण हेतुना अव्यभिचारिण्या विषयान्तरमनारोचयन्त्या
यया धृत्या मनसः प्राणेंद्रियाणां च क्रिया धारयते नियच्छति सा धृतिः सात्विकी राजसीं धृतिमाह ययात्वि

अधर्मं धर्ममिति या मन्यते तमसावृता॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ ३२॥ धृत्या यया
धारयते मनःप्राणेंद्रियःक्रिया॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी॥ ३३॥ यया तु धर्मकामा-
र्थान्धृत्या धारयतेऽर्जुन प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी॥ ३४॥ यया स्वप्नं भयं शोकं विषादं म-
दमेव च॥ न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी॥ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ॥ अभ्यासा-
द्रमते यत्र दुःखांतं च निगच्छति॥ ३६॥ त्वि यया धृत्या धर्मार्थकामान्प्राधान्येन धारयते न विमुंचति तत्प्रसंगेन फ-
लाकांक्षी च भवति सा राजसी धृतिः॥ ३४॥ तामसीं धृतिमाह ययेति दुष्टा अविवेकबहुला मेधा यस्य स दुर्मेधाः पुरु-
षः यया धृत्या स्वप्नादीन्न विमुंचति पुनःपुनरावर्तयति स्वप्नोऽत्र निद्रा सा धृतिस्तामसी॥ ३५॥ सुखस्य त्रैविध्यं प्रतिज्ञा-
नीते सुखमित्यर्धेन स्पष्टार्थः तत्र सात्विकं सुखमाह॥ अभ्यासादिति सार्धेन यत्र यस्मिन्सुखे अभ्यासादतिपरिचय-

रमते न तु विषयसुखवत्सहसा रतिं प्राप्नोति॥

॥गी॰ टी॰
॥१५५॥

यस्मिन्नभ्यासाच्च दुःखस्यांतं अवसानं निगच्छति कीदृशं तत् यत्तदिति। यत्तत् किमपि अग्रे प्रथमं विषमि
व मनःसंयमाधीनत्वात् दुःखावहमिव भवति परिणामे त्वमृतसदृशं। आत्मविषया बुद्धिः आत्मबुद्धिः तस्याः प्र
सादो रजस्तमोमलत्यागेन स्वच्छतयाऽवस्थानं ततो जातं यत्सुखं तत्सात्त्विकं प्रोक्तं योगिभिः॥३७॥ राजसं सुखमा
ह विषयेंद्रियेति। विषयाणामिंद्रियाणां च संयोगात् यत्प्रसिद्धं स्त्रीसंगादिसुखं अग्रेऽमृतमुपभोगसमये तादृशं भव

यत्तदग्रे विषमिव परिणामेऽमृतोपमं॥ तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजं॥३७॥ विषयेंद्रियसंयोगा
द्यत्तदग्रेऽमृतोपमं। परिणामे विषमिव तत्सुखं राजसं स्मृतं॥३८॥ यदग्रे चानुबंधे च सुखं मोहनमात्मनः॥
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं॥३९॥ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मु
क्तं यदेभिः स्यात्त्रिभिर्गुणैः॥४०॥

ति॥ अग्रे प्रथमं परिणामे तु विषमिव विषतुल्यं इहामुत्र च दुःखहेतुत्वात् त
त्सुखं राजसं स्मृतं॥३८॥ तामसं सुखमाह यदग्र इति अग्रे प्रथमक्षणे॥ अनुबंधे च पश्चादपि यत्सुखं आ
त्मनो मोहकरं तदेवाह निद्रा च आलस्यं च प्रमादश्च कर्त्तव्यार्थावधानराहित्यं तेभ्य उत्प
त्ति यत्सुखं तत्तामसमुदाहृतं॥३९॥ अनुक्तमपि संगृह्णन् प्रकरणार्थमुपसंहरति न तदस्तीति एभिः प्रकृतिसं
भवैस्त्रिभिर्गुणैर्मुक्तं हीनं सत्त्वं प्राणिजातं मनुष्येषु वा स्यात् तत् पृथिव्यां मनुष्यादिषु दिवि देवेषु वा क्वापि

॥[illegible]॥ ॥रामः॥
॥१५५॥

ननु च पश्यैवं सर्वमपि क्रियाकारकफलादिकं प्राणिजातं त्रिगुणात्मकमेव । कथं तर्हि अस्य मोक्षः इत्यपेक्षायां स्वस्वाधि
कारविहितैः कर्मभिः । परमेश्वराराधनात्तत्प्रसादाल्लब्धज्ञानेनेत्येवं सर्वगीतार्थसारं संगृह्य प्रदर्शयितुं प्रकरणान्तरमा
रभते ब्राह्मणेत्यादि यावत्समाप्ति हे परंतप शत्रुतापन ब्राह्मणानां क्षत्रियाणां विशां च शूद्राणां च कर्माणि प्रविभ
क्तानि प्रकर्षेण विभागेन विहितानि शूद्राणां समासात्पृथक्करणं द्विजत्वाभावेन वेदानधिकारात् विभागोपलक्ष
णमाह स्वभावः सात्विकादिः । प्रभवति प्रादुर्भवति येभ्यस्तैर्गुणैरुपलक्षणभूतैः यद्वा स्वभावः पूर्वजन्मसंस्काराः त

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥४१॥ शमो दमस्तपः शौ
चं क्षान्तिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥४२॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यप
लायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥४३॥ स्मात्प्रादुर्भूतैरित्यर्थः । तत्र सत्त्वप्रधाना ब्राह्मणाः सत्त्वोप

सर्जनरजःप्रधानाः क्षत्रियाः रजउपसर्जनतमःप्रधाना वैश्याः तमःप्रधानाः शूद्राः ॥४१॥ तत्र ब्राह्मणस्य स्वाभाविका
नि कर्माण्याह शम इति शमः । चित्तोपरमः दमो बाह्येन्द्रियोपरमः तपः पूर्वोक्तं शारीरादि शौचं बाह्याभ्यन्तरं क्षान्तिः
क्षमा आर्जवं अवक्रता ज्ञानं शास्त्रीयं विज्ञानमनुभवः । आस्तिक्यमस्ति परलोक इति निश्चयः । एतत् ब्रह्मकर्म ब्राह्मण
स्य स्वभावाज्जातं कर्म ॥४२॥ क्षत्रियस्य स्वाभाविकानि कर्माण्याह शौर्यमिति शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृतिः धै
र्यं दाक्ष्यं कौशलं । युद्धे चाप्यपलायनं अपराङ्मुखता दानं औदार्यं ईश्वरभावो नियमनशक्तिः एतत् क्षत्रियस्य स्वभा

वैश्यशूद्रयोः कर्माह। कृषीति। कृषिः कर्षणं गाः रक्षतीति गोरक्षस्तस्य भावो गोरक्ष्यं पाशुपाल्यमित्यर्थः वाणिज्यं क्रयविक्रया

दि एतद्वैश्यस्य स्वभावजं कर्म्म त्रैवर्णिकपरिचर्यात्मकं कर्म्म शूद्रस्यापि स्वभावजं।४४। एवंभूतस्य ब्राह्मणादिकर्म्मणो
ज्ञानहेतुत्वमाह स्वस्वाधिकारविहिते कर्म्मणि अभिरतः परिनिष्ठितो नरः संसिद्धिं ज्ञानयोग्यतां लभ्यते कर्म्मणां ज्ञा
नप्राप्तिकारमाह तर्हि नस्वकर्मेति। स्वकर्म्मपरिनिष्ठितो यथा येन प्रकारेण तत्त्वज्ञानं लभते तं प्रकारं शृणु॥४५॥ तमे

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म्म स्वभावजं॥ परिचर्यात्मकं कर्म्म शूद्रस्यापि स्वभावजं।४४।स्वे स्वे कर्म्मण्यभिर
तः संसिद्धिं लभते नरः॥ स्वकर्म्मनिरतः सिद्धिं यथा विंदति तच्छृणु यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं। स्वकर्म्म-
णा तमभ्यर्च्य सिद्धिं विंदति मानवः॥४६॥ श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥ स्वभावनियतं क
र्म्म कुर्वन्नाप्नोति किल्बिषं॥४७॥

वाह यत इति यतोन्तर्यामिणः परमेश्वरात् भूतानां प्राणिनां प्रवृत्तिश्चेष्टा
भवति॥ येन च कारणात्मना सर्वमिदं विश्वं ततं व्याप्तं तमीश्वरं स्वकर्मणा अभ्यर्च्य पूजयित्वा सिद्धिं लभते मनु ॥रामा॥
ष्यः॥ स्वकर्मणेति विशेषणस्य फलमाह श्रेयानिति। विगुणोपि स्वधर्म्मः सम्यगनुष्ठितादपि परधर्मात् श्रेयान् श्रे ॥१५२॥
ष्ठः नचैवं बंधुवधादियुक्ताद्युद्धादेः स्वधर्मात् भिक्षाटनादिः परधर्मः श्रेष्ठ इति मंतव्यं॥ यतः स्वभावेन सर्वोत्के नियतं
नियमेनोक्तं कर्म कुर्वन् किल्बिषं नाप्नोति॥४७॥

यदि पुनः सांख्यदृष्ट्या स्वधर्मे हिंसानुष्ठानां दोषवत्तया परधर्म्मं श्रेष्ठं मन्यसे तर्हि सदोषत्वं परधर्मेपि तुल्यमित्याशयेनाह
सहजमिति सहजं स्वभावविहितं कर्म्म सदोषमपि न त्यजेत। हि यस्मात् सर्वेप्यारंभाः दृष्टार्थानि सर्वाण्यपि कर्म्माणि दोषेणा
वृतेन चिरादावृत्तो व्याप्ता एव। यथा महता धूमेनाग्निरावृतस्तद्वत्। अतो यथाग्नेर्धूमरूपं दोषमपाकृत्य सप्रताप एवत
मःशीतादिनिवृत्तये सेव्यते। तथा कर्म्मणोपि दोषांशं विहाय गुणांश एव मूलशुद्धये सेव्यत इत्यर्थः।।४८।। ननु कर्म्माणि
क्रियमाणे दोषापरिहारेण न गुणांश एवं संपद्यत इत्यपेक्षायामाह।। असक्तेति असक्ता संगशून्या बुद्धिर्यस्य जिता

।।सहजं कर्म कौंतेय सदोषमपि न त्यजेत्।।सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः।।४८।।
।।असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।।नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति।।४९।।

त्मा निरहंकारो विगतस्पृहः विगता स्पृहा फलविषया इच्छा यस्मात् स एवंभूतेन सत्यागः सात्विको मत इत्येवमु
क्तेन कर्मासक्तितत्फलत्यागलक्षणेन संन्यासेन नैष्कर्म्यसिद्धिं सद्यः कर्म्मसिद्धिं सर्वकर्म्मनिवृत्तिलक्षणां
सिद्धिं सत्वशुद्धिमधिगच्छति। यद्यपि संगफलयोस्त्यागेन कर्म्मानुष्ठानमपि नैष्कर्म्यमेव कर्तृत्वाभिनिवेशाभावात्। न
वुक्तं नैव किंचित्करोमीति युक्तो मन्येत तत्त्वविदित्यादिश्लोकचतुष्टयेन तथाप्यनेनोक्तलक्षणेन संन्यासेन परमां
नैष्कर्म्यसिद्धिं सर्वकर्म्माणि मनसा संन्यस्यास्ते सुखं वशी इत्येवं लक्षणां पारमहंस्यापरपर्यायामाप्नोति।।४९।।

एवंभूतस्य परमहंसस्य ज्ञाननिष्ठया ब्रह्मभावप्रकारमाह सिद्धिं प्राप्त इति षड्भिः। नैष्कर्म्यसिद्धिं प्राप्तः सन् यथा येन प्रकारेण
ब्रह्म प्राप्नोति तथा तं प्रकारं संक्षेपेणैव मे वचनान्निबोध ॥५०॥ तमेवाह बुद्ध्येति उक्तेन प्रकारेण विशुद्धया पूर्वोक्तया सा
त्विक्या बुद्ध्या युक्तः। धृत्या सात्विक्या आत्मानं नियम्य बुद्धिं नयमं पनिश्चलां कृत्वा शब्दादीन्विषयांस्त्यक्त्वा नहि द्विषयेो रागद्वे
षौ च व्युदस्य बुद्ध्या विशुद्धया युक्त इत्यादीनां ब्रह्मभूयाय कल्पत इति तृतीयेनान्वयः ॥५१॥ किंच विविक्तेति विविक्तसे
वी शुद्धदेशावस्थायी लघ्वाशी मितभोजी। एतैरुपायैर्यतवाक्कायमानसः संयतवाग्देहचित्तो भूत्वा नित्यं सर्व
दा ध्यानेन योगो ब्रह्मसंस्पर्शः तत्परः सन् ध्यानाद्यविच्छेदार्थं पुनः पुनः दृढं वैराग्यं सम्यगुपाश्रितो भूत्वा ॥५२॥ किंच

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे। समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मा
नं नियम्य च। शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यानयोगप
रो नित्यं वैराग्यं समुपाश्रितः ॥५२॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं। विमुच्य निर्ममः शांतो ब्रह्मभूयाय क
ल्पते ॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥५४॥ अहंकारमिति

ततश्च विरक्तोऽहमित्याद्यहंकारं बलं दुराग्रहं दर्पं योगबलादुन्मार्गप्रवृत्तिलक्षणं गर्ववशात्स्वाप्यसमारो व्यपि
विषयेषु कामं क्रोधं परिग्रहं च विमुच्य विशेषेणासक्त्वा बलादापन्नेष्वपि निर्ममः सन् शांतो निवृत्तो ब्रह्मभूयाय ब्र
ह्माहमिति नैश्चल्येनावस्थानाय कल्पते योग्यो भवति ॥५३॥ ब्रह्माहमित्येवं नैश्चल्येनावस्थानस्य फलमाह ब्रह्म
भूत इति ब्रह्मभूतः ब्रह्मण्येवावस्थितः प्रसन्नचित्तो नष्टं न शोचति न चाप्राप्तं कांक्षति देहाद्यभिमानाभावात् ॥ अतए
व सर्वेष्वपि भूतेषु समः सन् रागद्वेषादिकृतविक्षेपाभावात् सर्वभूतेषु मद्भाव -------------- गमिद्भक्तिं ल

गी॰टी॰
५५४

ततश्चाभक्त्या मामिति तथा च परया भक्त्या ततो मामभिजानाति। कथंभूतं यावान् सर्वव्यापी यश्चास्मि सच्चिदानंद
घनः तथाभूतं ततश्च मामेवं तत्त्वतो ज्ञात्वा तदनंतरं तस्य ज्ञानस्याप्युपरमे मां विशते परमानंदरूपो भवतीत्य
र्थः स्वकर्मभिः। परमेश्वराराधनादुक्तं मोक्षप्रकारमुपसंहरति सर्वकर्माण्यपीति सर्वकर्माणि नित्यानि नैमित्ति
कानि काम्यानि च कर्माणि पूर्वोक्तक्रमेण मद्व्यपाश्रयः सन्कुर्वाणः अहमेव व्यपाश्रयणीयः न तु स्वर्गादिफलं य
स्य सः मत्प्रसादाच्छाश्वतं नादि अव्ययमिति नित्यं सर्वोत्कृष्टं विष्णुपदं परं प्राप्नोति यस्मादेवं तस्माच्चेतसेति॥
सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः॥ अहमेव परः प्राप्तः पुरुषार्थो यस्य सः॥ [illegible]साधिन कुरु

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं॥५५॥ सर्वकर्मा
ण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं॥ चेतसा सर्वकर्माणि मयि सं
न्यस्य मत्परः॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि॥ अथ
चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि॥५८॥ यदहंकारमाश्रित्य न योत्स्य इति मन्यसे॥ मिथ्यैष व्यवसायस्ते प्र
कृतिस्त्वां नियोक्ष्यति॥५९॥ यात्मिकया बुद्ध्या योगमुपाश्रित्य सततं च मानुषत्वेऽपि ब्राह्मणा परां ब्रह्मविदिति न्यायं

न मच्चित्तं यस्य तथाभूतो भव॥५७॥ ततो यद्भविष्यति तच्छृणु मच्चित्त इति मच्चित्तः सन् मत्प्रसादात् सर्वाण्य
पि दुर्गाणि दुस्तराणि संसारिकाणि दुःखानि तरिष्यसि विपक्षे दोषमाह अथ चेद्यदि पुनः त्वमहंकारात् ज्ञातृत्वाभिमा
नात् मदुक्तं न श्रोष्यसि तर्हि विनंक्ष्यसि पुरुषार्थाद्भ्रश्यसि॥५८॥ कामं विनेष्यामि न तु युद्धं करिष्यामीति
चेत्तत्राह यदीति। मदुक्तमनादृत्य केवलमहंकारमेवावलंब्य युद्धं न करिष्यामीति त्वं यन्मन्यसे अध्यवसायस्ते एव ने

[illegible]

नाहंप्रकृतिस्त्वांरजोगुणरूपेणपरिणतासतीनियोक्ष्यतियुद्धेप्रवर्तयिष्यत्येव॥५९॥ किंचस्वभावजेनेतिस्वभावःक्षत्रि
यत्वहेतुःपूर्वकर्मसंस्कारःतस्माज्जातेनस्वकीयेनकर्मणाशौर्यादिनापूर्वोक्तेननिबद्धोयंत्रितस्त्वंमोहाद्यत्कर्मयुद्ध
लक्षणंकर्तुंनेच्छसि॥ अवशोपितत्कर्मकरिष्यस्येव॥६०॥ तदेवंश्लोकद्वयेनसांख्योदितमेनप्रकृतिपारतंत्र्यंस्वभा
वपारतंत्र्यंकर्मपारतंत्र्यंचोक्तंइदानींस्वमतमाहईश्वरइतिद्वाभ्यां॥ सर्वभूतानांहृदयमध्येईश्वरोंतर्यामीतिष्ठति
किंकुर्वन्सर्वाणिभूतानिमाययानिजशक्त्याभ्रामयन्तत्तत्कर्मसुप्रवर्तयन्यथादारुयंत्रमारूढानिकृत्रिमाणि
भूतानिसूत्रधारीलोकेभ्रामयतितद्वदित्यर्थः॥ यद्वायंत्राणिशरीराण्यारूढानिभूतानिदेहाभिमानिनोजीवान्भ्रामयति

स्वभावजेनकौंतेयनिबद्धःस्वेनकर्मणा॥ कर्तुंनेच्छसियन्मोहात्करिष्यस्यवशोपितत्॥६०॥ ईश्वरःसर्वभूतानांहृ
द्देशेर्जुनतिष्ठति॥ भ्रामयन्सर्वभूतानियंत्रारूढानिमायया॥६१॥ तमेवशरणंगच्छसर्वभावेनभारत॥ तत्प्रसादा
त्परांशांतिंस्थानंप्राप्स्यसिशाश्वतं॥६२॥ इतितेज्ञानमाख्यातंगुह्याद्गुह्यतरंमया॥ विमृश्यैतदशेषेणयथेच्छसित
थाकुरु॥६३॥ तिष्ठत्यर्थःतथाचश्वेताश्वतराणांमंत्रःएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्माकर्माध्य
क्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चेति॥ अंतर्यामिब्राह्मणेचायमात्मनितिष्ठन्नात्मनोंतरोयमयति
यमात्मानवेदयस्यात्माशरीरंएषतआत्मांतर्याम्यमृतइत्याह॥६१॥ यस्मादेवंसर्वेजीवाःपरमेश्वरतंत्राःतस्मात्तमिति
तस्मादहंकारंपरित्यज्यसर्वभावेनसर्वात्मनातमीश्वरमेवशरणंगच्छततश्चतस्यैवप्रसादात्परमामुपशांतिंस्था
नंचपारमेश्वरंनित्यंप्राप्स्यसि॥६२॥ सर्वगीतार्थमुपसंहरन्नाहइतीति॥ अनेनप्रकारेणतेतुभ्यंसर्वज्ञेनपरमकारु
णिकेनमयाज्ञानमाख्यातमुपदिष्टंकथंभूतंगुह्यात्गोप्यात्रहस्यमंत्रयोगादेस्तत्राभावः॥६३॥

अतिगंभीरं गीताशास्त्रमशेषतः पर्यालोचयितुमशक्नुवतः ॥ कृपयास्वयमेव तत्सारं संगृह्य कथयति सर्वगुह्यतममिति त्रिभिः सर्वेभ्योपि गुह्येभ्यो
गुह्यतमं मे वचः ॥ तत्र तत्रोक्तमपि भूयः पुनरपि वक्ष्यमाणं शृणु पुनः पुनः कथने हेतुमाह ॥ दृढमतिशयेन मम त्वमिष्टः प्रियोसि इति मत्वा ततस्त
द्धेतोस्ते हितं ते हितं वक्ष्यामि यद्वा ॥ त्वं मम इष्टो मया वक्ष्यमाणं च दृढं सर्वप्रमाणोपेतमिति निश्चित्य ततस्ते वक्ष्यामीत्यर्थः दृढमति रिति केचित्पठ
न्ति ॥६४॥ तदेवाह मन्मना इति मन्मना भव मच्चित्तो भव मे भक्तो भव ॥ मद्याजी मद्यजनशीलो भव ॥ मामेव नमस्कुरु ॥ एवं वर्तमानस्त्वं मत्प्र

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥ इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं ॥६४॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामे
वैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे ॥६५॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६॥
इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योभ्यसूयति ॥६७॥

सादाल्लब्धज्ञानेन मामेवैष्यसि प्राप्स्यसि अत्र च सं
शयं माकार्षीः ॥ त्वं हि मे प्रियोसि अतः ॥ सत्यं अतः सत्यं यथा भवत्येवं तुभ्यमहं प्रतिज्ञां करोमि ॥६५॥ ततोपि गुह्यतममाह सर्वधर्मानिति मद्भक्त्यैव सर्वं भवि
ष्यतीति दृढविश्वासेन विधिकैंकर्यं त्यक्त्वा मामेकं शरणं भव ॥ एवं वर्तमानः कर्मत्यागनिमित्तं पापं स्यादिति मा शुचः शोकं माकार्षीः यतः त्वां मदेकशरणं
सर्वपापेभ्यो मोक्षयिष्यामि ॥६६॥ एवं गीतार्थतत्त्वमुपदिश्य तत्संप्रदायप्रवर्तने नियममाह ॥ इदमिति इदं गीतार्थतत्त्वं ते त्वया अतपस्काय स्वधर्मानुष्ठानहीनाय न
वाच्यं ॥ न चाभक्ताय गुरौ ईश्वरे वा भक्तिशून्याय कदाचिदपि न वाच्यं ॥ न चाशुश्रूषवे परिचर्यामकुर्वते श्रोतुमनिच्छवे वा न वाच्यं ॥ मां परमेश्वरं

एतैर्दोषैर्विरहितेभ्यो भक्तेभ्यो गीताशास्त्रोपदेष्टुः फलमाह य इति॥ मद्भक्तेषु मद्भक्तेभ्यो योऽवक्ष्यति स मयि परां भक्तिं करोति ततो निःसंशयः सन् मामेव
प्राप्नोति ६८ किं चेन च चेति॥ तस्मान्मद्भक्तेभ्यो गीताशास्त्रस्य व्याख्यातुः सकाशात् अन्यो मनुष्येषु मध्ये कश्चिदपि मम प्रियकृत्तमः॥ अत्यन्तं परितोष
कर्ता नास्ति न च कालान्तरे भविता भविष्यति समाधिः तस्मादन्यः प्रियतरो भुवि भुविता च न्नास्ति न च कालान्तरे भविता भविष्यतीत्यर्थः॥ ६९॥ पठतः फल
माह अध्येष्यत इति॥ आवयोः कृष्णार्जुनयोः इमं धर्म्यं धर्मादनपेतं संवादं योऽध्येष्यते जपरूपेण पठिष्यति॥ तेन पुंसा सर्वयज्ञेभ्यः श्रेष्ठे

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥ ६८॥
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि॥ ६९॥
अध्येष्यते च य इमं धर्म्यं संवादमावयोः॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ ७०॥

न ज्ञानेनाहमिष्टः स्यां भवेयमिति मे मतिरिति॥ यद्यप्यसौ गीतार्थमबुध्यमान एव केवलं जपति तथापि मम तत्र शृण्वतो मयी
प्रकाशयतीति बुद्धिर्भवति यथा लोके यदृच्छया कश्चित्कस्यचिन्नाम गृह्णाति जिनदासेति मामेवायमाह्वयतीति जिनदासो मामेवायमाह्
वयतीति मत्वा सम्मुखो भवति॥ तथाहमपि तत्संमुखो भवेयं अत एवाज्ञानामपि स्तुतिं श्रुत्वा जपतां कथं चिन्नामोच्चारणमात्रेण प्रसन्नोऽस्मि तथैव तस्यापि प्र
सन्नो भवेयमिति भावः ७०

अनसूयाजपन्तो यो न्यः कश्चिच्छ्रोतुमिच्छत्यपि फलमाह॥ श्रद्धावानिति येन श्रद्धायुक्तः केवलं शृणुयादपि श्रद्धावानपि कश्चि
त्वि मध्यमुख्येजयति अन्नवान्जपतीति वादो दृष्टिं करोतीति तत्राह त्वयैवाह अनसूयश्चासूयारहितो यः शृणुयात्सोऽपि स
र्वैः पापैर्मुक्तः सन् अश्वमेधादिपुण्यकृतां लोकान्प्राप्नुयात्॥७१॥ सम्यक्बोधानुस्मृतो पुनः परमस्वामी त्वाशयेन्नाह क
च्चिदिति प्रश्नार्थः॥ अज्ञानः संमोहः तत्त्वाज्ञानकृतो विपर्ययः स्पष्टमन्यत्॥७२॥ कृतार्थोऽर्जुन उ० प्रकृतिकृतार्था सन्नाह
विषयो मोहो नष्टः॥ अयमहमस्मीति स्वरूपानुसंधानरूपा स्मृतिः त्वत्प्रसादान्मया लब्धा॥ अतः स्थितोऽस्मि गतो धर्मविषयः संदे
हो यस्य सोऽहं तवाज्ञां करोमीति॥७३॥ तदेवं धृतराष्ट्रं प्रति श्रीकृष्णार्जुनसंवादं कथयित्वा प्रस्तुतां कथामनुसंदधानः॥ संजय उ०

श्रद्धावाननसूयश्च शृणुयादपि यो नरः॥ सोऽपि मुक्तः शुभान्लोकान् — पुण्यकर्मणां॥७१॥ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चे
तसा॥ कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय॥७२॥ अर्जुन उ० नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत। स्थितोऽस्मि गतसंदेहः करिष्ये
वचनं तव॥७३॥ संजय उ० इत्यहं वासुदेवस्य पार्थस्य च महात्मनः। संवादमिममश्रौषमद्भुतं रोमहर्षणं॥७४॥ व्यासप्रसादाच्छ्रुतवा
नेतद्गुह्यमहं परं॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं॥७५॥ राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पु
ण्यं हृष्यामि च मुहुर्मुहुः॥७६॥ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः॥ विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः॥७७॥७७॥७७॥

द्भुतमिति रोमहर्षणं रोमांचकरं संवादं अश्रौषं श्रुतवानहं स्पष्टमन्यत्॥७४॥ आत्मनस्तत्त्वबोधसंभावनामाह व्यासप्रसादादिति भगव
तो व्यासानादिव्यं चक्षुः श्रोत्रादिमूलं दत्तं॥ अतो व्यासप्रसादादेतद्रहस्यं श्रुतवानस्मि किं तदित्यपेक्षायामाह॥ परयोगं॥ परत्वम
दिकरोतीति योगस्तत्त्वज्ञानादिति॥७५॥ किंच राजन्निति हृष्यामि रोमांचितो भवामि हर्षं प्राप्नोमीति वा स्पष्टमन्यत्॥७६॥ किंच॥ तच्चे
ति विश्वरूपनिर्दिष्टमिति स्पष्टमन्यत्॥७७॥ अन्ते स्वपुत्राणां राज्यादिसिद्धौ कोपि निराशो भवेदत आह॥ यत्रेति॥ यत्रे॥ छ॥ छ॥

॥भा॰गी॰टी॰ ॥२५६॥

हुनां यत्र योगेश्वरः श्रीकृष्णस्तत्र च पार्थो गांडीवधनुर्धरः तत्रैव श्रीः राज्यलक्ष्मीः तत्रैव च विभूतिः उत्तरोत्तराभिवृद्धिश्च ध्रु
वा नीतिर्न्यायोपेतेत्येवं कृतान्निश्चितेति सर्वत्र संबध्यते इति मे मतिर्निश्चयः अत इदानीमपि तावत्सपुत्रस्त्वं श्रीकृष्णशरणमुपेत्य
पांडवान् प्रसाद्य सर्वस्वं तेभ्यो निवेद्य पुत्रप्राणरक्षणं कुर्विति भावः ७८ भगवद्भक्तियुक्तस्य तत्प्रसादात्मबोधतः सुखं बंधवि
मुक्तिः स्यादिति गीतार्थसंग्रहः तथा हि पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जु
न इत्यादौ भगवद्भक्तेर्मोक्षं प्रति साधकत्वं तमनन्यशरणत्वात् तत्प्रसादादात्मज्ञानं चांतरंगसाधनमात्रं च का मो
क्षहेतुरिति तच्च प्रतीयते ज्ञानस्य भक्त्यवांतरव्यापारत्वं चोक्तं तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं
येन मामुपयांति ते मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यत इत्यादिवचनानंतरं ज्ञानावांतरं इत्युक्तं सर्वेषु मद्भक्तिं लभते प ५८

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८ ॥ इति श्रीभगवद्गीतासूपनिष
त्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे योगशास्त्रनिर्णये संन्यासयोगो नाम अष्टादशोऽध्यायः ॥१८॥ १८॥

रं भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादौ भेदेन निर्दिष्टमात्रं चैव सति तमेव विदित्वातिमृत्युमेति नान्यः पंथा वि
द्यतेऽयनायेत्यादिश्रुतिविरोधः शंकनीयः भक्तेरवांतरव्यापारत्वात् ज्ञानस्य न हि काष्ठैः पचतीत्युक्ते ज्वालानां पाकसाधनत्वमुक्तं भ
वति यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः देहांते देवः परं ब्रह्म तारकं व्याच
ष्टे येनासौ वृत्तममृतत्वेन लभ्य इत्यादिश्रुतिस्मृतिपुराणवचनान्येवं सति समंजसानि भवंति तस्माद्भगवद्भक्तिरेव मोक्षहेतुरि ॥राम॥
ति सिद्धं तेनैव दत्तया मत्या गीताविवृतिः कृता तासु एव परमानंदस्तथा श्रीगीतानुमाधवः परमानंदपादाब्जवृत्तः श्रीधारिणा ॥२५६॥
धुना श्रीधरस्वामियतिना कृता गीतासुबोधिनी १ स्वप्रकाशधवलाद्विलोकभगवद्गीतानंदं तदंतर्गतं तत्त्वप्रेक्षोत्सुकोऽपि किं गुरुक
तादीपक्षदृष्टिं विना संगृह्णाति जलेना विरज्यजलधेराहितुमुत्तरत मर्त्यो नावं विना किं न भजेत्तेति ततः सत्तु टीके धार्यं विना ॥२
ति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे टीकायां सुबोधिन्यां श्रीधरस्वामिविरचिता

॥ संजयउवाच ॥ ततोधनंजयंदृष्ट्वा बाणगांडीवधारिणं ॥ पुनरेवमहानादंव्यसृजंतमहारथाः ॥ १ ॥ पांडवाःसृंजयाश्चैवयेचैषामनुयायिनः ॥ द
ध्मुःसमुद्दिताः शंखान्वीराःसागरसंभवान् ॥ २ ॥ तथाभेर्यश्चपेश्यश्च क्रकचागोविषाणिकाः ॥ सहसेवाभ्यहन्यंतसशब्दस्तुमुलोभव
त् ॥ ३ ॥ अथदेवाःसगंधर्वाःपितरश्चजनेश्वर ॥ सिद्धचारणसंघाश्चसमीयुस्तेदिदृक्षया ॥ ४ ॥ ऋषयश्चमहाभागाःपुरस्कृत्यशतक्रतुं ॥ स
मीयुस्तत्रसहितादृष्टुंतद्वैशसंमहत् ॥ ५ ॥ ततोयुधिष्ठिरोदृष्ट्वायुद्धायसमुद्यमे ॥ तेसेनेसागरप्रख्येमुहुःप्रचलितेनृप ॥ ६ ॥ विमुच्यकवचंवी
रोनिक्षिप्यचवरायुधं ॥ अवरुह्यरथात्तूर्णंपद्भ्यामेवकृतांजलिः ॥ पितामहमभिप्रेक्ष्यधर्मराजोयुधिष्ठिरः वाग्यतःप्रययौयेनप्राङ्मुखोरि
पुवाहिनीः ॥ ८ ॥ तंप्रयांतमभिप्रेक्ष्यकुंतीपुत्रोधनंजयः ॥ अवतीर्यरथात्तूर्णंभ्रातृभिःसहितोभ्यगात् ॥ ९ ॥ वासुदेवश्चतंराजन् पृष्ठतोनुजागा
मह ॥ पार्थिवाश्चैवराजानस्तमनुजग्मुरुत्सुकाः ॥ १० ॥ अर्जुनउवाच ॥ किंतेव्यवसितंराजन्यदस्मानपहायवै ॥ पद्भ्यामेवप्रयातोसिप्राङ्मु
खोरिपुवाहिनीं ॥ ११ ॥ भीमसेनउवाच ॥ क्वगमिष्यसिराजेंद्रविक्षिप्तकवचायुधः ॥ दंशितेष्वरिसैन्येषुभ्रातृनुत्सृज्यपार्थिव ॥ १२ ॥ नकुलउ
वाच ॥ एवंगतेत्वयिज्येष्ठेममभ्रातरिभारत ॥ भीमेदुनोतिहृदयंब्रूहिगंताभवान्क्वतु ॥ १३ ॥ सहदेवउवाच ॥ अस्मिन्रणसमूहेवैवर्तमा
नेमहाभये ॥ योद्धव्येक्वनृपगंतास्मिशत्रूनभिमुखोनृप ॥ १४ ॥ संजयउवाच ॥ एवमाभाष्यमाणोपिभ्रातृभिःकुरुनंदन ॥ नोवाचवाग्यतःकिं
चिद्गच्छत्येवयुधिष्ठिरः ॥ १५ ॥ छ ॥ छ ॥ ॥

तानुवाचमहाप्राज्ञोवासुदेवोमहामनाः॥अभिप्रायोस्यविज्ञातोमयेतिप्रहसन्निव॥१६॥ एषभीष्मंतथाद्रोणंगौतमंशल्यमेवच।अनुमान्यगुरून्स
र्वान्योत्स्यतेसहशत्रुभिः॥१७॥श्रूयतेहिपुराकल्पेगुरुवृद्धान्सबांधवान्।अनुमान्ययथाशास्त्रंयस्तुयुध्येन्महत्तरैः॥१८॥ध्रुवस्तस्यजयोयुद्धेभा
वेदितिमतिर्मम।एवंब्रुवतिकृष्णेतुधार्तराष्ट्रचमूंप्रति॥१९॥हाहाकारोमहानासीन्निःशब्दास्त्वपरेभवन्॥दृष्ट्वायुधिष्ठिरंवीराधार्तराष्ट्रस्यसैनिका
ः२०मिथःसंकथयांचक्रुरेषोहिकुलपांसनः।व्यक्तंभ्येतिराजासौभीष्ममंतिकं॥२१॥युधिष्ठिरःससोदर्यःशरणार्थंप्रयाचकः।धनंजयेकथं
नाथेपांडुपुत्रेवृकोदरे॥२२॥नकुलेसहदेवेचभीतोभ्येतिचपांडवः।ननूनंक्षत्रियकुलेजातोयंप्रथितोभुवि॥२३॥यथास्यहृदयंभीतमल्पसत्वा
स्यसंयुगे॥ततस्तेसैनिकाःसर्वेप्रशंसंतिस्मकौरवान्॥२४॥हृष्टाःसुमनसोभूत्वाचैलानिदुधुवुःपृथक्॥व्यनिंदंस्ततःसर्वेयोधास्तत्रविशांप
ते॥२५॥युधिष्ठिरंससोदर्यंसहितंकेशवेननु॥ततस्तत्कौरवंसैन्यंधिक्कृत्वातुयुधिष्ठिरं॥२६॥निःशब्दमभवत्तूर्णंपुनरेवविशांपते॥किंनुवक्ष्य
तिराजासौकिंभीष्मःप्रतिवक्ष्यति॥२७॥किंभीमःसमरश्लाघीकिंनुभीमार्जुविति॥विवक्षितंकिमस्येतिसंशयःसुमहानभूत्॥२८॥उभयोः
सेनयोराजन्युधिष्ठिरकृतेतदा॥सोवगाह्यचमूंशत्रोःशरशक्तिसमाकुलां॥२९॥भीष्ममेवाभ्ययात्तूर्णंभ्रातृभिःपरिवारितः।तमुवाचत
तःपादौकराभ्यांपीड्यपांडवः॥भीष्मंशांतनवंराजायुद्धायसमुपस्थितं॥३०॥॥

॥युधिष्ठिरउवाच॥ आमंत्रये त्वां दुर्द्धर्ष त्वया योत्स्यामहे सह ॥ अनुजानीहि मां तत्र आशिषश्च प्रयोजय ३१ ॥भीष्मउवाच॥ यद्येवं
नाधिगच्छेथा युधि मां पृथिवीपते ॥ शपेयं त्वां महाराज पराभावाय भारत: ३२ प्रीतोस्मि पुत्र युध्यस्व जयमाप्नुहि पांडव: यत्तेभिलषितं चान्य
तं चान्यतरवाप्नुहि संयुगे ॥३३॥ व्रियतां च वर: पार्थ किमस्मत्तोभिकांक्षसि ॥ एवं गते महाराज न तवा संब्रुवीमि कुरुनंदन: ॥३४॥ अर्थस्य पुरुषो दासो
सत्वर्थो न कस्यचित ॥ इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवैः ॥ यतस्त्वां क्लीववद्वासं न तवास्मि पराजय: ॥ अतोस्म्यर्थेन कौरव्यै युधादन्यति
मिच्छति ॥३६॥ ॥युधिष्ठिरउवाच॥ मंत्रयस्व महाप्राज्ञ हितार्थी मम नित्यस: युधिस्व कौरवोस्यार्थे ममेष सततं वर ॥३७॥ ॥भीष्मउवाच॥ राजन्
किमत्र साह्यं ते करोमि कुरुनंदन: ॥ कामं योत्स्ये परस्यार्थे ब्रूहि यत्ते विवक्षितं ॥३८॥ ॥युधिष्ठिरउवाच॥ तस्मात्त्वं पृच्छामि हं तात पितामह नमोस्तु ते ॥ क
थं जयेयं संग्रामे भवंतमपराजितं ॥३९॥ एतन्मे मंत्रय हितं यदि श्रेय: प्रपश्यसि ॥ न तं पश्यामि कौंतेय यो मां युध्येत माहवे ॥ विजयेत पुमान्क
श्चिदपि साक्षाच्छतक्रतु ४० ॥युधिष्ठिरउवाच॥ तस्मात्पृच्छाम्यहं तु त्वां पितामह नमोस्तु ते ॥ जयोपायं ब्रूहि त्वामात्मन: समरे परं ॥४१॥ ॥भीष्म
उवाच॥ न शत्रुं तात पश्यामि समरे यो जयेत मां ॥ न तावन्मृत्युकालो मे पुनरागमनं कुरु ॥४२॥ ततो युधिष्ठिरो वाक्यं भीष्मस्य कुरुनंदन:
शिरसा प्रतिजग्राह भूयस्तमभिवाद्य च ॥४३॥ प्रागात्पुनर्महाबाहुराचार्यस्य रथं प्रति ॥ पश्यतां सर्वसैन्यानां मध्येन भ्रातृभि: सह: ॥ ४४ ॥

सद्रोणमभिवाद्याथ कृत्वा चैवप्रदक्षिणं उवाचवाचा दुर्धर्षमात्मनिश्रेयसंवचः ॥४२॥ आमंत्रये त्वां दुर्धर्ष योत्स्ये विगतकल्मष ॥ कथंजयेयं
रिपून्सर्वाननुज्ञातस्त्वया द्विज ॥४६॥ द्रोण उवाच ॥ यदिमां नाभिगच्छेथा युद्धाय कृतनिश्चयः ॥ शपेयत्वां महाराज पराभावाय सर्वशः
४७ ॥ तद्युधिष्ठिर तुष्टोस्मि पूजितश्च त्वयानघः अनुजानामि युध्यस्व विजयं समवाप्नुहि ॥४८॥ कारयाच्चते कामं ब्रूयानेहि विवक्षतं ॥ एवंगते
ते महाराज युद्धादन्यत्किमिछसि ॥४९॥ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ॥ इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवैः ॥५०॥ अतस्त्वां
क्लीबवद्ब्रूयां युद्धादन्यत्किमिछसि ॥ योत्स्याम्यहं कौरवार्थे तवाशंस्यो जयो मम ॥५१॥ ॥जयमाशंस मे ब्रह्मन्मंत्रयस्व च
मद्धितं ॥ युध्यस्व कौरवस्यार्थे वैवर एषवृतो मया ॥५२॥ ॥ध्रुवस्ते विजयो राजन्यस्य मंत्री हरिर्भवः ॥ अहं त्वामभिजानामि रणे
शत्रून्विजेष्यसे ॥५३॥ यतो धर्मस्ततो कृष्णो यतः कृष्णस्ततो जयः ॥ युध्यस्व गच्छ कौंतेय पृच्छ मां मकिं ब्रवीमि ते ॥५४॥
पृच्छामि त्वां द्विजश्रेष्ठ शृणु मे यदभिवाछितं ॥ कथं जयेयं संग्रामे भवंतमपराजितं ॥५५॥ न ते स्ति विजयस्तावद्यावद्युध्याम्यहं रणे
रणे ममाशु निधने राजन्यतस्व सहसोदरैः ॥५६॥ हंत तस्मान्महाबाहो वधोपायमात्मनः ॥ आचार्य प्रणिपत्यैष पृच्छामि त्वां नमोस्तुते ॥५७॥
न शत्रुं तं प्रपश्यामि यो मां हन्याद्रणे स्थितं ॥ युध्यमानं सुसंरब्धं शरवर्षौघवर्षिणं ॥ अन्तरा यंतं राजन्न्यस्तशस्त्रमचेतनं ॥ यस्मान्मां युधि योधानां

अस्त्रं चाहं रणे जघ्नां प्रभुत्वासु महद्धि प्रियं ॥ अदेयवाक्यान पुत्र यात्स समेन ब्रूवीमि ते ॥६०॥ एतच्छ्रुत्वा महाराज भारद्वाजस्य धीमतः। अनुमान्य तमा
चार्यं प्रायाच्छारद्वतं प्रति ॥६१॥ सोभिवाद्य कृपं राजन् कृत्वा चाभिप्रदक्षिणं ॥ उवाच दुर्द्धर्षतरं वाक्यं वाक्यविशारदः ॥६२॥ अनुमानपिलायोत्से
हं गुरो विगतकल्मषः ॥ जयेयं च रिपून्सर्वाननुज्ञातस्त्वयानघ ॥६३॥ कृप उवाच ॥ यदिमां नाभिगच्छेः पायुद्धायकृतनिश्चयः ॥ शपेयं त्वां महाराज
परा भावाय सर्वशः ॥ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ॥ इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवैः ॥६५॥ तेषामर्थे महाराज योद्धव्य
मिति मे मतिः ॥ ब्रवीम्यतः क्लीबवत्त्वां युद्धादन्यत्किमिच्छसि ॥६६॥ युधिष्ठिर उवाच ॥ हंत प्रच्छामि ते तस्मादाचार्य प्रश्नमेव च ॥ इत्युक्त्वा व्यथितो
राजा नोवाच गतचेतनः ॥६७॥ संजय उवाच ॥ तं गौतमः प्रत्युवाच विज्ञायास्य विवक्षितं ॥ अवध्योहं महाराज युध्यस्व जयमाप्नुहि ६८ प्रीतस्ते
भिगमेनाहं जयं तव नराधिप ॥ आशाप्रिध्येसदोत्थाय स समेतद्ब्रूवीमि ते ॥६९॥ एतच्छ्रुत्वा महाराज गौतमस्य वचस्तदा ॥ अनुमान्य कृपं
राजा प्रययौ येन मद्रराट् ॥७०॥ सशल्यमभिवाद्याथ कृत्वाभिप्रदक्षिणं ॥ उवाच राजा दुर्द्धर्षमात्मनिःश्रेयसं वच ॥७१॥ अनुमानये त्वां दुर्द्ध
र्षयोत्स्ये निगतकल्मषः ॥ जयेयं च परान्राजन् अनुज्ञातस्त्वयारिपून् ॥७२॥ शल्य उवाच ॥ यदिमां नाभिगच्छेथा युद्धायकृतनिश्चयः ॥ शपेयं
त्वां महाराज पराभावाय वैरणे ॥७३॥ तुष्टोस्मि पूजितश्चास्मि यत्कांक्षसि तदस्तु ते ॥ अनुजानामि चैव त्वां युध्यस्व जयमाप्नुहि ॥ ब्रूहि
।चैवचनं वीर केनार्थः किं ददामि ते ॥ एवं गते महाराज युद्धादन्यत्किमिच्छसि ॥७५॥ ७४॥ श्रीराम ॥ श्रीरा ॥ ७ ॥ ७ ॥ ॥श्रीरा

॥ना॰ नी॰॥ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ॥ इति सत्यं वचो राजन्न बद्धोस्म्यर्थेन कौरवैः ॥ ७६ ॥ करिष्यामि हि ते कामं भागनेय यदीप्सितं ब्र
॥२५९॥ वीम्यतः क्लीववत्त्वां युद्धादन्यत्किमिच्छसि ॥ युधिष्ठिर उवाच ॥ मंत्रयस्व महाप्राज्ञ नित्यमद्धितमुत्तमं ॥ कामं युध्यापरस्यार्थे वरमेकं वृणोम्यहं
७८ ॥ शल्य उवाच किमत्र ब्रूहि संहृते करोमि नृपसत्तमः ॥ कामं योत्स्ये परस्यार्थे वृत्तोस्म्यर्थेन कौरवैः ॥ ७९ ॥ युधिष्ठिर उ० ॥ स एव मे वरः शल्य
उद्योगे यस्त्वया हृतः ॥ सूतपुत्रस्य संग्रामे कार्यस्तेजोवधस्त्वया ॥ ८० ॥ शल्य उवाच ॥ संपत्स्यत्येष ते कामः कुंतीपुत्र युधिष्ठिर ॥ यथेप्सितं गच्छ
युध्यप्रति जाने जयं तव ॥ ८१ संजय उवाच ॥ अनुमान्याथ कौंतेयो मातुलं मद्रकेश्वरं ॥ निर्जगाम महासैन्याद्भ्रातृभिः परिवारितः ॥ ८२ ॥
वासुदेवस्तु राधेयमाहवेभिजगाम है ॥ तत एनमुवाचेदं पांडवार्थे गदाग्रजः ॥ ८३ ॥ श्रुतं मे कर्ण भीष्मस्य द्वेषात्किल न योत्स्यसि ॥ अ
स्मान्वरय राधेय यावद्भीष्मो न हन्यते ॥ ८४ ॥ हते तु भीष्मे राधेय पुनरेष्यसि संयुगं ॥ धार्त्तराष्ट्रस्य साहाय्यं यदि पश्यसि चेत्समं ॥ ८५
कर्ण उवाच ॥ न विप्रियं करिष्यामि धार्त्तराष्ट्रस्य केशवः ॥ त्यक्तप्राणं हि मां विद्धि दुर्योधनहितैषिणं ॥ ८६ ॥ तच्छ्रुत्वा वचनं कृष्णः
संन्यवर्त्तत भारत ॥ युधिष्ठिरपुरोगैश्च पांडवैः सह संगतः ॥ ८७ ॥ अथ सैन्यस्य मध्ये अनुप्राक्रोशत्पांडवाग्रजः यो स्मान्वृणोति ॥राम॥
तं महं वरये सहाय कारणान् ॥ ८८ ॥ अथ तानसमभिप्रेक्ष्य युयुत्सुरिदमब्रवीत् ॥ प्रीतात्मा धर्मराजानं कुंतीपुत्रं युधिष्ठिरं ॥ ८९ ॥ ॥२५९॥
अहं योत्स्यामि भवतः संयुगे धार्त्तराष्ट्रजान् ॥ युष्मदर्थे महाराज यदि मां वृणुषे नघ ॥ ९० ॥ युधिष्ठिर उवाच ॥ एह्येहि सर्वे योत्स्यामस्त

व ग्नात्हनपंदितान् ॥ युयुत्सोवासुदेवश्चवयंब्रूमचसर्वशः ॥ ९१ ॥ हरांणामि त्वांमहावाहोयुध्यस्वममकारणात् ॥ त्वयितंतुश्चपिंगश्च
धृतराष्ट्रस्यदृश्यपते ॥ ९२ ॥ नजस्वास्मान्राजपुत्र भजमानान्महाद्युते ॥ न भविष्यतिदुर्बुद्धिधार्तराष्ट्रोह्यमर्षणः ॥ ९३ ॥ संजयउवाच ॥ ततो
युयुत्सुःकौरव्यान्परित्यज्यसुतांस्तव ॥ जगामपांडुपुत्राणांसेनांविश्राव्यदुंदुभी ॥ ९४ ॥ ततोयुधिष्ठिरोराजासंप्रहृष्टोमहाभुजः ॥ जग्राहकवचंभूयो
दीप्तिमान्कनकोज्वलं ॥ ९५ ॥ प्रत्यपद्यंततोसर्वेरथान्स्वान्पुरुषर्षभाः ॥ ततोव्यूहंयथापूर्वंप्रत्यव्यूहंततेपुनः ॥ ९६ ॥ अवादयन्दुंदुभी
श्चशतशश्चैवपुष्करान् ॥ सिंहनादांश्चविविधान्विनेदुःपुरुषर्षभाः ॥ ९७ ॥ रथस्थान्पुरुषव्याघ्रान्पांडवान्प्रेक्ष्यपार्थिवाः ॥ धृ
ष्टद्युम्नादयः सर्वेपुनर्जहृषिरेतदा ॥ ९८ ॥ गौरवंपांडुपुत्राणांमान्यान्मानयतांश्चतान् ॥ दृष्ट्वामहात्मिनस्तत्रपूजायांचक्रिरेभृशं ९ ॥
९ ॥ सौहृदंचकृपांचैवप्राप्तकालंमहात्मनां ॥ दयांचाज्ञातिषुपरांकथयांचक्रिरेनृपाः ॥ १०० ॥ साधुसाध्वितिसर्वत्रनिश्चेरुस्तुतिसं
हिताः ॥ वाचः पुण्याःकीर्तिमतांमनोहृदयहर्षणाः ॥ १०१ ॥ म्लेच्छाचार्याश्चयेतत्रददृशुःशुश्रुवुस्तदा ॥ वृत्तंतंपांडुपुत्राणांरुरुदु
स्तेसगद्गदाः ॥ १०२ ॥ ततोजघ्नुर्महाभेरीःशतशश्चैवपुष्करान् ॥ शंखांश्चगोक्षीरनिभान्दध्मुर्हृष्टामनस्विनः ॥ १०३ ॥ इतिश्रीमाहा
भारतेभीष्मपर्वणि ॰ ॥ धृतराष्ट्रउवाच ॥ एवंव्यूढेष्वनीकेषुमामकेष्वितरेषुच ॥ केपूर्वंप्राहरंस्तत्रकुरवःपांडवास्तथा ॥ १ ॥
संजयउवाच ॥ भ्रातुस्तद्वचनंश्रुत्वापुत्रोदुःशासनस्तव ॥ भीष्मप्रमुखतः ॥ कृत्वाप्रययौसेनयासह ॥ २ ॥ छ ॥ ॥ श्रीरामजीसहाय

॥भा॰भी॰॥ ॥२६०॥

तथैव पांडवाः सर्वे भीमसेनपुरोगमाः ॥ भीष्मेण युद्धमिछंतः प्रययुर्हृष्टमानसाः ॥३॥ क्ष्वेलाः किलकिलाशब्दाः क्रकचा गोविषाणिकाः भे
रीमृदंगमुरजा हयकुंजरनिःस्वनाः ॥४॥ उभयोः सेनयो राजंस्ततस्तेस्मान्समाद्रवन् ॥ वयं तानभिनर्दंतस्तदासीत्तुमुलं महत् ॥५॥ महांत्यनीकानि
महासमुछ्रये समागमे पांडवधार्तराष्ट्रयोः ॥ चकंपिरे शंखमृदंगनिःस्वनैः ॥ प्रकंपितानीव वनानि वायुना ॥६॥ नरेंद्रनागाश्वसमाकुलानामागछतां
नामशिवे मुहूर्ते ॥ बभूव घोषस्तुमुलश्चमूनां वातोद्धुतानामिव सागराणां ॥७॥ तस्मिन्समुत्थिते शब्दे तुमुले लोमहर्षणे ॥ भीमसेनो महाबाहुः प्राणद
द्गोवृषो यथा ॥८॥ शंखदुंदुभिनिर्घोषो वारणानां च बृंहितं ॥ सिंहनादं च सैन्यानां भीमसेनरवोभ्यभूत् ॥९॥ हयानां हेषमाणानामनीकेषु सहस्रशः स
र्वानभ्यभवच्छब्दो भीमसेनस्य निस्वनः ॥१०॥ तं श्रुत्वा निनदं तस्य सैन्यास्तव वितत्रसुः ॥ जीमूतस्येव नदतः शक्राशनिसमस्वनं ॥११॥ वाहनानि च सर्वाणि शकृ
न्मूत्रं प्रसुस्रुवुः शब्देन तस्य वीरस्य सिंहस्येवेतरे मृगाः ॥१२॥ दर्शयन्घोरमात्मानं महाभ्रमिव नादयन् भीषयंस्ते सुतांस्तत्र तावकान्समभ्यया ॥राम॥ ॥१६०॥
त् ॥१३॥ तमायांतं महेष्वासं सोदर्याः पर्यवारयन् ॥ छादयंतः शरव्रातैर्मेघा इव दिवाकरं ॥१४॥ दुर्योधनश्च पुत्रस्ते दुर्मुखो दुःसहः शलः दुः
शासनश्चातिरथस्तथा दुर्मर्षणो नृप ॥१५॥ विविंशतिश्चित्रसेनो विकर्णश्च महारथाः पुरुमित्रो जयो भोजः सौमदत्तिश्च वीर्यवान् ॥१६॥
महाचापानि धुन्वंतो जलदा इव विद्युतः ॥ आददानाश्च नाराचान्निर्मुक्ताशीविषोपमान् ॥१७॥ अथ ते द्रौपदीपुत्राः सौभद्रश्च ॥ध

महारथः॥ नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः॥१८॥ धार्तराष्ट्रा नृपतयः पुरस्कृत्य ततः शिनेसरे॥ वाजैरिव महादेवे शिलाराशिरिधरामतां
॥१९॥ तस्मिन्प्रथमसंग्रामे भीमज्यातलनिस्वने॥ तावकानां परेषां च नासीत्कश्चित्पराङ्मुखः॥२०॥ लाघवं द्रोणशिष्याणामपश्यं भरतर्षभ
निर्भिन्नवो धिनां राजन्कृतानुत्सृततां भृशं॥२१॥ नोपशाम्यति निर्घोषो धनुषां कूजतां तथा॥ विनिश्चेरुः शरा दीप्ता ज्योतींषीव नभस्तलात्॥२२॥
सर्वे त्वन्ये महीपालाः प्रेक्षका इव भारत॥ ददृशुर्दर्शनीयं ते भीमं ज्ञातिसमागमं॥२३॥ ततस्ते जातसंरंभाः परस्परकृतागसः॥ अन्योन्यस्पर्धया
राजन्व्यायच्छंत महारथाः॥२४॥ कुरुपांडवसेने ते हस्त्यश्वरथसंकुले॥ शुशुभाते रणेऽतीव पटे चित्रगते इव॥२५॥ ततस्ते पार्थिवाः सर्वे प्रगृहीतशरा
सना सहसैन्याः समापेतुः पुत्रस्य तव वाहिनी॥२६॥ उभयोः सेनयस्तीह सैन्यानां सस्वनगमः॥ अनंतद्वीये ते चारित्रः सैन्येन रजसावृत॥२७
प्रभुधातां प्रभग्नानां पुनरावर्ततामपि॥ नतु स्वेषां परेषां च विशेषसमदृश्यत॥२८॥ तस्मिन्तुमुले युद्धे वर्तमाने महाहवे॥ अति सर्वाण्यनी
कानि पितातेतिव्यरोचत॥२९॥ इति श्रीभीष्मपर्वणि॥ संजय उवाच॥ पूर्वाह्णे तस्य रौद्रस्य युद्धमासीद्विशांपते॥ प्रावर्तत महाघोरं राज्ञा
देहावकर्तनं॥१॥ कुरूणां पांडवानां च संग्रामे विजिगीषतां॥ सिंहानामिव संह्रादो दिवमुर्वीं च नादयन्॥२॥ आसीत्किलकिलाशब्द
स्तलशंखरवैः सह॥ जज्ञिरे सिंहनादाश्च शूराणां प्रतिगर्जतां॥३॥ तलत्राभिहताः शब्दा ज्याशब्दाश्च भरतर्षभ॥ पत्तीनां पादशब्दश्च वाजिनां च महा
स्वनः॥४॥

भा॰ भी॰ ॥ १६१ ॥

श्वश्च आयुधानां च निःस्वनः घंटाशब्दश्च नागानामन्योन्यमभिधावतां ॥५॥ तस्मिन्समुदितः शब्दस्तुमुलो लोमहर्षणः ॥ बभूवरथ
निर्घोषः पर्जन्यनिनदोपमः ॥६॥ तेमनः क्रूरमास्थाय समभित्यक्तजीविताः ॥ पांडवान्समभ्यवर्तन्त सर्वएवोच्छ्रितध्वजाः ॥७॥ स्वयं शांतन
वो राजन्नभ्यधावद्धनंजयं ॥ प्रगृह्य कार्मुकं घोरं कालदंडोपमं रणे ॥८॥ अर्जुनोपि धनुर्गृह्य गांडीवं लोकविश्रुतं ॥ अभ्यधावत्तेत
स्विगंगेयं रणमूर्धनि ॥९॥ तावुभौ कुरुशार्दूलौ परस्परवधैषिणौ ॥ गांगेयस्तु रणे पार्थं विद्ध्वा नाकंपयद्बली ॥१०॥ तथैव पांडवो राज
न्भीष्मं नाकंपयद्युधि ॥ सात्यकिस्तु महेष्वासः कृतवर्माणमभ्ययात् ॥११॥ तयोः समभवद्युद्धं सुमहल्लोमहर्षणं ॥ सात्यकिः कृतव
र्माणं कृतवर्मा च सात्यकिं ॥१२॥ आनर्च्छतुः सुनिर्घोषास्तक्षमाणौ परस्परं ॥ तौ शराचितसर्वांगौ शुशुभाते महाबलौ ॥१३॥ व
संते पुष्पशबलौ पुष्पिताविव किंशुकौ ॥ अभिमन्युर्महेष्वासो बृहद्बलमयोधयत् ॥१४॥ ततः कोसलको राजा सौभद्रस्य विशांपते
ध्वजं चिच्छेद समरे सारथिं चास्य पातयत् ॥१५॥ सौभद्रस्तु ततः क्रुद्धः पातिते रथसारथौ ॥ बृहद्बलं महाराज विव्याध नवभिः शरैः
॥१६॥ अथापराभ्यां भल्लाभ्यां शिताभ्यामरिमर्दनः ॥ ध्वजमेकेन चिच्छेद पार्ष्णिमेकेन सारथिं ॥१७॥ अन्योन्यं च शरैस्तीक्ष्णैस्तत
क्षतुररिंदमौ ॥ मानिनं समरे दृप्तं कृतवैरं महारथं ॥१८॥ भीमसेनस्तव सुतं दुर्योधनमयोधयत् ॥ तावुभौ नरशार्दूलौ कुरुमुख्यौ
महारथौ ॥१९॥ अन्योन्यं शरवर्षाभ्यां ववर्षतू रणाजिरे ॥ तौ वीक्ष्य तु महात्मानौ कृतिनौ चित्रयोधिनौ ॥२०॥ विस्मयः सर्वभूतानां सम
पद्यत भारत ॥

राम ॥ १६१ ॥

दुःशासनस्ततः नकुलं प्रत्युद्ययौ महारथं ॥२१॥ अथ विध्य निशितैर्वीरो प्रहसन्निव भारत तस्य माद्रीसुतः केतुं सशरं चापमाहतं ॥२३॥ चिच्छेद नि
शितैर्वीरो प्रहसन्निव भारत ॥ अथैनं पंचविंशत्या क्षुद्रकाणां समर्पयत् ॥ चिच्छेद निशितैर्वीरो प्रहसन्निव भारत ॥ तस्य माद्रीसुतः केतुं शरा
सनं च शरासनं ॥ प्रत्यस्त नवदुर्द्धर्षो नकुलस्य महाहवे ॥ तुरंगांश्चैव चिच्छेद ध्वजं चैवाप्यपातयत् ॥२५॥ दुर्मुखः सहदेवं तु प्रत्युद्यायाम हाबलं ॥ वि॰
व्याध शरवर्षेण यतमानं महाहवे ॥२६॥ सहदेवस्ततो वीरो दुर्मुखस्य महाहवे ॥ शरेण भृशतीक्ष्णेन पातयामास सारथिं ॥२७॥ तावन्योन्यं समासा
द्य समरेषु युद्धदुर्मदौ ॥ त्रासयेतां घोरैर्घोरैः कृतप्रतिकृतैषिणौ ॥२८॥ युधिष्ठिरः स्वयं राजा मद्रराजानमभ्ययात् ॥ तस्य मद्राधिपश्चापं द्विधा चिच्छेद
पश्यतः ॥२९॥ तदपास्य धनुश्छिन्नं कुंतीपुत्रो युधिष्ठिरः ॥ अन्यत्कार्मुकमादाय वेगवद्बलवत्तरं ॥३०॥ ततो मद्रेश्वरं राजा शरैः सन्नतपर्व
भिः ॥ छादयामास संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ धृष्टद्युम्नस्ततो द्रोणमभ्यधावत भारत ॥ तस्य द्रोणः सुसंक्रुद्धः परासुकरणं दृढं
॥३२॥ धनुश्चिच्छेद समरे यंत्रचल्पस्य महात्मनः ॥ शरं चैव महाघोरं कालदंडमिवापरं ॥३३॥ प्रेषयामास समरे सोऽस्य कायेन मञ्जतं ॥ अथान्यद्धनु
रादाय सायकांश्च चतुर्दश ॥३४॥ द्रोणं द्रुपदपुत्रस्तु प्रतिविव्याध संयुगे ॥ ततो वश्न्योन्यं सुसंरब्धौ चक्रतुः सुभृशं रणं ॥३५॥ सौ
मदत्तिस्तु शैनेयं प्राप्य संरभसो युधि ॥ अभ्युद्ययौ रवं राज तिष्ठ तिष्ठेति चाब्रवीत् ॥३६॥ तस्य वै दक्षिणं वीरो निर्बिभेद रणे भुजं ॥ सौ
मदत्तिस्ततः शंखं जत्रुदेशे समाहनत् ॥३७॥ तयोः समभवद्युद्धं घोररूपं विशांपते ॥ दृप्तयोः समरे रौद्रं देववृत्रयोरिव ॥३८॥ ॥ ३९॥

वाल्हीकं तु रणे क्रुद्धस्तत्त्रयं पंचविंशांपते आप्लुवत मेयात्माधृष्टकेतुर्महारथः ॥ ३९ ॥ बाल्हीकस्तु ततो राजन्धृष्टकेतुममर्षणं ॥ शरैर्बहुभिरानर्च्छ
त्सिंहनादमथानदत् ॥ ४० ॥ चेदिराजस्तु संक्रुद्धो बाल्हीकं नवभिः शरैः ॥ विव्याध समरे तूर्णं मत्तो मत्तमिव द्विपं ॥ ४१ ॥ तौ तत्र समरे क्रुद्धौ नर्दंतं चमु
नं च मुहुर्मुहुः ॥ समीयतुः सुसंक्रुद्धावंगारकबुधाविव ॥ ४२ ॥ राक्षसं क्रूरकर्माणं घटोत्कचः ॥ अलंबुषं प्रत्युदियाद्बलं शक्र इवाहवे ॥ ४३ ॥ घटो
४३ घटोत्कचस्तु संक्रुद्धो राक्षसं तं महाबलं ॥ नवत्या सायकैस्तीक्ष्णैर्दारयामास भारत ॥ ४४ ॥ अलंबुषस्तु समरे भैमसेनिं महाहवे ॥ बहु
दारयामास सरैः सन्नतपर्वभिः ॥ ४५ ॥ व्यभ्राजेतां ततस्तौ तु संयुगे शरविक्षतौ ॥ शिखंडिनं समरे राजन्द्रौणिरभ्युद्ययौ बली ॥ ४६ ॥ अश्वत्थामा
क्रुद्धः शिखंडिनमवस्थितं ॥ नाराचेन सुतीक्ष्णेन भृशं विद्ध्वा न्यकंपयत् ॥ ४७ ॥ शिखंडिये ततो राजन्द्रोणपुत्रमताडयत् ॥ सायकेन सुपीतेन
तीक्ष्णेन निशितेन च ॥ ४८ ॥ जघ्नतुस्तौ तदान्योन्यं शरैर्बहुविधैर्मृधे ॥ भगदत्तं रणे शूरं विराटो वाहिनीपतिः ॥ ४९ ॥ अभ्ययात्त्वरितो राजंस्ततो युद्धमव
वर्तत ॥ विराटो भगदत्तं तु शरवर्षेण भारत ॥ ५० ॥ अभ्यवर्षत्सुसंक्रुद्धो मेघो वृष्ट्या इवाचलं ॥ भगदत्तस्ततस्तूर्णं विराटं पृथिवीपतिं ॥ ५१ ॥
छादयामास समरे मेघः सूर्यमिवोदितं ॥ बृहत्क्षत्रं तु कैकेयं कृपः शारद्वतो ययौ ॥ ५२ ॥ तं कृपः शरवर्षेण छादयामास भारत ॥ गौतमं तु सं ॥ राम ॥
क्रुद्धं शरवृष्ट्याभ्यवारयत् ॥ ५३ ॥ ततोन्योन्यं हयान्हत्वा धनुषी छित्त्वा च भारत ॥ विरथावसियुद्धाय समाजग्मतुरमर्षणौ ॥ ५४ ॥ तयोस्तदभवद्युद्धं घो ॥ १६२ ॥
राम ॥ रं परमदारुणं ॥ द्रुपदस्तु ततो राजन्सैंधवं वै जयद्रथं ॥ ५५

अभ्युपयौ सुसंरब्धो द्रष्टुकामः परंतपः ॥ ततः सैंधवको राजा द्रुपदं विशिखैस्त्रिभिः ॥५६॥ ताडयामास समरे स च तं प्रत्यविध्यत ॥ तयोः समभवद्यु
द्धं घोररूपं सुदारुणं ॥५७॥ ईक्षणप्रीतिजननं शुक्रांगारकयोरिव ॥ विकर्णस्तु सुतस्तुभ्यं श्रुतसोमं महाबलं ॥ अभ्ययाज्जवनैरश्वैस्ततो युद्धमभ
वत् ॥ विकर्णः श्रुतसोमं तु विध्वा नाकंपयच्छरैः ॥ श्रुतसोमो विकर्णस्य तदद्भुतमिवाभवत् ॥ सुशर्माणं नरव्याघ्रश्चेकितानो महारथः ॥६०॥ अभ्यद्रवत्सुसंरब्धः
पांडवार्थे पराक्रमी ॥ सुशर्मा च महाराज चेकितानं महारथं ॥६१॥ महता शरवर्षेण वारयामास संयुगे ॥ चेकितानोपि संरब्धः सुशर्माणं महाहवे
॥६२॥ प्रवर्षेण शरवर्षेण महामेघ इवाचलं ॥ शकुनिः प्रतिविंध्यं तु पराक्रांतं पराक्रमी ॥६३॥ अभ्यद्रवत राजेंद्र मत्तः सिंह इव द्विपं ॥ यौधिष्ठिरः सुसंक्रुधः
सौबलं निशितैः शरैः ॥६४॥ व्यदारयत संग्रामे मघवा इव दानवं ॥ शकुनिः प्रतिविंध्यं तं प्रत्यविध्यन्महाहवे ॥ व्यदारयन्महाप्राज्ञः शरैः सन्न
तपर्वभिः ॥ सुदक्षिणं तु राजेंद्र कांबोजानां महारथं ॥६६॥ श्रुतकर्मा पराक्रांतमभ्यद्रवत संयुगे ॥ सुदक्षिणस्तु राजेंद्र साहदेविं महारथं
॥६७॥ विध्वा नाकंपयत वै मैनाकमिव पर्वतं ॥ श्रुत्वा कर्म ततः क्रुधः स्तात्लुनिः समरे हयान् ॥६८॥ शरैर्बहुभिरत्यर्थं दारयन्निव सर्वशः
दारावात च संक्रुध श्रुतायुषममर्षणं ॥६९॥ युयुत्सुं पौरवो यत्तोऽपतद्रूपं परंतपः ॥ आर्जुनीस्तस्य समरे हयान् हत्वा महारथः ॥७०॥
ननाद बलवान् राजन् स्तस्ने मेघ स्वपरायत ॥ श्रुतायस्तु सुसंक्रुधः फाल्गुनिः समरे हयान् ॥७१॥ निजघान गदाग्रेण ततो युद्धमवर्तत ॥ ॥

भा. भा.भी.
१६ १६३

नि जघान नगराग्रेयान्ततो युधमवर्त्तत ॥ विंदानुविंदावावंत्यौ कुंतिभोजं महारथं ॥ ७२ ॥ सुसेनं सम्सुतं वीरं युसुजतु राहवे तत्राद्भुतमपश्या
मस्तयोर्घोरं पराक्रमं ॥ ७३ ॥ अयुध्येतां स्थिरो भूत्वा महत्यासेनयासह ॥ अनुविंदस्तु गदया कुंतिभोजमताडयत ॥ ७४ ॥ कुंतिभोज
स्ततं तूर्णं शरवर्षैरवाकिरत ॥ कुंतिभोजसुतश्चापि विंदं विव्याध सायकैः ॥ ७५ सचतं प्रतिविव्याध तदद्भुतमिवाभवत ॥ केकया भ्रा
तरः पंच गांधारान्पंच मारिष ॥ ससैन्यास्तेसहसैन्यास्तु योधयामासुराहवे ॥ वीरबाहुश्चते पुत्रो वैराटिं सत्तमं ॥ उत्तमं योधयामास वि
व्याधनवभिः शरैः ॥ उत्तरश्चापितं वीरं विव्याधनिशितैः शरैः उत्तरश्चापितं वाकं विव्याधनिशितैः शरैः चेदयामासमरेराजन् उलूकं समभिद्र
त ॥ तथैवसरवर्षेण उलूकं समभिध्यतः ॥ उलूकश्चापितं वाणैर्निसैत्तैर्लोमहर्षणैः ॥ ततो युद्धं समभवद्घोररूपं विशांपते ॥ ८० ॥ हा
स्येनां सुसंरब्धावध्यौन्यमपराजितौ ॥ एवं द्वंद्वसहस्राणि रथवानरवाजिनां ॥ ८१ ॥ पदातीनां च समरे तव तेषां च संकुले ॥ मुहूर्तमिव तद्यु
धमासीन्मधुरदर्शनं ॥ ८२ ॥ उतन्मम वप्राजानं प्राज्ञायत [illegible] किंचन ॥ गजो गजेन समरे रथी च रथिनं ययौ ॥ ८३ ॥ अश्वो श्वं समभिप्रे
क्ष्य पदातिश्च पदातिनं ॥ ततो युद्धं सुदुर्द्धर्षं व्याकुलं समपद्यत ॥ शूराणां समरे तत्र समासाद्य परस्परं ॥ तत्र देवर्षयः ॥ सिद्धाश्चा
रणाश्च समागता प्रेक्षंते तत्प्रणां घोरं देवासुरसमं ततः ॥ ततो दंति सहस्राणि रथानां चापि मारिष ॥ ८४ ॥ अश्वे घाः पुरुषौघाश्चा
विपरीतं समापयुः ॥ तत्र तत्र प्रदृश्यंते रथवारणपंक्तयः ॥ सादिनश्च रथः व्याघ्रयुध्यमाना मुहुः ॥ इति श्री महाभारते भीष्मपर्वणि सं० संजय

२

॥ श्री महाभारते भीष्मपर्वणि ॥

॥राम॥
॥१६३॥

निर्मर्यादं प्रयुद्धानि तन्मे वक्ष्यामि भारत। १ न पुत्रः पितरं जज्ञे न पिता पुत्रमौरसं। न भ्राता भ्रातरं तत्र स्वस्रीयो न च मातुलं॥ २ न मातुलश्च स्वस्रीयं न सा
खायं सखा तदा॥ आविष्टा इव युध्यंते पांडवाः कुरुभिः सह। ३ रथानीकं नरव्याघ्राः॥ केचिदभ्यपतन् रथैः॥ अभज्यंत रथैरेव युगानि भरत
र्षभ॥ रथेषाश्च रथेषाभिः कूबराश्च कूबरैः॥ संगतैः संगताः केचित्परस्परजिघांसवः॥ ५ न शेकुश्चलितुं केचित्संनिपत्य रथा रथैः। प्रभि
न्नास्तु महाकायाः संनिपत्य महागजाः॥ ६ बहुधा मारयन्क्रुद्धा विषाणैरितरेतरं॥ सतोरणपताकैश्च वारणा वारणा रणे॥ ७ अभि
सृत्य महाराज वेगवद्भिर्महागजैः॥ दंतैरभिहतास्तत्र चुक्रुशुः परमातुराः॥ ८॥ अभिनीताश्च शिक्षाभिस्तोत्रांकुशसमाहताः॥
अप्रभिन्ना प्रभिन्नानां संमुखाभिमुखा ययुः। ९ प्रभिन्नैरपि संयुक्ताः केचित्तत्र महारथाः॥ क्रौंचवन्निनदं कृत्वा प्राद्रवंत ततस्ततः। १०॥
सम्यक्प्रणीताश्च तथा प्रभिन्नाः करटामुखाः॥ ऋष्टितोमरनाराचैर्निरुद्धा वरवारणाः॥ ११ विनेदुर्भिन्नमर्माणो निपेतुश्च गतासवः॥
प्रधावंत दिशः केचिन्नदंतो भैरवान्रवान्॥ १२ गजानां पादरक्षाश्च व्यूढोरस्काः प्रहारिणः॥ ऋष्टिभिश्च धनुर्भिश्च विमलैश्च परश्वधैः॥ १३
गदाभिर्मुशलैश्चैव भिंडिपालैः सतोमरैः॥ सायकैः परिघैश्चापि निस्त्रिंशैर्विमलैः शितैः॥ १४ सुगृहीतैः सुसंरब्धा इवमाणास्ततस्ततः॥
व्यदृश्यंत महाराज परस्परजिघांसवः॥ १५ राजमानाश्च निस्त्रिंशाः संसक्ता नरशोणितैः॥ प्रत्यदृश्यंत शूराणामन्योन्यमभिधावतां॥ १६ अव
क्षिप्तावभग्नानामसीनां वीरबाहुभिः॥ संजज्ञे तुमुलः शब्दः पततां परमर्मसु॥ १७ गदामुशलरुग्णानां भिन्नानां च वरासिभिः॥ श्रीरामायनमः॥ ७

॥पा०भी०॥
॥१६४॥

दंतिदंतावभिन्नानांमृदितानांचदंतिभिः॥१८॥तत्रतत्रनरौघानांक्रोशतामितरेतरं।शुश्रुवुर्दारुणावाचःप्रेतानामिवभारत॥१९॥ह
यैरपिहयारोहाश्चामरापीडधारिभिः।हंसैरिवमहावेगैरन्योन्यमभिविद्रुताः॥२०॥तैर्विमुक्तामहाप्रासाजाम्बूनदविभूष
णाः।आशुगाविमलास्तीक्ष्णाःसंपेतुर्भुजगोपमाः॥२१॥अश्वैरग्र्यजवैःकेचिदाप्लुत्यमहतोरथान्।शिरांस्याददिरेवीरार
थिनामश्वसादिनः॥२२॥बहूनपिहयारोहान्भल्लैःसन्नतपर्वभिः।रथीजघानसंप्राप्यबाणगोचरमागतान्॥२३॥नवमेघप्रती
काशाश्चाक्षिप्यतुरगान्गजाः।पादैरेवममृदुर्मत्ताःकनकभूषणाः॥२४॥प्राधेर्विमथिताःकेचिद्भिन्नेदुःपरमातुराः।साश्वारो
हान्हयान्केचिदुन्मथ्यवारणाः॥२५॥सहसाचिक्षिपुस्तत्रसंकुलेपरमेसति।साश्वारोहान्विषाणाग्रैरुत्क्षिप्यतुरगान्गजाः
॥२६॥रथौघानवमृद्नंतःसध्वजानभिचक्रमुः।पुंस्त्वादतिमदत्वाच्चकेचित्तत्रमहागजाः॥२७॥साश्वारोहान्हयान्जघ्नुःक
रैःसचरणैस्तथा।प्रतिमानेषुगात्रेषुपार्श्वेष्वपिचवारणान्।आशुगाविमलास्तीक्ष्णाःसंपेतुर्भुजगोपमाः।नराश्वकाया
न्निर्भिद्यलोहानिकवचानिच।निपेतुर्विमलाःशक्त्योवीरबाहुभिरर्पिताः।महोल्काप्रतिमाघोरास्तत्रतत्रविशांपते।द्वीपिचर्माव
नद्धैश्चव्याघ्रचर्मशयैरपि।विकोशैर्विमलैःखड्गैरभिजघ्नुःपरान्रणे।अभिप्लुतमभिक्रुद्धमेकपार्श्वविदारितं।विदर्शयंतःस
पेतुःखड्गचर्मपरश्वधैः।व्याक्रोशंतमहाराजतत्रतत्रसमबांधवान्।पुत्रानन्येपितॄनन्येभ्रातॄंश्चसहबंधुभिः॥ ॥ ॥

॥राम॥
॥१६४॥

मातुलान्भागिनेयांश्च पातनपि च संयुगे ॥ विकीर्णांत्राः सुबहवो भग्नसक्थाश्च भारत ॥३४॥ बाहुभिश्चापरे छिन्नैः पार्श्वेषु च विदारिताः
क्रंदंतः समदृश्यंत सुमहांजीविते स्व ॥३५॥ तृषापरिगताः केचिदल्पसत्वा विशांपते ॥ भूमौ निपतिताः संख्ये मृगयांचक्रिरे ज
लं ॥३६॥ रुधिरौघपरिक्लिन्नाः क्लिश्यमानाश्च भारत ॥ व्यनिंदन्भृशमात्मानं तव पुत्रांश्च संगतान् ॥३७॥ अपरे क्षत्रियाः शूराः कृ
तवैराः परस्परं ॥ नैव शस्त्रं विमुंचंति नैवाक्रंदंति मारिष ॥३८॥ तर्जयंति च संहृष्टास्तत्र तत्र विशांपते ॥ निर्दश्य दशनैश्चापि क्रो
धात्स्वरदनछदा ॥३९॥ भ्रकुटीकुटिलैर्वक्त्रैः प्रेक्षंतोपि परस्परं ॥ अपरे क्लिश्यमानास्तु शरार्ता व्रणपीडिता ॥४०॥ निकुजाः
समपद्यंत दृढसत्वा महाबला ॥ अन्ये च विरथाः शूरा रथमन्यस्य संयुगे ॥४१॥ प्रार्थयाना निपतिताः संक्षुण्णा वरवारणैः ॥ अ
शोभंत महाराज सपुष्पा इव किंशुका ॥४२॥ संबभूवुरनीकेषु बहवो भैरवस्वनाः ॥ वर्तमाने महाभीमे तस्मिन्वीरवरक्षये
॥४३॥ अहनत्पिता पुत्रं पुत्रश्च पितरं रणे ॥ स्वस्त्रीयो मातुलं चापि स्वस्त्रीयं चापि मातुल ॥४४॥ सखायं च सखा चापि संबंधी बांधवं
धी बांधवं तथा ॥ एवमेषः क्षयो वृत्तः कुरूणां पांडवैः सह ॥४५॥ वर्तमाने भये तस्मिन्निर्मर्यादे महाभये ॥ भीष्ममासाद्य पा
र्थानां वाहिनी समकंपत ॥४६॥ केतुना पंचतारेण तालेन भरतर्षभ ॥ राजतेन महाबाहुरुच्छ्रितेन महारथे ॥४७॥ बभौ भीष्मस्त
दा राजंश्चंद्रमा इव मेरुणा ॥ इति श्रीभीष्मपर्वणि ७० ॥ संजय उवाच ॥ गतपूर्वाह्णभूयिष्ठे तस्मिन्नहनि दारुणे वर्तमाने तथा रौ
द्रे राजन्नरवरक्षये ॥१॥ दुर्मुखः कृतवर्मा च कृपः शल्यो विविंशतिः ॥ भीष्मं जुगुपुरासाद्य तव पुत्रेण चोदिता ॥२॥ ॥

॥भा०भी॥ ॥२६५॥

एतेरंतिरथैर्युक्तः पंचभिर्भरतर्षभ॥ पांडवानामनीकानि विजगाहे महारथ॥३॥ चेदिकाशिकरूषेषु पांचालेषु च भारत॥ भीष्मस्य बहुधा ता-
लचलकेतुरदृश्यत॥ सशिंजानस्य वीरोरथयांश्च सयुगध्वजान॥ विचकर्त महावेगैर्भल्लैः सन्नतपर्वभिः॥ नृत्यतोरथमार्गेषु भीष्मस्यभ-
जर्षभ॥ केचिदार्तस्वरं चक्रुर्नागा मर्मसु ताडिताः॥६॥ अभिमन्युः सुसंक्रुद्धः पिशंगैस्तुरगोत्तमैः॥ सयुक्तं रथमास्थाय प्रायाद्भीष्मरथं
प्रति॥७॥ जांबूनदविचित्रेण कर्णिकारकेतुना॥ अभ्यवर्तत भीष्मं च तांश्चैव रथसत्तमान॥८॥ स तालकेतोस्तीक्ष्णेन केतुमाह-
त्य पत्रिणा॥ भीष्मेण युयुधे वीरस्तस्य चानुरथैः सह॥९॥ कृतवर्माणमेकेन शल्यं पंचभिरायसैः॥ भित्वा नवभिरानर्छत्तीक्ष्णाग्रैः प्रपि-
तामहं॥१०॥ पूर्णायतविसृष्टेन सम्यक्प्रणिहितेन च॥ ध्वजमेकेन चिच्छेद जांबूनदविभूषितं॥११॥ दुर्मुखस्य तु भल्लेन सर्वावरणभेदि-
ना जहार सारथेः कायाच्छिरः सन्नतपर्वणा॥१२॥ धनुश्चिच्छेद भल्लेन कार्तस्वरविभूषितं॥ कृपस्य निशिताग्रेण तांश्च तीक्ष्णमु-
खैः शरैः॥१३॥ जघान परमक्रुद्धो नृत्यन्निव महारथः॥ तस्य लाघवमुद्वीक्ष्य तुतुषुर्देवता अपि॥१४॥ लब्धलक्षतया कार्ष्णेः सर्वे भीष्म-
मुखा रथाः॥ सत्वयंसममंसत साक्षादिव धनंजयं॥१५॥ तस्य लाघवमार्गस्थमलातसदृशप्रभं॥ दिशः पर्यपतच्चापि गांडीवमिव ॥राम॥
घोषयन॥१६॥ स तमासाद्य वेगेन भीष्मो नवभिराशुगैः॥ विव्याध समरे तूर्णमार्जुनिं परवीरहा॥१७॥ ध्वजं चास्य त्रिभिर्भल्लैश्छि- ॥२६५॥
च्छेद परमौजसः॥ सारथिं च त्रिभिर्बाणैराजघान यतव्रतः॥१८॥ तथैव कृतवर्मा तु कृपः शल्यश्च मारिष॥ निर्विध्य नाकंपयत कार्ष्णि-
मैनाकमिव पर्वतं॥१९॥

सैनैः परिवृतः स्सूरोधार्तराष्ट्रैः महारथैः॥ ववर्ष शरवर्षाणि कार्ष्णिः पंचरथान्प्रति॥२०॥ ततस्तेषां महास्त्राणि निवार्य शरवृष्टिभिः ननाद वलवान्कार्ष्णिर्भीष्मा
यविसृजच्छरा॥२१॥ तत्रास्य सुमहद्राजन्बाह्वोर्वलमदृश्यत॥ यतमानस्य समरे भीष्ममर्दयतः शरैः पराक्रांतस्य तस्यैवं भीष्मोपि प्राहिणोच्छरान्॥ स तांश्चि
च्छेद समरे भीष्मचापच्युताञ्छरान्॥ ततो ध्वजममोघेषु भीष्मस्य नवभिः शरैः॥ चिच्छेद सगरे वीरस्तत उच्चुक्रुशुर्जनाः सराजतो महास्कंधस्तालो मणिविभू
षितः सौभद्रविशिखैश्छिन्नः पपात भुवि भारत॥२५॥ ध्वजं सौभद्रविशिखैः॥ पततं भरतर्षभः दृष्ट्वा भीमो नदद्धृष्टः सौभद्रमभिहर्षयन्॥२६॥ अथ भीष्मो
महास्त्राणि दिव्यानि च वहूनि च॥ प्रादुश्चक्रे महारौद्रे रणे तस्मिन्महावलः॥२७॥ ततः शरसहस्रेण सौभद्रं प्रपितामहः अवाकिरदमेयात्मा शराणां
नतपर्वणां॥२८॥ ततो दश महेष्वासाः पांडवानां महारथाः॥ रक्षार्थमभ्यधावंत सौभद्रं त्वरिता रथैः॥२९॥ विराटः सहपुत्रेण धृष्टद्युम्नश्च पार्षतः॥ भीमश्च
कैकयश्चैव सात्यकिश्च विशांपते॥३०॥ जवेन पततां तेषां भीष्मः शांतनवो रणे॥ पांचाल्यं त्रिभिरानर्च्छत्सात्यकिं नवभिः शरैः॥३१॥ पूर्णायतविसृष्टे
न क्षुरेण निशितेन च॥ ध्वजमेकेन चिच्छेद भीमसेनस्य पत्रिणा॥३२॥ जांवूनदमयः केतुः केसरी नरसत्तम॥ ~~पपात भीमसेन~~स्य भीष्मेण मथितो रथात्॥३३॥
ततो भीमस्त्रिभिर्विध्वा भीष्मं शांतनवं रणे॥ कृपमेकेन विव्याध कृतवर्माणमष्टभिः॥३४॥ प्रगृहीताग्रहस्तेन वैराटिरपि दंतिना॥ अभ्यद्रवत राजानं महा
धिपतिसुतरः॥३५॥ तस्य वारणराजस्य रथे चापततो जवात्॥ शल्यो विनिवारयामास वेगमप्रतिमं रणे॥३६॥ राम राम राम राम॥ राम॥ राम॥ राम॥

तस्य क्रुद्धः स नागेंद्रहृहतः साधुवाहिनः पद्दायुगमधिष्ठाय जघान चतुरो हयान्॥ ३७॥ सहताश्वे रथे तिष्ठन् मद्राधिपतिरायसीं॥ उग्रांतकरीं शक्तिं चिक्षेप भुजगो-
पमां॥ ३८॥ तथाभिन्नतनुत्राणाः प्रविश्य विपुलं तमः सपपात गजस्कंधात् प्रमुक्तांकुशतोमरः॥ ३९॥ समादाय च शल्योसिमवप्लुत्य रथोत्तमात्॥ वारणेंद्र-
स्य विक्रम्य चिच्छेदाथ महाकरं॥ ४०॥ भिन्नवर्मा शरव्रातैश्छिन्नहस्तः स वारणः॥ भीममार्तस्वरं कृत्वा पपात च ममार च॥ ४१॥ एतदीदृशकं कृत्वा मद्रराजो ज-
नाधिपः॥ आरुरोह रथं तूर्णं भास्वरं कृतवर्मणः॥ ४२॥ उत्तरं तु हतं दृष्ट्वा वैराटिश्चांतरं तदा॥ श्वेतः सप्त महावीरान् दृष्ट्वा क्रोधसमन्वितः॥ ४३॥ धनूंषि तेषां चि-
च्छेद वाणैः सन्नतपर्वभिः॥ निकृत्तान्येव तानि स्म समदृश्यंत भारत॥ ४४॥ ततस्ते तु निमेषार्द्धात् प्रतिपद्य धनूंषि च॥ सप्त चैव पृषत्कांश्च श्वेते पर्यपातयन्॥ ४५॥ त-
तः पुनरमेयात्मा भल्लैः सप्तभिराशुगैः॥ निचकर्त महाबाहुस्तेषां चापानि धन्विनां॥ ४६॥ ते निकृत्तमहाचापाः स्त्वरमाणा महारथाः॥ अथ शक्तीः परामृश्य
विनेदुर्भैरवान् रवान्॥ ४७॥ मुमुचुर्भरतश्रेष्ठ सप्त श्वेतरथं प्रति॥ ततस्ते ज्वलिताः सर्वे महोल्कासमनिस्वनाः॥ ४८॥ अप्राप्ताः सप्तभिर्भल्लैश्चिच्छेद परा-
मास्त्रवित्॥ ततः समादाय शरं सर्वकायविदारणं॥ ४९॥ प्राहिणोद्भरतश्रेष्ठ वाराणस्वेतरथं प्रति॥ तस्य देहे निपतिते वारो वक्रातिगो महान्॥ ५०॥ ततो रुक्म-
रथो राजन् साप केन दृढहतः॥ निषसाद रथोपस्थे कश्मलं चाविशन्महत्॥ तं विमंज्ञं विमनसं त्वरमाणस्तु सारथिः॥ अपोवाह ल्लब्धसंज्ञः सर्वलोकस्य प-
श्यतः॥ ५२॥ श्वेतो यन्तास्समादाय वाजिनो हेमभूषितान्॥ छ॥ छ॥ ॥

तेषांसचमहाबाहुर्ध्वजंशीर्षरिपपातयत्॥५३॥हर्षांश्चशेषान्निर्भिद्यसारथिंचपरंतप॥शरैश्श्वेतंसमाकार्यप्रायाच्छल्यरथंप्रति॥५४॥ततोहलहला
शब्दस्तवसैन्येषुभारत॥दृष्ट्वासेनापतिंतूर्णंयांतंशल्यरथंप्रति॥५५॥ततोभीष्मंपुरस्कृत्यतवपुत्रोमहाबलः॥शरैर्वृतश्श्वेतसैन्येनप्रायाच्छल्यरथंप्रति
मृत्योरास्यमनुप्राप्तंमद्रराजममोचयत्॥ततोयुद्धंसमभवत्तुमुलंलोमहर्षणं॥५७॥तावकानांपरेषांचव्यतिषक्तरथद्विपं॥सौभद्रेभीमसेनेचसा
त्यकेचमहारथे॥कैकेयेचविराटेचधृष्टद्युम्नेचपार्षते॥एतेषुनरसिंहेषुचेदिमत्स्येषुचैवहि॥५८॥ववर्षशरवर्षाणिवृद्धःकुरुपितामहः॥इतिश्री
महाभारतेभीष्मपर्वणि०॥धृतराष्ट्रउवाच॥एवंश्वेतेमहेष्वासेप्राप्तेशल्यरथंप्रति॥कुरवःपांडवेयाश्चकिमकुर्वतसंजय॥१॥भीष्मःशांतनवःकिं
वातन्ममाचक्ष्वपृच्छतः॥संजयउ०॥राजञ्छतसहस्राणिततःक्षत्रियपुंगवाः॥२॥श्वेतंसेनापतिंशूराःपुरस्कृत्यमहारथाः॥राज्ञोबलंदर्शयंतस्तवपु
त्रस्यभारत॥३॥शिखंडिनंपुरस्कृत्यत्रातुमैच्छन्महारथाः॥अभ्यवर्तंतभीष्मस्यरथंहेमपरिष्कृतं॥४॥जिघांसंतोयुधांश्रेष्ठंतदासीत्तुमुलंमहत्
तत्तेहंसंप्रवक्ष्यामिमहावैशससमुद्भवं॥५॥तावकानांपरेषांचयथायुद्धमवर्तत॥तत्राकरोद्रथोपस्थान्शून्यान्शांतनवोबहून्॥प्राकृंतदुत्तमांगानि
शरैरर्कत्रयोत्तमैः॥शमाहरणोछ्रैरर्कमर्कतुल्यप्रतापवान्॥७॥तुदन्समंतात्समरेरविरुद्यन्यथातमः॥तेनाजौप्रेषिताराजन्शराःशत
सहस्रशः॥८॥क्षत्रिपांतकराःसंख्येमहावेगामहाबलाः॥पातयामासशूराणांशिरांसिशतशोरथी॥९॥राजकंटकसन्नद्धावीराविगत
॥ मस्तकाः॥रथांरथेषुसंसक्ताव्यदृश्यंतविशांपते॥१०॥ छ॥ छ॥ ॥

रथोरथोंपर्यवर्ततुरगस्तुतुरंगमं ॥ स्ववलंनिहितंवीरंलंवमानंसकार्मुकं ॥ ११ ॥ उदीर्णाश्चहयान्राजन्वहंतश्चततस्ततः ॥ वद्धखङ्गनिषंगाश्चविध्वस्तक
वचाहताः ॥ १२ ॥ शतशःपतिताभूमौवीरशय्यासुशेरते ॥ परस्परेणधावंतःपतिताःपुनरुत्थिताः ॥ १३ ॥ उत्थापचप्रधावंतोद्वंद्वयुद्धमुवाप्नुवन् ॥ पीडिताः
पुनरन्योन्यंलुंठतारसमूर्द्धनि ॥ १४ ॥ मत्तोगजःपर्यपतच्छतशोरथिनोहयाः सरथारथिनश्चापिविमृद्नंतःसमंततः ॥ १५ ॥ स्यंदनेन्यपतत्कश्चिन्निहतो
न्येनसायकैः ॥ युध्यमानस्यसंग्रामेकुर्वतःपौरुषंस्वकं ॥ १६ ॥ धनुःकूजितविज्ञानंतत्रासीत्तस्ययुध्यतां ॥ गात्रस्पर्शेचयोधानांव्यज्ञास्तपरपंथिनं ॥ १७ ॥
युध्यमानाःशरैराजन्संजिनीध्वजनीत्यगात् ॥ अन्योन्यंवाणसंशब्दोनाश्रूयतभटैःकृतः ॥ १८ ॥ शब्दायमानेसंग्रामेपटहेकर्णदारिणि ॥ युध्यमानस्य
संग्रामेकुर्वतःपौरुषंस्वकं ॥ १९ ॥ नाश्रौषीत्नामयुद्धेतुतुमुलेलोमहर्षणे ॥ पितास्वमौरसंपुत्रंनाभिजानीतकश्चनः ॥ २० ॥ चक्रेभग्नेयुगेचैवएकोधुर्योहयो
हतः ॥ आक्षिप्तःस्यंदनाद्वीरःससारःथिरजिह्मगैः ॥ विधुरेभिन्नचक्रेचरथेपिविक्रशीकृते ॥ तेनतेनस्मदृश्यंतेवांधवानांपरस्परं ॥ मोहतःशिरसाछिन्नोमर्मभि
र्निहतोहतः ॥ अहतःकोपिनैवासीद्भीष्मेनिघ्नतिशात्रवान् ॥ २३ ॥ श्वेतःकुरूणामकरोत्स्वयंतस्मिन्महाहवे ॥ राजपुत्रांस्ततोद्वारानवधीच्छतसंघशः ॥ २४ ॥
चिछेदरथिनांवाणैःशिरांसिशतसंघशः सांगदावाहवश्चैवधनूंषिचसमंततः ॥ २५ ॥ रथिनोरथचक्राश्चरथारोहारथोनिच ॥ कृद्वाणिचमहार्हाणि
पताकाश्चविशांपते ॥ २६ ॥ हयौघाश्चरथौघाश्चनरौघाश्चेतिभारत ॥ वारणाःरःशतशश्चैवहताःश्वेतेनभारत ॥ वयंश्वेतहयाक्रांताविहायरथमुत्तमं
अवसृतास्ततपश्चाद्यत्रपश्यामनेधुरे ॥ शरपातमपक्रम्यकुरवःकुरुनंदन ॥ भीष्मंशांतनवंयुद्धेस्थितायुद्धायदंशिताः ॥ ॥ राम ॥ राम ॥ राम ॥ राम राम ॥

अहीनोहीनसमयेभीष्मोस्माकंमहाहवे। एकस्तस्थौनरव्याघ्रोगिरिमेरुरिवाचलः॥३०॥ आददानंरणेप्राणान्सविताशिशिरात्यये॥ गभस्तिभिरिवादित्य
स्तस्थौहेममरीचिमान्॥३१॥ समुमोचमहेष्वासः शरसंघाननेकशः। निघ्नन्नमित्रान्समरेचक्रपाणिरिवासुरान्॥३२॥ तेवध्यमानाभीष्मेणप्रजहुस्तं
महाहवे॥ स्वयूथादिवतेयूथान्मुक्ताग्निमिवदारुणाः॥३३॥ तमेकमुपलभ्येकोहृष्टःपुष्टःपरंतपः। दुर्योधनप्रियेयुक्तःपांडवान्सयशोपयन्॥३४॥ जी
वितेदुस्त्यजंत्यक्त्वाभयंचसमहाहवे। पातयामाससैन्यानिपांडवानांविशांपते॥३५॥ प्रहरंतमनीकानिपितादेवव्रतस्तव॥ दृष्ट्वासेनापतिंभीष्मोवेगे
नससमभ्ययात्॥३६॥ सभीष्मंशरजालेनमहतासमवाकिरत्॥ श्वेतंचापितथाभीष्मः शरौघैःसमवाकिरत्॥३७॥ तौहृष्टाविवनर्दंतौमत्ताविवमहाद्वि
पौ॥ व्याघ्राविवसुसंरब्धौअन्योन्यमभिजघ्नतुः॥३८॥ अस्त्रैरस्त्राणिसंवार्यततस्तौपुरुषर्षभौ॥ भीष्मःश्वेतश्चयुयुधेपरस्परवधैषिणौ॥३९॥ एकाह्ना
निर्दहद्भीष्मःपांडवानामनीकिनीं॥ शरैःपरमसंक्रुद्धःश्वेतोयदिनपालयेत्॥४०॥ पितामहंततोदृष्ट्वाश्वेतेनविमुखीकृतं॥ प्रहर्षंपांडवाजग्मुःपु
त्रस्तेविमनाह्यभूत्॥४१॥ ततोदुर्योधनोक्रुद्धःपार्थिवैःपरिवारितः॥ ससैन्यःपांडवानीकमभ्यद्रवतसंयुगे॥४२॥ श्वेतोगांगेयमुत्सृज्यतेवपुत्रस्य
वाहिनीं॥ नाशयामासवेगेनहस्तान्वायुरिवौजसा॥४३॥ द्रावयित्वाचमूंचैववैराटिःक्रोधमूर्छितः॥ आपतत्सुमहाराजायत्रभीष्मव्यवस्थितः
४४॥ तौतत्रापिगतौराजन्शरदीप्तौमहाबलौ॥ अयुध्येतांमहात्मानौयथावृत्रवासवौ॥४५॥ अन्योन्यंतुमहाराजपरस्परवधैषिणौ॥ निगृह्य
॥॥ कार्मुकंश्वेतोभीष्मंविव्याधसप्तभिः॥४६॥ ॥

1938

रथोरथोपर्यवर्तंतुरगस्तुरंगमं॥ स्वबलं निहितं वीरं लंबमानं सकार्मुकं॥ ११॥ उदीर्णाश्च हया राजन्वहंतश्चततस्ततः॥ बद्धखड्गनिषंगाश्च विध्वस्तक
वचाहताः॥ १२॥ शतशः पतिता भूमौ वीरशय्यासु शेरते॥ परस्परेण धावंतः पतिताः पुनरुत्थिताः॥ १३॥ उत्थाय च प्रधावंतो द्वंद्वयुद्धमुपाप्नुवन्॥ पीडिताः
पुनरन्योन्यं लुंठतार समूर्द्धनि॥ १४॥ मत्तो गजः पर्यपतच्छूरशोरथिनो हयाः सरथा रथिनश्चापि विमृद्नंतः समंततः॥ १५॥ स्यंदनेनस्यपत्कश्चिन्निहतो
न्येन सायकैः॥ युध्यमानस्य संग्रामे कुर्वतः पौरुषं स्वकं॥ १६॥ धनुः कूजितविज्ञानं तत्रासीत्तस्य युध्यतां॥ गात्रस्पर्शैश्च योधानां व्यज्ञासपरपंथिनं॥ १७॥
युध्यमाना शरै राजन्संजिनीध्वजनीत्यगात्॥ अन्योन्यं वारणसंशब्दो नाश्रूयत भटैः कृतः॥ १८॥ शब्दायमाने संग्रामे पटहे कर्णहारिणि॥ युध्यमानस्य
संग्रामे कुर्वतः पौरुषं स्वकं॥ १९॥ नाश्रौषीत्नाम युद्धे तु तुमुले लोमहर्षणे॥ पिता स्वमौरसं पुत्रं नाभिजानीत कश्चन॥ २०॥ चक्रे भग्नं युगं चैव एको धुर्यो हयो
हतः॥ आक्षिप्तः स्यंदनाद्वीरः ससारः थिरजिह्मगैः॥ विधुरे भिन्नचक्रे च रथेपि विक्रशीकृते॥ तेन तेन स्म दृश्यंते बांधवानां परस्परं॥ सोहतः शिरसाछिन्नो मर्मभि
र्निहतो हतः॥ अहतः कोपि नैवासीद्रीष्मे निघ्नति शात्रवान्॥ २३॥ श्वेतः कुरूणामकरोत्स्वयं तस्मिन्महाहवे॥ राजपुत्रांस्ततो द्वारानवधीच्छतसंघशः॥ २४॥
चिछेद रथिनां बाणैः शिरांसि शतसंघशः सांगदावाहवश्चैव धनूंषि च समंततः॥ २५॥ रथिनो रथचक्राश्च रथारोहा रथो नि च॥ स्कं द्वाणि च महार्होणि
पताकाश्च विशांपते॥ २६॥ हयौघाश्च रथौघाश्च नरौघाश्चैव भारत॥ वारणाः रः शतशश्चैव हताः श्वेतेन भारत॥ वयं श्वेतहया द्भ्रांता विहाय रथमुत्तमं
अवसृतास्ततपश्चाद्य त्रपश्याम तेधुरे॥ शरपातमपक्रम्य कुरवः कुरुनंदन॥ भीष्मं शांतनवं युद्धे स्थिता युद्धाय दंशिताः॥ ॥ ॥राम॥ राम॥ राम॥ राम राम॥

RYA SAMAJ
1938

अहीनोहीनसमयेभीष्मोस्माकंमहाहवे। एकस्तस्थौनरव्याघ्रोगिरिमेरुरिवाचलः।।३०।। आददानंरोप्राणान्सविताशिशिरात्यये।। गभस्तिभिरिवादित्य
स्तस्थौहेममरीचिमान्।।३१।। समुमोचमहेष्वासः शरसंघाननेकशः। निघ्नन्नमित्रान्समरेवज्रपाणिरिवासुरान्।।३२।। नेवध्यमानाभीष्मेणाग्रजकुलं
महाहवे।। स्वयूथादिवतेयूथान्मुक्ताग्निमिवदारुणां।।३३।। तमेकमुपलभ्यैकोहृष्टः पुष्टः परंतपः दुर्योधनप्रियेयुक्तः पांडवान्सयशोपयन्।।३४।। जी
वितेदुस्त्यिजितंत्यक्ताभयंचसमहाहवे। पातयामाससैन्यानिपांडवानांविशांपते।।३५।। प्रहरंतमनीकानिपितादेवव्रतस्तव।। दृष्ट्वासेनापतिंभीष्मोवेगे
नससमन्वयात्।।३६।। सभीष्मंशरजालेनमहतासमवाकिरत्।। श्वेतंचापितथाभीष्मः शरौघैःसमवाकिरत्।।३७।। तौहृष्टाविवनर्दंतौमत्ताविवमहाद्वि
पौ। व्याघ्राविवसुसंरब्धौअन्योन्यमभिजघ्नतुः।।३८।। अस्त्रैरस्त्राणिसंवार्यततस्तौपुरुषर्षभौ।। भीष्मःश्वेतश्चयुयुधेपरस्परवधैषिणौ।।३९।। एकाह्ना
निर्दहेद्भीष्मः पांडवानामनीकिनीं।। शरैः परमसंक्रुद्धः श्वेतोयदिनपालयेत्।।४०।। पितामहंततोदृष्ट्वाश्वेतेनविमुखीकृतं।। प्रहर्षंपांडवाजग्मुःपु
त्रस्तेविमनाह्यभूत्।।४१।। ततोदुर्योधनोक्रुद्धःपार्थिवैः परिवारितः।। ससैन्यः पांडवानीकमभ्यद्रवतसंयुगे।।४२।। श्वेतोगांगेयमुत्सृज्यतवपुत्रस्य
वाहिनीं।। नाशयामासवेगेनवृक्षान्वायुरिवौजसा।।४३।। द्रावयित्वाचमूंचैवविराटिः क्रोधमूर्छितः।। आपतत्सुमहाराजायत्रभीष्मोव्यवस्थितः
४४।। तौतत्रापिगतौराजन्शरदीप्तौमहाबलौ।। अयुध्येतांमहात्मानौयथावाहत्रवासवौ।।४५।। अन्योन्यंतुमहाराजपरस्परवधैषिणौ।। निगृह्य
।। ।। कार्मुकंश्वेतोभीष्मस्यविव्याधसप्तभिः।।४६।। ।।

॥भा०भी०॥ पराक्रमंततस्तस्यपराक्रम्यपराक्रमी॥ तरयापारयामाससमतोमत्तमिवद्विपं॥४७॥आजघानततोभीष्मंश्वेतः क्षत्रियनंदनः॥ तंप्रत्यविध्यद्दशभि
॥१६८॥ र्भीष्मः शांतनवस्तथा॥४८॥सविद्धस्तेनवलवान्सुमोहनममारह॥प्रहस्यरभसोश्वेतः सृक्किणीपरिसंलिहन्॥४९॥ततोदुर्योधनः क्रोधात्स्वम
नीकमचोदयत्॥पुलाद्भीष्मंपरिरक्षध्वंरक्षमाणाःसमंततः॥५०॥तान्वेपपश्यमानांस्तान्श्वेतोस्त्रमथवाप्यनि॥भीष्मः शांतनवः शूरस्तथास
त्यंब्रवीमिते॥५१॥राज्ञस्तुवचनंश्रुत्वात्वरमाणामहारथाः॥वलेनचतुरंगेणगांगेयमनुपालयन्॥५२॥वाल्हीकः कृतवर्माचकृपः शल्यश्चभा
रत॥जरासंधिर्विकर्णश्चचित्रसेनोविविंशतिः॥५३॥त्वरमाणास्त्वराकालेपरिवार्यसमंततः॥शस्त्रवृष्टिंसुवकुलांश्वेतस्योपर्यपातयन्॥५४॥
तान्क्रुद्धान्निशितैर्वाणैस्त्वरमाणोमहावलः॥ अवारयदमेयात्मादर्शयन्पाणिलाघवं॥५५॥सनिर्वार्यहितान्सर्वान्केसरीकुंजरानिव
महताशरवर्षेणभीष्मस्यधनुराछिनत्॥५६॥ततोन्यद्धनुरादायभीष्मः शांतनवोयुधि॥श्वेतंविव्याधराजेंद्रकंकपत्रैः शिलीमुखैः॥५७॥ततः
सेनापतिः क्रुद्धोभीष्मंवहुभिरायसैः॥विव्याधसमरेराजन्सर्वलोकस्यपश्यतः॥५८॥ततःप्रव्यथितोराजाभीष्मंदृष्ट्वानिवारितं॥६०॥प्रवीरं
सर्वलोकस्यश्वेतेनयुधिवेतदा॥५९॥निष्टानकश्चसुमहांस्तवसैन्यस्यचाभवत्तंवीरंत्वरितंदृष्ट्वाश्वेतेनशरविक्षतं॥६०॥हतंश्वेतेनमन्यं
हतंश्वेतंस्यवशमागतं॥ततः क्रोधवशंप्राप्तः पितादेवव्रतस्तव॥६१॥ध्वजमुन्मथितंदृष्ट्वातांचसेनांनिवारितां॥श्वेतंप्रतिमहाराजव्यसृजत्सा ॥राम॥
यकान्वहून्॥६२॥तानावार्यरणेश्वेतोभीष्मस्यरथिनांवरः धनुश्छिछेदभल्लेनपुनरेवपितुस्तव॥६३॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥ ॥१६८॥

उत्सृज्यकार्मुकंराजन्गांगेयःक्रोधमूर्छितः॥ अन्यत्कार्मुकमादायविपुलंबलवत्तरं॥६४॥ तत्रसंधायविपुलान्भल्लान्सप्तशिलाशितान्॥ चतुर्भिश्चतु
रांश्चाश्वश्वेतस्यपृतनापते॥६५॥ ध्वजंद्वाभ्यांचचिच्छेदसप्तमेनचसारथेः॥ शिरश्छिच्छेदभल्लेनसंक्रुद्धोलघुविक्रमः॥६६॥ हताश्वसूतात्सरथादव
प्लुत्यमहारथा॥ अमर्षवशमापन्नोव्याकुलःसमपद्यत॥६७॥ विरथंरथिनांश्रेष्ठंश्वेतंदृष्ट्वापितामहः॥ ताडयामासनिशितैःशरसंघैःसमंततः॥६८॥
सताड्यमानाःसमरेभीष्मचापच्युतैःशरैः॥ स्वरथेधनुरुत्सृज्यशक्तिंजग्राहकांचनीं॥६९॥ ततःशक्तिंरणेघोरांग्रहीत्वोग्रांमहाभयांकालदंडोप
मांघोरांमृत्योश्चशमनक्षमां॥७०॥ अब्रवीच्चतदाश्वेतोभीष्मंशांतनवंरणे तिष्ठेदानींसुसंरब्धःपश्यमांपुरुषोत्तम॥७१॥ एवमुक्त्वामहेष्वासो
भीष्मंयुधिपराक्रमी॥ ततःशक्तिममेयात्माविक्षेपभुजगोपमां॥७२॥ पांडवार्थेपराक्रांतस्त्वावानर्थेचिकीर्षसि॥ हाहाकारोमहानासीत्पुत्राणांते
विशांपते॥७३॥ दृष्ट्वाशक्तिंमहाघोरांमृत्योर्दंडसमप्रभां॥ अपतत्सहसाराजन्महोल्केवनभस्तलात्॥७४॥ ज्वलंतीमंतरिक्षेतांज्वालाभिरिवसंवृ
तांसुसंभ्रांतस्तदाराजन्पितादेवव्रतस्तव॥७५॥ अष्टभिर्नवधाभीष्मःशक्तिंचिच्छेदपत्रिभिः॥ उत्कृष्टहेमविकृतांनिकृत्तांनिशितैःशरैः॥७६॥ उच्चु
क्रुशुस्ततःसर्वेतावकाभरतर्षभ॥ शक्तिंविनिहतांदृष्ट्वाश्वेतःक्रोधमूर्छितः॥७७॥ कालोपहतचेतास्तुकर्तव्यंनाभ्यजानत॥ क्रोधसंमूर्छितोराज
न्वैराटिःप्रहसन्निव॥७८॥ गदांजग्राहसंहृष्टोभीष्मस्यनिधनंगतः॥ क्रोधसंरक्तनयनोदंडपाणिरिवापरः॥७९॥ भीष्मंसमभिदुद्रावजलौघ

॥ द्रवपर्वतं॥ ८०॥ ॥

॥भा० भी०॥ ॥१६९॥

तस्यवेगमसंवाधंमत्वाभीष्मः प्रतापवान्॥८०॥प्रभावविन्प्रमोक्षार्थंसहसाधरणींगतः॥श्वेतः क्रोधवशात्प्राजन्भ्रामयित्वामहागदां॥८१॥रथेभीष्म
स्यचिक्षेपयथादेवोमहेश्वरः॥तयाभीमनिपातिन्यासरथोभस्मसात्कृतः॥८२॥सध्वजःसहसूतेनसाश्वःसहयुगंधरः॥विरथंरथिनांश्रेष्ठंश्वेतंदृष्ट्वा
पदातिनं॥८३॥अभ्यधावंतसहसाशल्यप्रभृतयोरथाः॥ततोन्यंरथमास्थायधनुर्विस्फार्यदुर्मनाः॥८४॥शनकैरभ्ययाच्छ्वेतंभीष्मोदृष्ट्वारथोत्त
मः एतस्मिन्नंतरेभीष्मः॥शुश्रावविपुलांगिरं॥८५॥आकाशोदीरितांदिव्यामात्मनोहितसंश्रयां॥भीष्मभीष्ममहाबाहोशीघ्रंयत्नंकुरुष्ववै॥८६॥
एषह्यस्यजयेकालोनिर्दिष्टोविश्वयोनिना एतच्छ्रुत्वातुवचनंदेवदूतेनभाषितं॥८७॥संप्रहृष्टमनाभूत्वावधेतस्यमनोदधे॥विरथंरथिनांश्रेष्ठं
श्वेतंदृष्ट्वापदातिनं॥८८॥सहितास्तुन्यवर्तंतपरीप्संतोमहारथाः॥सात्यकिभीमसेनश्चधृष्टद्युम्नश्चपार्षतः॥८९॥कैकेयाधृष्टकेतुश्चअभि
मन्युश्चवीर्यवान्॥एतानापततोदृष्ट्वाद्रोणशल्यकृपैःसह॥९०॥अवारयदमेयात्मावातवेगानिवाचलः॥संनिरुद्धेषुसर्वेषुपांडवेषुमहात्मसु
श्वेतःखड्गमथाकृष्यभीष्मस्यधनुराक्षिपत्॥तदपास्यधनुश्छिन्नंत्वरमाणःपितामहः॥९२॥देवदूतवचःश्रुत्वावधेतस्यमनोदधे॥ततःप्रवेपि
मारास्तुपितादेवव्रतस्तव॥९३॥अन्यत्कार्मुकमादायत्वरमाणोमहारथः॥क्षणेनसज्यमकरोच्छक्रचापसमप्रभं॥पितातेभरतश्रेष्ठश्वेतंदृष्ट्वा
महारथं॥हतंतुतैर्नरव्याघ्रैर्भीमसेनपुरोगमैः॥अभ्यवर्तंतगांगेयंश्वेतंसेनापतिंकृते॥आपतंतंततोभीष्मंभीमसेनःप्रतापवान्॥९६॥आज
घ्नेविविधश्चित्रैःषष्ट्यासेनान्यंचमहारथं॥अभिमन्युंचसमरेपितातेदेवव्रतस्तव॥९७॥ छ॥ छ॥ छ॥ छ॥ छ॥ ॥

॥राम॥ ॥१६९॥

वारयित्वा शरैर्घोरैरस्मानपि महारथान्॥ आजघ्ने भरतश्रेष्ठस्त्रिभिः सन्नतपर्वभिः॥ ९८॥ सात्यकिं च शतेनाजौ भारतानां पितामह॥ धृष्टद्युम्नं च विंशत्या केकेयं चा
पि पंचभिः॥ ९९॥ तांश्च सर्वान्महेष्वासान् पिता देवव्रतस्तव॥ वारयित्वा शरैर्घोरैः श्वेतमभ्याभिदुद्रुवे॥ १००॥ ततः शरं मृत्युसमं भारसाधनमुत्तमं॥ विकृष्य बल
वान्भीष्मः समधत्त दुरासदं॥ १०१॥ ब्रह्मास्त्रेण सुसंयुक्तं तं शरं लोमवाहिनं॥ ददृशुर्देवगंधर्वाः पिशाचोरगराक्षसाः॥ २॥ ततस्य कवचं भित्वा ज्वलदग्निसमोज
सं॥ जगाम धरणीं वाणो महाशनिरिव ज्वलन्॥ १०३॥ अस्तं गच्छन्यथादित्यः प्रभामादाय सत्वरः॥ एवं जीवितमादाय श्वेतदेहाज्जगाम सः॥ १०४॥ तं भीष्मेण
नरव्याघ्रं तथा विनिहितं युधि॥ प्रपतंतमपश्याम गिरेः शृंगमिव च्युतं॥ १०५॥ अशोचन्पांडवाः सर्वे क्षत्रियाये महारथाः॥ प्रहृष्टाश्च सुताः सर्वे कुरवश्चापि सर्व
शः॥ १०६॥ ततो दुःशासनो राजन् श्वेतं दृष्ट्वा निपातितं॥ वादित्रनिनदैर्घोरैर्नृत्यति स्म समंततः॥ १०७॥ तस्मिन्हते महेष्वासे भीष्मेणाहवशोभिना॥ प्रावेपंत
महेष्वासाः शिखंडिप्रमुखा रथाः॥ १०८॥ ततो धनंजयो राजन् वार्ष्णेयश्चापि सर्वशः॥ अवहारं शनैश्चक्रुर्निहते वाहिनीपतौ॥ १०९॥ ततो वहारं सैन्यानां
तव तेषां च भारत॥ तावकानां परेषां च नदतां च मुहुर्मुहुः॥ ११०॥ पार्थो विमनसो भूत्वा प्रविशंत महारथाः॥ चिंतयंतो वधं घोरं द्वैरथेन परंतप॥ १११॥ इति
श्रीमहाभारते भीष्मपर्वणि ०॥ धृतराष्ट्र उ०॥ श्वेते सेनापतौ तात संग्रामे निहते परैः॥ किमकुर्वन्महेष्वासाः पांचालाः पांडवैः सह॥ १॥ सेनापतिं महात्मा
चापि महेष्वासः पार्षतो वाहिनीपतिः॥ भीमसेनश्च समरे पालयिष्यति वो ध्रुवं॥ २१॥ मा वो रक्षिद्भयं किंचिद्रणे च युधिसंजयाः॥ ध्रुवं भीष्मं
विजेष्यामः पुरस्कृत्य शिखंडिनं॥ २०॥ ते तथा समयं कृत्वा दशमेहनि पां॥ दुवा॥ ब्रह्मलोकपराभूत्वा संजग्मुः क्रोधमूर्छिताः॥ शिखंडिनं पुरस्कृ
त्य पांडवं च धनंजयं॥ भीष्मस्य पातने यत्नं परमं ते। समास्थिताः॥ २२॥ ततस्तव सुता दिष्टा नाना जनपदेश्वराः॥ द्रोणेन सहपुत्रेण सहसे
नो महाबलः॥ २३॥ दुःशासनश्च वलवान्सह सर्वैः सहोदरैः॥ भीष्मं समरमध्यस्थं पांचपांच क्रिरेतदा॥ २४॥ ततस्तु तावकाः शूराः पुरस्कृ
त्य महाव्रतं॥ शिखंडिप्रमुखान्पार्थान्योधयंति स्म संयुगे॥ चेदिभिस्तु सपांचालैः सहितो वानरध्वजः॥ ययौ शांतनवं भीष्मं पुरस्कृत्य ॥राम॥
शिखंडिनं॥ २६॥ द्रोणपुत्रं शिनेर्नप्ता धृष्टकेतुस्तु कौरवं॥ अभिमन्युः सहामात्यं दुर्योधनमयोधयत्॥ २७॥ विराटस्तु सहानीकः सहसेनं जयद्र ॥२६७॥
थं॥ वार्धक्षेमिस्तु दायाद्मासाद परंतप मद्रराजं महेष्वासं सह सैन्यं युधिष्ठिरः॥ भीमसेनोभिगुप्तस्तु॥ ॥ ॥

तथैवतावकाः सर्वेपुरस्कृत्यपतव्रतं ॥ शिखंडिप्रमुखान्पार्थान्नयोधयं तिस्मसंयुगे ॥ ३९ ॥ ततः प्रवृत्तेयुधं कौरवाणांभयावहं ॥ तत्रपांडुसुतै
सार्धंभीष्मस्य विजयंप्रति ॥ ४० ॥ तावकानांजयेभीष्मो ग्लह आसीद्विशांपते ॥ तत्रहिद्युतमासक्तं विजयायेतरायच ॥ धृष्टद्युम्नस्तुराजेंद्र सर्वसै
न्यान्यचोदयत ॥ अभिद्रवत गांगेयंमाभैष्टरथसत्तमा ॥ ४२ ॥ सेनापतिवचः श्रुत्वा पांडवानांवरूथिनी ॥ भीमंसमभ्ययात्तूर्णंप्राणांस्त्यक्त्वामहाहवे भी
ष्मोपिरथिनांश्रेष्ठः प्रतिजग्राहतांचमूं ॥ आपतंतींमहाराज वेलामिवमहोदधिः ॥ इतिभीष्मपर्वसमाप्तं० ॥ धृतराष्ट्रउवाच ॥ कथंशांतनवोभी
ष्मोदशमेहनिसंजयः ॥ अयुध्यतमहावीर्यैः पांडवैः सहसृंजयैः ॥ कुरवश्च कथंयुद्धे पांडवान्प्रत्यवारयन् ॥ आचक्ष्वमेमहायुद्धं भीष्मस्याहवशो
भिनः ॥ २ ॥ संजयउवाच ॥ कुरवः पांडवैर्युद्धंयदयुध्यंतभारत ॥ यथाचतदभूद्युधंतत्तेवक्ष्यामिसांप्रतं ॥ ३ ॥ गमिताः परलोकायपरमास्त्रैः किरी
टिना ॥ अहन्यहनिसंक्रुद्धास्तावकानांमहारथाः ॥ ४ ॥ यथाप्रतिज्ञंकौरव्यः सचापिसमितिंजयः ॥ पार्थानामकरोद्भीष्मः सततंसमितिक्षयं ॥ ५ ॥
कुरुभिः सहितंभीष्मंयुध्यमानंपरंतप ॥ अर्जुनंचसपांचाल्यं संशयोविजयेभवेत् ॥ ६ ॥ दशमेहनितस्मिंस्तु भीष्मार्जुनसमागमे ॥ आवर्ततमहा
रौद्रः सततंसमितिक्षयः ॥ ७ ॥ तस्मिन्नयुतशोराजन् भूयश्चसपरंतप ॥ भीष्मः शांतनवोयोधान् जघानपरमास्त्रवित् ॥ ८ ॥ येषामज्ञातकल्पानि नामगोत्राणि
भारत तेहतास्तत्रभीष्मेणशूरास्सर्वेऽनिवर्तिनः ॥ ९ ॥ दशाहानिततस्तप्त्वाभीष्मः पांडववाहिनीं ॥ निरविद्यतधर्मात्माजीवितेनपरंतप ॥ सक्षि
प्रंवधमन्विच्छन्नात्मनोऽभिमुखोरणे ॥ नहन्यांमानवश्रेष्ठान्संग्रामेषुबहूनिति ॥ ११ ॥ चिंतयित्वामहाबाहुः पितादेवव्रतस्तव ॥ ॥ छ ॥

धनंजयरथेनूर्णंयांतं तिस्म भूमिपाः ॥ २१ ॥ ततस्तां भ्रूकुरजालेन सलिलार्घमहारथान् । पार्थः समंतात्समरे प्रेषयामसमृत्यवे ॥ २२ ॥
पांचालस्तु समरे जिष्णुं त्रींच्छिमाल्लिव भारत ॥ अजघानेत्तरसि क्रुधो भीम ॥ सर्वांन्तपर्वभिः ॥ तस्य पार्थो धनुश्छित्त्वा हस्तावायं च पंचभिः ॥ अथैनं
सात्यके स्त्री पृष्णो भूर्सि विव्याध मर्मणि ॥ अथान्य धनुरादाय समरे त्यारसा धनं मद्रेश्वरे रोजिह्मग तांजघामासते षित ॥ २५ ॥ त्रिभिः पौरवे
हाराज वासुदेवं च पंचभि ॥ भीमसेनं च नवभिर्बाहोरुरसि चार्पयत ॥ ततोंद्रोणो महाराज मागधश्च महारथ ॥ दुर्योधनसमादिष्टौ तंदेशमु
पजग्मतुः ॥ २७ ॥ तत्र पार्थो महाराज भीमसेनश्च पंडितः ॥ कौरव्यस्य महासेनां जघ्नतुः सुमहारथौ ॥ २८ ॥ जयत्सेनस्तु समरे भीमं भी
मायुधं युधि ॥ विव्याध निसतैर्बाणैरष्टभिर्भरतर्षभः ॥ २९ ॥ तं भीमो दृष्टा भीर्विध्वा पुनर्विव्याध पत्नतः ॥ सारथिं चास्य भल्लेन रथ्यनीके
दृपातयत ॥ ३० ॥ उद्भ्रांतैस्तु रंगैः सो धंद्रवमाणैः समंततः ॥ मागधोपस्रुतो राजा सर्वसैन्यस्य पश्यतः ॥ ३१ ॥ द्रोणश्च विवरं दृष्ट्वा भीमसेनं शिलीमु
खैः ॥ विव्याध वाणैर्निशितैरष्टभिर्भरतर्षभ ॥ ३२ ॥ तं भीमः समरश्लाघी गुरुं पितृसमं रणे ॥ विव्याध पंचभिर्भल्लैः सप्तत्या च भारत ॥ ३३ ॥ अ
र्जुनस्तु सुसर्माणं विव्या बहुभिर्भरतर्षभः ॥ तं भीमसस्यतत्सैन्यं महाभ्राणि यथानलः ॥ ततो भीष्मश्च राजा च कौसल्यश्च बृहद्बलः ॥ समवर्तंतसं
क्रुधा भीमसेन धनंजयौ ॥ ३५ ॥ तथैव पांडवाः सुरा धृष्टद्युम्नश्च पार्षतः ॥ अभ्यद्रवन्रणे भीष्मं व्यादितास्यमिवांतकं शिखंडिनं समासा ॥ राम ॥
घ भारतानां पितामहं ॥ अभ्यद्रवत संहृष्टो भयं मुक्त्वा महाव्रतं ॥ ३७ ॥ युधिष्ठिरमुखा पार्थाः पुरस्कृत्य शिखंडिनं ॥ अयोधयन्रणे भीष्मं ॥ २६६ ॥
सहिताः सर्वसृंजयैः ॥

एकैकं त्रिभिरानर्छ त्वंकं कवर्हिणवाजितैः ॥ शरैरतिरथो युधि पीज्यत्नवाहिनीं नव ॥४॥ जयद्रथोरणो यार्थं विव्याधारत्तसायकैः ॥ भीमं विव्याध
त्रसप्ताचित्रसेनोरथे स्थितः ॥५॥ शल्यश्च समरे जिष्णुं कृपश्च रथिनां वरः ॥ विव्याधातो महाराज बहुधा मर्मभेदिभिः ॥६॥ चित्रसेनादयश्चैव पुत्र
स्तव विसांपते ॥ पंचभिः पंचभिस्तूर्णं संयुगे निशितैः शरैः ॥७॥ आजघ्नुरर्जुनं संख्ये भीमसेनं च मारिष ॥ तौ तत्र रथिनां श्रेष्ठौ कौंतेयौ भरतर्ष
भौ ॥८॥ अपीडयेतां समरे त्रिगर्तानां महाबलं ॥ सुशर्मा विंशत्या पार्थं बाणैर्नवभिराशुगैः ॥९॥ ननाद बलवान्नादं त्रासयानो महद्बलं ॥ अन्ये च रथि
नः शूरा भीमसेनधनंजयौ ॥१०॥ विव्यधुर्निशितैर्बाणै रुक्मपुंखैरजिह्मगैः ॥ तेषां च रथिनां शूरा भीमसेनधनंजयौ ॥११॥ क्रीडमानौ रथोदारौ चित्ररू
पैष्ववस्थितौ ॥ आमिषेप्सुर्गवां मध्ये सिंहाविव मदोत्कटौ ॥१२॥ छित्वा धनूंषि शूराणां शरांश्च बहुधा रणे ॥ पातयामासतुर्वीरौ शिरांसि शत
सोरथा ॥१३॥ हताश्च बहवो भग्ना हयाश्च शतशो हताः ॥ गजाश्च समजारोहाः पेतुरुर्व्यां महाहवे ॥१४॥ रथिनः सादिनश्चैव तत्र तत्र निषूदिताः
दृश्यंते बहवो राजन्वेपमानाः समंततः ॥१५॥ हतैर्गजैः पदातौघैर्वाजिभिश्च निसूदितैः ॥ रथैश्च बहुधा भग्नैः समास्तीर्यत मेदनी ॥१६॥ तत्राद्भुतम
पश्याम रणे पार्थस्य विक्रमं ॥ शरैः संवार्य तान्वीरान्सजघान महाबलः ॥१७॥ एत्रस्त नवतेद्दष्ट्वा भीमार्जुनपराक्रमौ ॥ गांगेयस्य रथाभ्याश
मुपजग्मुर्महाबलाः ॥ कृपश्च कृतवर्मा च सैंधवश्च जयद्रथः ॥ विंदानुविंदावावंत्यौ नाजहुः संयुगं तदा ततो भीमो महेष्वासः फाल्गुनश्च महा
रथः ॥ कौरवाणां चमूं घोरां भृशं दुद्रुवतू रणे ॥ ततो बर्हिणवाजानामयुतान्यर्बुदानि च ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰भी॰ तस्य सक्तिं महावेगां भगदत्तो महासुरः ॥ विच्छेद समरे वीरः स्वर्णदंडां महामते ॥ ३९ ॥ तोमरं सैंधवो राजा पट्टिशं च महाभुजः ॥ शतघ्नीं च कृपो
२६५ क्रपो राजञ्छरं शल्यश्च संयुगे ॥ अथेतरे महेष्वासाः पंच पंच शिलीमुखान् ॥ भीमसेनं समुद्दिश्य प्रेषयामासुरोजसा ॥ ४० ॥ तोमरं च द्विधा चक्रे क्षुरप्रा
क्षुरप्रेणानिलात्मजः ॥ स पट्टिशं च त्रिभिर्बाणैश्चिच्छेद तिलकांडवत् ॥ ४१ ॥ स विभेद शतघ्नीं च नवभिः ॥ कंकपत्रिभिः भीमसेनो रणश्लाघी छित्वैकं
समाच्छिनत् ॥ तांश्च सर्वान्महेष्वासांस्त्रिभिस्त्रिभिरताडयत् ॥ ततो धनंजयस्तत्र वर्तमाने महारणे ॥ आजगाम रथेनाजौ भीमं दृष्ट्वा महारथे निघ्नंतं सम
रे योधान्मानं च सायकैः ॥ तौ तु तत्र महात्मानौ समेतौ वीक्ष्य पांडवौ ॥ नाशशंसुर्जयं तत्र तावकाः पुरुषर्षभा ॥ अथार्जुनो रणे भीष्मं योधयंतं महारथान्
॥ ४२ ॥ भीष्मस्य निधनाकांक्षी पुरस्कृत्य शिखंडिनं ॥ आससाद रणे वीरस्तावकान्दश भारत ॥ ये स्म भीमं रणे राजन्योधयंतो व्यवस्थिताः ॥ बीभत्सुस्ता
न्याविध्यद्भीष्मस्य प्रियकाम्यया ॥ ततो दुर्योधनो राजा सुशर्माणमचोदयत् ॥ अर्जुनस्य वधार्थाय भीमसेनस्य चोभयोः ॥ ५० ॥ सुसुर्मन्नराक्षसी
नराक्षसी त्वं च बलौघैः परिवारितः ॥ जहि पांडुसुतावेतौ धनंजयवृकोदरौ ॥ तच्छ्रुत्वा वचनं तस्य त्रैगर्तः प्रस्थलाधिपः ॥ अभिद्रुत्य रणे भीममर्जु
नं चैव धन्विनौ ॥ ५२ ॥ रथैरनेकसाहस्रैः समंतात्पर्यवारयत् ॥ ततः प्रववृते युद्धमर्जुनस्य परैः सह ॥ ५३ ॥ इति श्री महाभारते भीष्मपर्वणि ११० ॥ संजय उवाच
अर्जुनस्तु रणे शल्यं यतमानं महारथे ॥ छादयामास समरे शरैः सन्नतपर्वभिः ॥ १ ॥ सुशर्माणं कृपं चैव त्रिभिस्त्रिभिरविध्यत ॥ प्राग्ज्योतिषं च समरे सैंधवं ।
धवं च जयद्रथं ॥ २ ॥ चित्रसेनं विकर्णं च कृतवर्माणमेव च ॥ दुर्मर्षणं च राजेंद्र आवंत्यौ च महारथौ ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम
२६५

तद्दानममषेशाल्यो भीमसेनस्य विक्रमं संसाधशरांस्तीक्ष्णान्कर्मारपरिमार्जितान् २१ भीमं विव्याधसमरे तिष्ठ तिष्ठेति चाब्रवीत् कृपश्च कृ
तवर्मा च भगदत्तश्च वीर्यवान् ॥ २२ ॥ विंदानुविंदावावंत्यौ चित्रसेनश्च संयुगे ॥ दुर्मर्षणो विकर्णश्च सिंधुराजश्च वीर्यवान् भीमं ते विव्यधुस्तूर्णं
शाल्यहेतोररिंदमाः सचतान्प्रतिविव्याधपंचभिः सप्तभिः शरैः ॥ २४ ॥ शाल्यं विव्याधसप्तत्यापुनश्च दशभिः शरैः ॥ तं शल्यो नवभिर्भित्त्वा पुनर्विव्याधपंचभिः
धयंचभिः ॥ २५ ॥ सारथिं चास्य भल्लेन गाढं विव्याध मर्मणि ॥ विशोकं प्रेक्ष्य निर्भिन्नं भीमसेनः प्रतापवान् ॥ २६ ॥ मद्रराजं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् त
थेतरान्महेष्वासांस्त्रिभिस्त्रिभिरजिह्मगैः ॥ ताडयामाससमरे सिंहवच्च ननाद च ॥ ते हि यत्ता महेष्वासाः पांडवं युधकोविदं ॥ त्रिभिस्त्रिभिरकुंठा
ग्रैर्भृशं मर्मस्वताडयन् ॥ सोतिविद्धो महेष्वासो भीमसेनो न विव्यथे ॥ २८ ॥ पर्वतो वारिधाराभिर्वर्षमाणैरिवांबुदैः ॥ स तु संक्रोधसमाविष्टः पांडवा
नां महारथः ॥ मद्रेश्वरं त्रिभिर्बाणैर्भृशं विव्याध महायशाः ॥ प्राग्ज्योतिषं शतेराजन विव्याधसायकैः ततः स सर्वाशसं सात्वतस्य महात्मनः क्षु
रप्रेण सुसंतीक्ष्णेन चिच्छेद कृतहस्तवत् ॥ ३२ ॥ तथान्यधनुरादाय कृतवर्मा वृकोदरः ॥ स्वायश्च जघान भ्रुवोर्मध्ये नाराचेन परंतप ३३ ॥ भीमस्तु स
मरे विद्ध्वा शल्यं नवभिरायसैः ॥ भगदत्तं त्रिभिश्चैव कृतवर्माणमष्टभिः ॥ ३४ ॥ द्वाभ्यां द्वाभ्यां तु विव्याध गौतमप्रभृतीन्रथान् ॥ तेपितं समरे रा
जन् विव्यधुर्निशितैः शरैः ॥ स तथापीड्यमानोपि सर्वतस्तैर्महारथैः ॥ मत्वा तृणेन तांस्तुल्यान्विचचार गतव्यथः ॥ ३६ ॥ ते चापि रथिनां
श्रेष्ठा भीष्माय निशितान्छराजन् ॥ प्रेषयामासुराशुगान् शतशोथ सहस्रशः ॥ ३७ ॥

भा॰ भी॰ ॥
२६४

सैंधवश्चत्रिभिर्विद्धो भीमसेनेन मत्तवत् ॥ विंदानुविंदावावंत्यौ पंचभिः पंचभिः शरैः ॥ दुर्मर्षणस्तु विंशत्या पांडवानंनिशितैः शरैः ॥७॥ स
तान्सर्वान्महाराज राजमानान्पृथक्पृथक् ॥ प्रवरान्सर्वलोकस्य धार्तराष्ट्रान्महारथान् ॥८॥ जघान समरे वीरः पांडवः परवीरहा ॥ सप्तभिः स
ल्यमाविध्यत्कृतवर्माणमष्टभिः ॥९॥ कृतस्य शरासनं चापं मध्ये चिच्छेद भारत ॥ अथैनं छिन्नधन्वानं पुनर्विव्याध सप्तभिः ॥ विंदानुविंदौ च तथा त्रि
भिस्त्रिभिरताडयत् ॥ दुर्मर्षणं च विंशत्या चित्रसेनं पंचभिः ॥११॥ विकर्णं दशभिर्वाणैः पंचभिश्च जयद्रथं ॥ विद्ध्वा भीमो नदद्धृष्टः सैंधवं च पु
नस्त्रिभिः ॥ अथान्यद्धनुरादाय गौतमो रथिनां वरः ॥ भीमं विव्याध संरब्धो दशभिः निशितैः शरैः ॥ स विद्धो दशभिर्वाणैस्तोत्रैरिव महाधनु ॥ ततः क्रु
द्धो महाराज भीमसेनः प्रतापवान् ॥ गौतमं ताडयामास शरैर्बहुभिराहवे ॥ सात्वतस्य तथाश्वान्ससारथिं च त्रिभिः शरैः ॥१५॥ प्राहिणोन्मृत्युलो
काय कालांतकसमद्युतिः ॥ हताश्वात्तु रथात्तूर्णमवप्लुत्य महारथः ॥ स शरांश्चिक्षेप निशितान्भीमसेनस्य संयुगे ॥ तस्य भीमो धनुर्मध्ये द्वा
भ्यां चिच्छेद मारिष ॥१७॥ भगदत्तास्यामरसंप्रेषसैधवस्य महात्मनः ॥ स छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ चित्रसेनरथं राजन्नारुरो
ह त्वरान्वितः ॥ अद्भुतं रणे कर्म कृतवांस्तत्र पांडवः ॥१८॥ महारथाञ्छरैर्विद्ध्वा वारयित्वा च मारिष ॥ विरथं सैंधवं चक्रे सर्वलोकस्य पश्यतः

राम
२६४

प्रासाश्च विमलास्तीक्ष्णाः शस्त्रश्चनकोज्वलः॥ वैजयंति नगानां संक्रुधो न किरीटिना॥२९॥ सायं संराक्षितुं कालो प्राप्तागानसुत्रापजीविता॥ याहि स्वर्गं पुरस्कृत्य
यशामेव जयाय च॥ रथनागा गहयावर्तां महाघोरां सुदुस्तरां॥ रथेन संग्राममनंदीत्यात्येषकपिध्वजः॥३०॥ ब्राम्हणस्वनाद्मेदाना तपस्वश्च रितं महत् तस्मिंहे वदस्यते
पार्थो भ्राता यस्य धनंजयः॥ भीमसेनश्च बलवान् माद्रीपुत्रौ च पांडवौ॥ वासुदेवं च वाष्र्णेयो यस्य नाथो व्यवस्थितः॥ तस्मिन्येन मन्युप्रभवो धार्तराष्ट्रस्य दुर्मते ^
दुर्मतेः॥ मयेद्दग्धशरीरस्य कोपो भवति भारत॥३३॥ स एष सेदृश्यते पार्थो वासुदेव व्यपाश्रयः॥ वारयस्य वैसैर्वाणि धार्तराष्ट्र शिताः सर्वसः॥३४॥ तदा लोकरो
ते सैन्ये रसमासां शिवेङ्गिना महोर्मिन घं सुमत्तिमिनेत्रसमाकुलं॥३५॥ हाहा किल कला शब्दाः श्रूयंते च चमूमुखे॥ याहि पांचालदायादमहं यास्ये युधि
यास्ये युधिष्ठिरं॥ दुर्गमध्यंतरो राज्ञो व्यूहस्यामिततेजसः॥ समुद्रकुक्षिप्रतिमं सर्वेतो निरथैः स्थितैः॥३७॥ सात्यकिश्चाभिमन्युश्च धृष्टद्युम्न वृकोदरौ यमौ च
यंतराजानं यमौ च मनुजेश्वरं॥३८॥ उपेंद्रसदृशः श्यामो महासालश्वोद्गतः॥ एष गच्छत्यनीकानि द्वितीयस्त्वफाल्गुनः॥ उत्तमास्त्राणि वाधत्स्व गृहीत
च मनुधनुः॥ पार्थेनो याहि राजानं युध्यस्व च वृकोदरः॥ को हि नेच्छति प्रियं पुत्रं जीवंतं शाश्वती समाः॥ क्षत्रधर्मं तु संप्रेक्ष्य ततस्त्वां नियुनज्म्यहं॥४१॥ एवं
चातिरथो भीष्मो दहते वै महाचमूं॥ युधेषु समशास्तां तपमस्य कस्मात्स्य च॥४२॥ इति भीष्मपर्वणि०॥ संजय उवाच॥ भद्रश्य कृपः शल्यः वर्तमाने तथैव
च॥ विंदानुविंदावावंत्यौ सैंधवश्च जयद्रथः॥१॥ चित्रसेनो विकर्णश्च तथा दुर्मर्षणादयः॥ दृष्टेते तावकायोध्याः भीमसेनेन योधयन्॥२॥ महता
सैन्ये यान्क्रुधे नानादेशसमुत्थान्॥ भीष्मस्य समरे राजन् पार्थ्यमाना महायशः॥३॥ शल्यस्तु नवभिर्वाणै भीमसेनाम ताडयत्। कृपश्च त्रिभिर्बाणै भीमसे
नम ताडयत्॥४॥ कृतवर्मा त्रिभिर्बाणैः कृतश्च नवभिः शरैः॥ चित्रसेनो विकर्णश्च भगदत्तश्च मारिष॥५॥ दशभिर्दशभिर्बाणै भीमसेनमताडय

।।भा०भीष वेदयानोभयंघोरंरणांदेहावकर्त्तने ।।१० देवतायतनस्थाश्चकौरव्येंद्रस्यदेवता: ।। कंपंतेचहसंतेचनृत्यंतिचरुदंतिच ।११। अपसव्यंततश्चक्रर
।।२६३।। लक्ष्मण्यंदिवाकरं ।। अवाक्शिराश्चभगवानुपातिष्ठतचंद्रमा: ।।१२।। वपूंषिचनरेंद्राणांविगतानीवसंक्षये ।। धार्त्तराष्ट्रस्यसैन्येननचभ्राजंतिदंशि
ता: ।।१३। सेनयोरुभयोश्चैवसमंताछ्रूयतेमहान् ।। पांचाजन्यस्यनिर्घोषोगांडीवस्यचनिस्वन: ।१४। ध्रुवमास्थायबीभत्सुरुत्तमास्त्राणिसंयु
गे ।। अपास्यान्यान्रणेयोधानभ्यसातिपितामहं ।।१५। हृष्यंतिरोमकूपानिसीदतीवचमेमन: ।। चिंतयित्वामहाबाहोभीष्मार्जुनसमागमं ।१६
तंचेहनिकृतिप्रज्ञंपांचाल्यंपापचेतसं ।। पुरस्कृत्यरणेपार्थोभीष्मस्यायोधनंगत: ।।१७।। अब्रवीच्चपुराभीष्मोनाहंन्यामिशिखंडिनं ।। स्त्रीह्येषा
विहिताधात्रादैवाच्चसपुन: पुमान् ।। अमंगल्यध्वजश्चैवयाज्ञसेनिर्महाबल: ।। नचामंगलिकेतस्मिन्प्रहरेदापगासुत: ।।१९। एतद्विचिंतया
नस्यमनोसीदतिमेभृशं ।। अभ्युद्यतोरणेक्रुद्ध: कुरुवृद्धमुपाद्रवत् ।।२०। युधिष्ठिरस्यचक्रोधोभीष्मश्चार्जुनसंगत: ।। समवात्रसमारंभ: प्रजा
नामशिवंध्रुवं ।।२१। मनस्वीबलवाञ्छूर: कृतास्त्रोलघुविक्रम: ।। दूरपातीदृढेषुश्चनिमित्तज्ञश्चपांडव: ।। तस्यमार्गंपरिहरद्धृतंगच्छयतव्रत: ।। पु
अजेय: ।। समरेचापिदेवैरपिसवासवै: ।। बलवान्बुद्धिमांश्चैवजितक्लेशोयुधांवर: ।।२३।। विजयीचरणेभेरेवास्त्वच्चपांडव: तस्यमार्गंपरि
हरद्धृतंगच्छयतव्रत ।। पश्यपक्षेतन्महाघोरेसंयुगेवैशसंमहत् ।। हेमचित्राणिभूराणांमहांतिचशुभानिच ।। कवचान्यवदीर्यंतेशरै: सन्नत
पर्वभि: ।। छिद्यंतेचध्वजाग्राणितोमराश्चधनूंषिच ।।२४।

ष्माभिमुखमायांतं भारद्वाजोन्यवारयत् ॥ द्रोणस्य रथनिर्घोषं पर्जन्यनिनदोपमं ॥ श्रुत्वा प्रभद्रका राजन् समकंपंत मारिष ॥ ४७ ॥ सा सेनाम
हती राजन् पांडुपुत्रस्य संयुगे ॥ द्रोणेन वारिता यत्तान चचाल यदात्पदं ॥ ४८ ॥ चेकितानो रणे यत्तं भीष्मं प्रति जनेश्वर ॥ चित्रसेनं तव सुतं क्रुद्ध
रूपमवारयत् ॥ ४९ ॥ न घुद्धमासीत्सुमहत्तयोस्तत्र समागमे ॥ अर्जुनो वार्यमाणस्तु विकर्णेन तत्र भारत ॥ ५० ॥ विमुखीकृत्य पुत्रं ते सेनां तव विमर्द
द ॥ दुःशासनोपि परया शक्त्या पार्थमवारयत् ॥ कथं भीष्मं न नो हन्यादिति निश्चित्य भारत ॥ सा वध्यमाना समरे पुत्रस्य तव वाहिनी ॥ लोघितेर
थिभिः ॥ श्रेष्ठैस्तत्र तत्रैव भारत ॥ ५१ ॥ इति श्रीमहाभारते भीष्मपर्वणि ० ॥ संजय उवाच ॥ अथ वीरो महेष्वासो मत्तवारणविक्रमः ॥ समादाय महच्चा
पमत्तवारयावारणं ॥ १ ॥ विधुन्वानो नरश्रेष्ठो द्रावयाणो वरूथिनीं ॥ पृतनां पांडवेयानां गाहमानो महाबलः ॥ २ ॥ निमित्तानि निमित्तज्ञः सर्वतो वी
क्ष्य वीर्यवान् ॥ तत यंतमानीकानि द्रोणपुत्रमभाषत ॥ ३ ॥ अयं हि दिवसस्तात यत्र पार्थो महाबलः ॥ जिघांसुः समरे भीष्मं परं यत्नं करिष्यति ॥ ४ ॥
उत्पतंति हि मे बाणा धनुः प्रस्फुरतीव च ॥ योगमस्त्राणि शस्त्राणि क्रूरमेव च तं ते पुनः ॥ दिक्षु शांतानि घोराणि व्याहरंति मृगद्विजाः ॥ नीचैर्गृध्रा नि
लीयंते भारतानां चमूं प्रति ॥ ६ ॥ नष्टप्रभश्च वादित्यः सर्वतो लोहिता दिश ॥ रसत्तेव्यथते भूमिः कंपतीव च सर्वशः ॥ कंकगृध्रावलाकाश्च व्याहरंति
मुहुर्मुहुः ॥ शिवाश्चैवाशिवा घोरा वेदयंत्यो महद्भयं ॥ ८ ॥ पपात महती चोल्का मध्येनादित्यमंडलात् ॥ सकबंधश्च परिघो भानुमावृत्य तिष्ठ
ति ॥ ९ ॥ परिवेषस्तथा घोरश्चंद्रभास्करयोरभूत् ॥ १० ॥

तस्य नाश्री सुतपष्ट्राय हृथा सिक्ते दसाधके: श्वसैनं छिन्नधन्वानं विः आधु नव भिषते ॥ सोन्य कार्मुकमादाय समरे सा धन्ते मारिषु
त्रेसमं पृष्ठे तदन्शभि: सा धमूमे ॥ आनत्या नोरसि क्रुधः रक्त्वंन भीष्मस्य भीवत्तं ॥ तस्यैव धनं उ वो राजन पारद्वतमपर्धषेते ३० ॥ आजघानो
रसि क्रुधो भीमस्य स्य व धकास्सरा: ॥ ततो पु धेन्य कर्णासे घोस्सर्वे भयावहं ॥ नकुलं तारतो क्रुधो विकर्णस्य स्तु मा पत: ॥ विव्याध समोप
स्तमभीस्वसमस्तु वलं ३३ नकुलोपि तं से धिकरण वसुते राज्ञी मता ॥ विकर्णोसुस्त्व सा स्ना जवर्तों शिलीमुखे ॥ ३४ ॥ ततत्तो नरस
लमीष्मजेनो परं पते ॥ अन्ये अग्र तु वीरे गारेहृस भा वितना ॥ ३५ ॥ घंयेलकव तरं पतत्तु लिघ्नत्तु तनवाहिमी दुर्मुखः समरे प्राया
द्री समहेलैयात्क्रमी ॥ ३६ ॥ जैत्रं वतः रोगाजतर दुर्मुखस्य समा सव आजघान रसि क्रुध: राज्ञेरानत पार्वरा: ॥ ३७ ॥ भीमसेना
सुतं चापि दुर्मुखं दुर्मुखेसरं ॥ घ द्युम्नो वीसेनरहतहृदो विध्याधरं राम धेनी ॥ ३८ ॥ धृष्टद्युम्न तस्या घात भीष्मस्य सैधकां स्ति
सं ॥ हार्दिक्यो वारया मा सरण स्य स्य महारण ॥ ३९ ॥ हा दिकं वार्ष्णेय स्त्वा पि विा श्रा पंचभिराघषे ॥ पुनः पंचाशता नार्गे तिष्ठ
तिष्ठेति चाब्रवीत ॥ ४० ॥ सौमदत्तिस्त्वो भीष्मसा न वृद्धाय भल्लुरामंय ॥ नारा वेत सुनी सा नारकल्पं छिन्नं संयुगे ४१ ॥ त ससोन
वरो तेनभीमसेन नष्ट नायवानं ॥ स्वरेः शाक्रा य थ्या को र्वे पुरा लविसत्तम ४२ ॥ तौ सरान्त सर्षसे का शा कर्मा त्पे रिता जिता
श्रयोनास्य स्य राक्रुधो व क्षिपातो ना दुर्मो ॥ भीष्मो भीम बधां का मुंसेभाद्दति महारथि ॥ नपा भीष्म नयचस्तु: सौमदत्ति
स्तु पंचभिः ४३

॥राम॥
॥२६२॥

यमदंडोपमां घोरां चिक्षेप परमाहवे ॥ तमापतंतीं सहसा तस्य वाहुवलोद्धतां ॥ ११ ॥ सात्यकिः समरे राजन् द्विधा चिच्छेद सायकैः ॥ ततः पश्चान्नस
हसा महोल्के वहतः प्रभो ॥ शक्तिं विनिहतां दृष्ट्वा पुत्रस्ताव विशांपते ॥ महत्या रथवंशेन वारयामास माधवं ॥ १३ ॥ तथा परिवृतं दृष्ट्वा वार्ष्णेयानां
महारथं ॥ दुर्योधनो भृशं क्रुद्धो भ्रातॄन् सर्वानुवाच ह ॥ १४ ॥ तथा कुरुत कौरव्या यथा वः सात्यको युधि ॥ न जीवन् प्रतिनिर्याति महतोस्माद्रथव्र
जात् ॥ तस्मिन् हते हतं मन्ये पांडवानां महद्वलं ॥ तथेति च वचस्तस्य परिगृह्य महारथाः ॥ १६ ॥ शैनेयं योधयामासुर्भीष्मस्याभ्युद्यतं तर
सा ॥ कांबोजराजो वलवान् वारयामास संयुगे ॥ अर्जुनं निशितैर्विद्ध्वा शरैः सन्नतपर्वभिः ॥ पुनरेव च तं षष्ट्या राजन् विव्याध तं नृपः ॥ सुदक्षि
णस्तु समरे पुनर्विव्याध यत्नवान् ॥ सारथिं चास्य नवभिरिच्छन् भीष्मस्य जीवितं ॥ १९ ॥ तद्युद्धमासीत्सुमहत् तयोर्यत्र समागमे यदभ्यवर्तत गां
गेयं शिखंडी शत्रुकर्षणं ॥ २० ॥ विराटद्रुपदौ वृद्धौ वारयंतौ महाचमूं भीष्मं च युधि संरब्धावाद्रवंतौ महारथौ ॥ अश्वत्थामा ततः क्रुद्धः समियाद्र
थसत्तमः ॥ ततः प्रवृत्ते युद्धं तयोः स्तस्य च भारत विराटो दशभिर्भल्लैराजघान परंतपः ॥ यतमानं महेष्वासं द्रौणिमाहवशोभिनं ॥ २३ ॥ द्रुपदश्च त्रिभि
र्वाणैर्विव्याध निशितैस्तथा ॥ गुरुपुत्रं समासाद्य प्रहरंतौ महावलौ ॥ अश्वत्थामा ततस्तौ तु विव्याध वहुभिः शरैः ॥ विराटद्रुपदौ वीरौ भीष्म
मभ्युद्यतौ प्रति सम्यगौ ॥ २५ ॥ तत्राद्भुतमपश्याम वृद्धयोश्चरितं महत् ॥ द्रौणेर्घोरान् सायकान् घोरान् प्रत्युवारयतां युधि ॥ सहदेवं तथा यांतं कृपः शा
रद्वतोभ्ययात् ॥ यथा नागो वने नागं मत्तो मत्तमुपाद्रवत् कृपश्च समरे शूरो माद्रीपुत्रं प्रतापवान् ॥ आजघान शरैस्तूर्णं सप्तत्या रुक्मपुंखितैः ॥ २५ ॥

अप्राप्येनैवतान्वाणान् चिच्छेदततनयस्तव ॥ यतमानस्यपार्थस्यतदद्भुतमिवाभवत् ॥ ४१ ॥ पार्थस्तुनिशितैर्वाणैरविध्यत्तनयस्तवततः
क्रुद्धोरणेपार्थः शरान्संधायकार्मुके ॥ ४२ ॥ प्रेषयामासस मेरस्त्वर्णपुंखाशितान् ॥ न्यमज्जंस्तेमहाराजतस्यकायेमहात्मनः
यथाहंसामहाराजतथागंप्राप्यभारत ॥ पीडितश्चैवपुत्रस्तेपांडवेनमहात्मना ॥ हित्वापार्थरणेतूर्णंभीष्मस्यरथमाद्रुजत् ॥ अगा
धेमज्जतस्तस्यद्वीपोभीष्मोभवत्तदा ॥ प्रतिलभ्यततः संज्ञां पुत्रस्तवविशांपते ॥ अवारयत्ततःशूरो भूयएवपराक्रमी ॥ ४६ ॥ शरैः सुनिशि
तैःपार्थंयथावृत्रंपुरंदरः ॥ निर्बिभेदमहाकायो विव्यथेनैवचार्जुनः ॥ ४७ ॥ इतिश्रीमहाभारतेभीष्मपर्वणि ॥ संजयउवाच ॥ साम्यकिंद
शितंयुद्धेभीष्मायाभ्युद्यतंरणे ॥ आर्ष्यशृंगिर्महेष्वासोवारयामाससंयुगे ॥ १ ॥ माधवस्तुसुसंक्रुद्धोराक्षसंनवभिःशरैः ॥ आजघानरणेराज
न्प्रहसन्निवभारत ॥ २ ॥ तथैवराक्षसोराजन्माधवंधवभिःशरैः ॥ अर्दयामासराजेंद्र संक्रुद्धः शिनिपुंगवं ॥ ३ ॥ शैनेयःशरसंघंतुप्रे
षयामाससंयुगे ॥ राक्षसायसुसंक्रुद्धोमाधवः परवीरहा ॥ ४ ॥ ततोराजामहाबाहुः सत्यविक्रमं ॥ विव्याधविशिखैस्तीक्ष्णैः सिंह
नादंचवे ॥ ५ ॥ भगदत्तस्ततःक्रुद्धोमाधवंनिशितैःशरैः ॥ ताडयामाससमरेतोत्त्रैरिवमहागजं ॥ ६ ॥ विहायराक्षसंयुद्धेशैनेयोरथिनांवरः ॥ प्रा
ग्ज्योतिषायचिक्षेपशरान्सन्नतपर्वभिः ॥ ततःप्राग्ज्योतिषोराजामाधवस्यमहाधनुः चिच्छेदनिशितधारेणभल्लेनकृतहस्तवत् ॥ ८ ॥
अथान्यद्धनुरादायवेगवत्परवीरहा ॥ भगदत्तंरणेक्रुद्धोविव्याधनिशितैःशरैः ॥ सोतिविद्धोमहेष्वासःसृक्किणीपरिसंलिहन् ॥ सक्तिंक

प्यते हि वः ॥ २४ ॥ अर्जुनं समरे योद्धुं नोत्सहेत्तापि वासवः ॥ किमु भीष्मारणो वीरो गतसत्वोल्पजीवितः ॥ २५ ॥ इति सतेन यतेः श्रुत्वा पांडवानां
महारथाः ॥ अभ्यद्रवंत संहृष्टा गांगेयस्य रथं प्रति ॥ आगच्छमानान्समरे वीर्यवान्प्रबलानिव ॥ अवारयंत संहृष्टास्तावकाः पुरुषर्षभा दुः
शासनेन महाराज भयं त्यक्त्वा महारथाः ॥ तत्राद्भुतमपश्याम चित्ररूपं विशांपते ॥ दुःशासनरथं प्राप्य यत्पार्थो नात्यवर्तत ॥ २७ ॥ यथा वारयते वेला क्षु
भितं सलिलार्णवं ॥ तथैव पांडवं क्रुद्धं तव पुत्रोन्यवारयत् ॥ उभौ तौ रथिनां श्रेष्ठावुभौ भारत दुर्जयौ ॥ उभौ चंद्रार्कसदृशौ कांत्या दीप्त्या च भारत य
यातो आतसंरं भावन्योन्यवधकांक्षिणौ ॥ समीयतुर्महासंख्ये मयशक्रौ यथा पुरा ॥ ३० ॥ दुःशासनो महाराज पांडवं विशिखैस्त्रिभिः ॥ वासुदे
वं च विंशत्या ताडयामास संयुगे ॥ ततोर्जुनो जातमन्युर्वार्ष्णेयं वीक्ष्य पीडितं ॥ दुःशासनं शतेनाजौ नाराचानां समार्पयत् ॥ ३२ ॥ ते तस्य कवचं
भित्वा पपुः शोणितमाहवे ॥ दुःशासनस्त्रिभिः क्रुद्धः पार्थं विव्याध पत्रिभिः ॥ ललाटस्थैस्ततो वीरो शुशुभे पांडवो रणे ॥ यथा मेरुर्म
हाराज शृंगैरत्यर्थमुच्छ्रितैः ॥ सोतिविद्धो महेष्वासः पुत्रेण तव धन्विना ॥ व्यराजत रणे पार्थः किंशुकः पुष्पवानिव ३५ दुःशासनं ततः क्रु
द्धः पीडयामास पांडवः ॥ पर्वणीव सुसंक्रुद्धो राहुः पूर्णं निशाकरं ॥ ३५ पीड्यमानो बलवता पुत्रस्ते शिलाशितैः शरैः सोत्यज्य कार्मुकमादाय भीष्मस्य
प्रमुखे स्थितः ॥ अर्जुनं पंचविंशत्या बाहोरुरसि चार्पयत् ॥ ३६ ॥ ततः पुत्रस्तव विशिखैः स्थितः शितैः धीमान्प्रमुखे समरे पार्थं कंकपत्रैः शिलाशितै
स्तस्य पार्थो ॥ धनुश्छित्वा रथं चास्य त्रिभिः शरैः आजघान ततः ॥ ४ ॥ ततः क्रुद्धो महाराज पांडवः शत्रुतापनः अप्रेषयत् विशिखान्रोगान्यम

भीष्मप ५०

भा॰ भी॰ धृष्टकेतुस्तथाराजन्सौभद्रश्चमहारथा हृष्टवाद्रवंतो भीष्मंप्रत्युद्ययुःपार्थस्यभाषितं ॥४॥ विराटद्रुपदौवृद्धौकुंतिभोजश्चदंशितः अभ्यद्र
२६० वत्तगांगेयंपुत्रस्यानववपश्यतः ॥५॥ नकुलःसहदेवश्चधर्मराजश्चवीर्यवान् तथेतराणिसैन्यानिसर्वाण्येवविशांपते ॥६॥ प्रत्युद्ययुस्तावकांश्च
समेतान्तान्महारथान् यथाबलंयथोत्साहंतन्मेनिगदतः ॥ शृणु चित्रसेनोमहाराजचेकितानंसमभ्ययात् ॥ भीष्मप्रेप्सुंरणेयांतंवृषसाघ्र
पिपासुर्यया ॥८॥ धृष्टद्युम्नंमहाराजभीष्मंसत्यमुपागतं ॥ त्वरमाणोरणेयत्तंकृतवर्माचवीर्यवान् ॥ भीमसेनंसुसंक्रुद्धंगांगेयस्यवधैषिणा
त्वरमाणोमहाराजेसोमदत्तिन्यवर्तयत् ॥१०॥ तथैवनकुलंशूरंकिरंतंसायकान्बहून् ॥ विकर्णोवारयामासइमिसेनंमहाबलं ॥ भीष्मस्यनिध
नप्रेप्सुंदुर्मुखोभ्यद्रवद्बली ॥ सात्यकिंसमरेयांतंतवपुत्रोन्यवारयत् ॥ अभिमन्युंमहाराजयांतंभीष्मंप्रति ॥१४॥ सुदक्षिणोमहारा
राजकांबोजःप्रत्यवारयत् ॥ विराटद्रुपदौवृद्धौसमेतावरिमर्दनौ ॥१५॥ अश्वत्थामाततःसंक्रुद्धोवारयामासभारत ॥ तथापरंसुतज्येष्ठोभीष्मस्यवधि
कांक्षिणां ॥ भारद्वाजेनरोषेणधर्मपुत्रमवारयत् ॥ अर्जुनंरभसंयुद्धेपुरस्कृत्यशिखंडिनं ॥ भीष्मप्रेप्सुंमहाराजभासयंतंदिशोदशः दुःशास राम
नोमहेष्वासोवारयामाससंयुगे ॥१८॥ अन्येचतावकायोधाःपांडवानांमहारथान् ॥ भीष्मस्याभिमुखंयातान्वारयामासुराहवे ॥१९॥ धृ २६०
ष्टद्युम्नस्तुसैन्यानिप्राक्रोशत्पुनःपुनः ॥ अभ्यद्रवतसंरब्धोभीष्ममेकंमहारथः ॥२०॥ एषोर्जुनोरणेभीष्मंप्रयातिकुरुनंदनः ॥ २० ॥

एवमुक्तो महाराज पिता देवव्रतस्तव ॥२४॥ चिंतयित्वा मुहूर्तं तु कृत्वा निश्चयमात्मनः ॥ तव संधारयन्पुत्रमब्रवीच्छंतनोः सुतः २५ दुर्योधन विजानी
हि स्थिरो भूत्वा विशांपते ॥ पूर्वकालं तव मया प्रतिज्ञातं महाबल ॥२६॥ हत्वा दशसहस्राणि क्षत्रियाणां महात्मनां ॥ संग्रामादपयातव्य
मेतत्कर्म ममाह्निके ॥२७॥ इति तत्कृतवांश्चाहं यथोक्तं भरतर्षभ ॥ अद्य चापि महत्कर्म प्रकरिष्ये महाबल ॥ अहं वा निहतः शेष्ये हनिष्ये वाद्य
पांडवान् ॥ अद्य ते पुरुषव्याघ्र प्रतिमोक्ष्ये ऋणं तव ॥ अन्नं पिंडकृतं राजन्निहतः पृतनामुखे र सुझामरत प्रेष्ठक्षत्रियान्स्तवपृष्ठ्ये ॥३०॥ छरेः ८
॥३०॥ आससाद दुराधर्षो पांडवानामनीकिनीं ॥ अनीकमध्ये तिष्ठंतं गांगेयं पुरुषर्षभः ॥ पांचालानां चैव श्रेष्ठ राजपुत्रा महारथाः ॥ तेषां दीप्तिं
तेजांसि जलं सूर्य इवांशुभिः ॥३२॥ हत्वा दससहस्राणि कुंजराणि तरस्विनां ॥ सप्त हारणां महाराज हयानां चायुतं तथा ॥ पूर्णं सतसहस्रे च पद्
तानां नरोत्तमाः ॥ प्रज्वाल्य रणे भीष्मो विधूम इव पावकः ॥३४॥ न चैनं पांडवेयानां केचिच्छेकुर्निरीक्षितुं ॥ उत्तरं मार्गमास्थाय तपंतमिव भास्करं ॥३५
ते पांडवेया समरे महेष्वासेन यीजिता ॥ वधायाभ्यद्रवन्भीष्मं सृंजयाश्च महारथाः ॥३६॥ संयुध्य मार्गणैर्बहुभिर्भीष्मः संतनवः स्तथा ॥ अव
कीर्णो महामेरुः शैलो मेघैरिवावृतः ॥३७॥ पुत्रस्तु तव गांगेयं समंतात्पर्यवारयन् ॥ महत्यासेनया सार्धं ततो युद्धमवर्तत ॥३८॥ इति श्री मह
भारते भीष्मपर्वणि ॥ संजय उ० ॥ अर्जुनस्तु रणे राजन्दृष्ट्वा भीष्मस्य विक्रमं ॥ शिखंडिनमथोवाच समभ्येहि पितामहं ॥१॥ न चापि भीष्मपा
कार्या भीष्मादद्य कथंचन ॥ अहमेनं शरैस्तीक्ष्णैः पातयिष्ये रथोत्तमात् ॥२॥ एवमुक्तस्तु पार्थेन शिखंडी भरतर्षभ अभ्यद्रवत गांगेयं श्रुत्वा पार्थस्य

भीष्म ४

नथादितिगणराजन हयकुंवसुसज्ञितां ८ ॥ अभ्यवर्तत युधाय पुरस्कृत्य पितामहं ॥ यथाप्रतिज्ञां कौरवस्त्वपि समितिंजयः ॥ ९ पार्थानाम कोटीमनः
मततं समितिष्वपं युध्यमानं महेष्वासं विनिघ्नंतं परान्छरैः ॥ ९ पांचालाः पांडवैः सार्धं सर्वे ते नाभ्यधारयत् ॥ दशमेहनि संप्राप्ते ततस्तां रिपुवाहिनीं
॥ १० कीर्यमाणां शितैर्बाणैः शतसोथ सहस्रसः ॥ नहि भीष्मं महेष्वासं पांडवाः पांडुपूर्वजः ॥ ११ अशक्नुवन्रणे जेतुं पाशहस्तमिवांतकं
अथोपायान्महाराज सव्यसाची धनंजयः ॥ १२ त्रासयन्रथिनः सर्वान्भीष्मस्तु पराजिता ॥ सिंहवद्विनदन्नुच्चैर्धनुर्ज्यां विक्षिपन्मुहुः ॥ शरौघा
न्विसृजन्पार्थो व्यचरत्कालवद्रणे ॥ तस्य शब्देन वित्रस्तास्तावका भरतर्षभ ॥ १४ सिंहस्येव मृगा राजन्व्यद्रवंत महाभयात् ॥ जयंतं
पांडवं दृष्ट्वा तत्सैन्यं चाभिपीडितं ॥ १५ दुर्योधनस्ततो भीष्ममब्रवीद्भृशपीडितः ॥ एष पांडुसुतस्तात श्वेताश्वः कृष्णसारथिः ॥ १६ दहते माम
कान्सर्वान्कृष्णवर्त्मेव काननं ॥ पश्य सैन्यानि गांगेय द्रवमाणानि सर्वशः ॥ १७ पांडवेन युधां श्रेष्ठ काल्यमानानि संयुगे ॥ यथा पशुगणा
न्पालाः संकालयति कानने ॥ तथेदं मामकं सैन्यं काल्यते शत्रुतापन ॥ धनंजयशरैर्भग्नं द्रवमाणं ततस्ततः ॥ १८ भीष्मोप्येवं दुराध
र्षो विद्रावयति मे बलं ॥ सात्यकिश्चेकितानश्च माद्रीपुत्रौ च पांडवौ ॥ २० अभिमन्युः सुविक्रांतो वाहिनीं द्रवते मम ॥ धृष्टद्युम्नस्तथा शूरो
राक्षसश्च घटोत्कचः ॥ २१ अभ्यद्रवेतां सहसा सैन्यं मम महारणे ॥ वध्यमानस्य सैन्यस्य सर्वैरेतैर्महारथैः ॥ २२ नान्यां गतिं प्रपश्यामि स्थाने
युद्धे च भारत ॥ ऋते त्वां पुरुषव्याघ्र देवतुल्यपराक्रमं ॥ पर्याप्तोसि भवान्क्षिप्रं पीडितानां गतिर्भव ॥ ॥

कामसम्पसवान्यावानमेजीवन्विमोक्ष्यसे॥ सुहृद्भिः क्रियतां भीष्म लोको यो स मिनिगहान्॥४८ संजयउवाच॥ एवमुक्त्वा ततो भीष्मं पंचभिर्नत
पर्वभिः॥ अविध्यन्नरशो भीष्मं सनुत्से वाससायकैः॥ तस्य तद्वचनं श्रुत्वा सत्यवाची महारथ॥ आकालोयमितिसंचित्य शिखंडिनमचोदयत्॥ अहं त्वा
मनुयोत्स्यामि यावत् विद्रावयच्छरैः॥ अभिद्रवस्व संरब्धो भीष्मं तस्य सिमारिषः॥४७ अहावास्यास्य लोकस्य भविष्यसि मयाहते॥ वहास्यावधेवी
रभवेम परसाहवे॥४८ तथ्याकुरु रोणयत्नं साधमस्य पितामहं॥ अहं ते रक्षरणायुधे क्षरिष्यामि महाबला॥४९ वारयन्नुधिनः सर्वान्साध
यित्वा पितामहं॥ द्रोणं चद्रोणपुत्रं च कृपं चाप्यसुपेधनं॥५० चित्रसेनं विकर्णं च सैंधवं च जयद्रथं॥ विंदानुविंदावावंत्यौ कांबोजं सुदक्षि
णं भगदत्तं तथा शूरं मागधं च महाबलं॥ सोमदत्तिं तथा शूरमार्ष्यश्रृंगं च राक्षसं॥५२ त्रिगर्तराजं चरणो सहसर्वैर्महारथैः॥ अहमावारयिष्या
मि वलेवमकरालये॥ कुरूंश्च संहितान्सर्वान्युध्यमानान्महाबलान्॥ अहं निवारयिष्यामि सन्ध धवर यस्व पितामहं॥५५॥ इति श्रीमहाभा
रते भीष्मपर्वणि॰ धृतराष्ट्र उवाच॥ कथं शिखंडी गांगेयमभ्यधावत्पितामहं॥ पांचाल्यः समरे क्रुद्धो धर्मात्मानं यतव्रतं॥१ केऽरक्षन्पांड
वानीके शिखंडिनमुदायुधाः त्वरमाणास्त्वराकाले जिगीषन्तो महारथाः॥२ कथं शांतनवो भीष्मः स तस्मिन्दशमेऽहनि॥ अयुध्यत महावीर्यः पांड
वैः सह सृंजयैः॥३ न मृष्यामि रणे भीष्मं प्रत्युद्यातं शिखंडिना॥ कच्चिन्न रथभंगोऽस्य धनुर्वासीर्यदस्यतः॥४॥ संजयउवाच॥ नाशीर्यत धनुस्त
स्य रथभंगो न चाप्यभूत्॥५ युध्यमानस्य संग्रामे भीष्मस्य भरतर्षभ॥ निघ्नतः समरे सनुष्ठाः सन्नतपर्वभिः॥ अनेकशतसाहस्राणां महारथा॥६॥

वर्त्तंतवज्रहस्तमिवासुराः॥३०॥ क्रोशन्निस्तस्य रथपार्श्वात् विमुंचन्निशितान् शरान्॥ दिक्षु दृश्यत सर्वासु घोरं संधारयन्धनु॥३१॥ मंडलीकृतमेवा
स्य नित्यं धनुरदृश्यत॥ संग्रामेषु ध्नमानस्य शक्रचापोपमं महत्॥३२॥ तं दृष्ट्वा समरे कर्म पुत्रस्ते वविशांपते॥ विस्मयं परमं गत्वा पितामहमभाषत
॥३३॥ पार्थो विमनसो भूत्वा प्रेक्ष्यते पितरं तव॥ युध्यमानं महात्मानं विप्रचित्तमवानरा॥३४॥ नचैनं वारयामास मुध्यात्तैन। नमिवांतके॥ रशमेवा
हसं ग्रामरथानीकं शिखंडिनः॥ अयं दहति शितैर्वाणैः कक्षं वर्त्मेव काननः॥ तं शिखंडिन्नि वीरोरथ विध्यस्तनांनरे॥३६॥ आसीविषमवक्रुधंका
लं स्वष्ट्रमिवांतकं॥ अभिछंदन्नि वक्रुधः प्रसाद्येदमब्रवीत्॥३७॥ कामभन्यापूर्वान स्मिन त्वांयोत्स्ये कथंचनः॥ यैवहं त्वं कृताधात्रा सैव हि त्वं शि
खंडिनी॥३८॥ तस्य तद्वचनं श्रुत्वा शिखंडी क्रोधमूर्छितः॥ उवाचैनं यथा तत्त्वं यो तत्र भीष्मं सृक्किणी परिसंलिहन्॥३९॥ जानामि त्वां महाबाहो क्ष
त्रियाणां क्षयंकरं॥ मया श्रुतं च ते युद्धं जामदग्न्येन वै विहि॥४०॥ दिव्यं श्रुत्वे प्रभावोयं मया च बहुशः श्रुतः॥ जानन्नपि प्रभावं ते योत्स्येद्यातं त्वया
सहं॥ पांडवानां प्रियं कुर्वन्नात्मनश्च नयंजयः॥ अद्य त्वां योधयिष्यामि रणे पुरुषसत्तमा॥४२॥ ध्रुवं च त्वां हनिष्यामि शपेयं सत्येन तेग्रतः॥ एतच्छ्रुत्वा
वचमद्वाक्यं यत्कृतं तत्समाचर॥४३॥

लयामासुस्तवसैन्यस्यभारत दिवसे दिवसे प्राप्ते भीष्मः शांतनवो युधि ॥ १४ ॥ असुरानकरोद्व्यूहान्पैशाचानथराक्षसान् ॥ ततः प्रवृत्ते यु
द्धं तवतेषां च भारत ॥ १५ ॥ अमोत्यं घ्नता राजन् यमराष्ट्रविवर्धनं ॥ अर्जुनः प्रमुखाः पार्थाः पुरस्कृत्य शिखंडिनं १६ ॥ भीष्मं युद्धेभ्यवर्त्त
त किरंतो विविधान् शरान् ॥ तत्र मारत भीमेन ताडितास्तावका रणे ॥ रुधिरौघपरिक्लिन्नाः परलोकं ययुस्तदा ॥ नकुलः सहदेवश्च सा
त्यकिश्च महारथः ॥ १८ ॥ तवसैन्यं समासाद्य पीडयामासुरोजसा ॥ ते वध्यमानाः समरे तावका भरतर्षभः ॥ १९ ॥ वध्यमाना शिनेर्वी
रैः पांडवैः सहसृंजयैः ॥ धृतराष्ट्र उवाच ॥ पीड्यमानं बलं दृष्ट्वा पार्थैर्भीष्मः पराक्रमी ॥ यदाकार्षीद्रणे क्रुद्धस्तन्ममाचक्ष्व संजय २० क
थं वा पांडवान्युद्धे प्रत्युद्यातः परंतप ॥ विनिघ्नन्सोमकान्वीरस्तन्ममाचक्ष्वमानघ ॥ २१ ॥ संजय उवाच ॥ आचक्षे ते महाराज यदकार्षी
त्पिता तव ॥ अभ्यवर्तत निघ्नंस्तव पुत्रस्य वाहिनीं ॥ २३ ॥ पीडिते तव पुत्रस्य सैन्ये पांनरवारणवाजिनां ॥ नामृष्यत तदा भीष्मः सैन्यघातं नर
तोयषे ॥ २४ ॥ सपांडवान्महेष्वासः पांचालांश्चैवसृंजयान् ॥ नाराचैर्वत्सदंतैश्च शितैरंजलिकैस्तथा ॥ २५ ॥ अभ्यवर्त्तत दुर्धर्षो
स्त्यक्त्वा जीवितमात्मनः ॥ सपांडवानां प्रवरान्पंचराजन्महारथान् ॥ २६ ॥ अ[illegible]शन्नारोहमद्वारयामास सायकैः ॥ नानाशस्त्रा
स्त्रवर्षेण तावीर्यामर्षप्रवेरितैः ॥ २७ ॥ निजघ्ने समरे क्रुद्धो हस्त्यश्वममितं बहु ॥ त[illegible]कं समरे भीष्मस्त्वरमाणामहारथः ॥ पांडवानांमे

भा॰ भी॰ ॥
२५७

कं न्यायेषा पुराभूत्वा पुरुषः समपद्यत ॥ ६ ॥ इत्येवं निश्चयं कृत्वा पांडवाः सहमाधवाः ॥ अनुमान्य महात्मानं प्रययुर्हृष्टमानसाः ॥ १०७ ॥ इति श्री
भीष्मपर्वणि ॥ धृतराष्ट्र उवाच ॥ कथं शिखंडी गांगेयमभ्यवर्तत संयुगे ॥ पांडवाश्च कथं भीष्मं तन्ममाचक्ष्व संजय ॥ १ संजय उवाच ॥ तत
स्ते पांडवाः सर्वे सूर्यस्योदयनं प्रति ताड्यमानासु भेरीषु मृदंगेष्वानकेषु च ॥ २ ॥ ध्मायत्सु दधिवर्णेषु जलजेषु समंततः ॥ शिखंडिनं स
र्वे शिखंडिनं पुरुषः कृत्वा निर्याताः पांडवा युधि ॥ ३ ॥ कृत्वा व्यूहं महाराज सर्वशत्रुनिबर्हणं ॥ शिखंडी सर्वसैन्यानामग्र आसीद्विशांपते चक्ररक्षौ
ततस्तस्य भीमसेनधनंजयौ ॥ पृष्ठतो द्रौपदेयाश्च सौभद्रश्चैव वीर्यवान् ॥ ५ ॥ सात्यकिश्चेकितानश्च तेषां गोप्ता महारथा ॥ ६ धृष्टद्युम्नस्ततः पार्थैः
सैन्येन संवृतः द्रुपदश्च महाबाहो ततः पश्चात्प्रयात्वत ॥ केकया भ्रातरश्चैव धृष्टकेतुश्च वीर्यवान् ७ ॥ जघनं पालयामासुः पांडुसैन्यस्य भारत ॥ ८
एवं व्यूह्य महासैन्यं पांडवास्तव वाहिनीं ॥ ९ ॥ अभ्यद्रवंत संग्रामे त्यक्त्वा जीवितमात्मनः ॥ तथैव कुरवो राजन् भीष्मं कृत्वा महारथा ॥ अग्रतः स
र्वसैन्यानां प्रययुः पांडवान्प्रति ॥ उग्रैश्च तनयैर्घोरैस्तव पुत्रैर्महाबलौ ॥ १० ॥ ततो द्रोणो महेष्वासः पुत्रश्चास्य महाबलः ॥ भगदत्तस्ततः पश्चा
द्गजानीकेन संवृतः ॥ ११ ॥ कृपश्च कृतवर्मा च भगदत्तमनुव्रतौ ॥ कांबोजराजो बलवान् ततः पश्चात्सुदक्षिणः ॥ १२ ॥ मागधश्च जयत्सेनः सौबलश्च
बृहद्बलः ॥ तथेतरे महेष्वासाः सुशर्मप्रमुखा नृपः ॥ १३ ॥

॥ राम ॥
॥ २५७ ॥

श्री जिताहि मया वाल्ये वासुदेव महात्मना ॥ पांशुगुंठितगात्रेण महात्मा परुषीकृतः ॥ ९२ ॥ यस्याहमधिरुह्यांकं वालः किल गदा
ग्रजः ॥ तातेत्यवोचं पितरं पितुः पांडोर्महात्मनः ॥ नाहं तातस्तव पितुस्तातोस्मीतव भारतः ॥ इति मामब्रवीद्वाल्ये यः सवध्यः कथंमया ९४
कामंवध्यतु सैन्यंमे नाहं योत्स्ये महात्मना ॥ जयोवास्तु वधोवामेकथंवा कृष्णमन्यसे ॥ ९५ ॥ वासुदेवउवाच ॥ प्रतिज्ञाय वधंजिष्णो पुरा
भीष्मस्यसंयुगे ॥ क्षत्रधर्मे स्थितः पार्थः कथंनैनंहनिष्यसि ॥ ९६ ॥ पातयैनंरथात्पार्थ क्षत्रियंयुद्धदुर्मदं ॥ नाहत्वायुधिगांगेयं विजय
स्ते भविष्यति ॥ दृष्टमेतत्पुरादेवैर्गमिष्यतियमक्षयं ॥ यद्दृष्टंहिपुरा पार्थ तत्तथानतदन्यथा ॥ नहिभीष्मंदुराधर्षं व्यात्ताननमिवांत
कं ॥ त्वदन्यः शक्नुयाद्योद्धुमपिवज्रधरः स्वयं ॥ जहिभीष्मं स्थिरोभूत्वा शृणुचेदंवचोमम ॥ यथोवाचपुराशक्रं महाबुद्धिर्बृहस्प
तिः ॥ १०० ॥ ज्यायांसमपिचेद्वृद्धं गुणैरपिसमन्वितं ॥ आततायिनमायांतं हन्याद्घातकमात्मनः ॥ १०१ ॥ शाश्वतोयंस्थितो धर्मः ॥ क्षत्रि
याणांधनंजय ॥ योद्धव्यं रक्षितव्यंच यष्टव्यंचानसूयुभिः ॥ १०२ ॥ अर्जुनउवाच ॥ शिखंडीनिधनंकृष्ण भीष्मस्यभविताध्रुवं
दृष्ट्वैवहि सदाभीष्मः पांचाल्यंविनिवर्तते ॥ १०३ ॥ तेवयंपुरतस्तस्य पुरुषात्मपि संजितं ॥ गांगेयं पातयिष्यामि उपायेनेतिमेमतिः ॥ १०४ ॥
अहमन्यान्महेष्वासान् वारयिष्यामिसायकैः ॥ शिखंडीपियुधांश्रेष्ठ भीष्ममेवाभियोधयेत् ॥ ५ ॥ श्रुतंहिकुरुमुख्यस्य नाहंहन्यांशिखंडिनः ॥

प्रजानां संक्षयो न स्यात्कथं तन्मे वद प्रभो ॥ भवान्हि नो वधोपायं ब्रवीतु स्वयमात्मनः ॥ ६३ ॥ भवंतं समरे वीर विषहेम कथं वयं ॥ न हि ते सूक्ष्ममप्य-
स्त्यरंध्रं कुरुपितामह ॥ ६४ ॥ मंडलेनैव धनुषा दृश्यसे संयुगे सदा ॥ आददानं संदधानं विकर्षंतं धनुर्न च ॥ पश्यामस्त्वां महाबाहो रथे सूर्यमिवापरं ॥ रथा-
श्वनरनागानां हंतारं परवीरहन् ॥ ६६ ॥ को ह्युत्सहेत ते जेतुं त्वां पुमान्भरतर्षभ ॥ वर्षता शरवर्षाणि त्वया संयुगे वैशसं कृतं ॥ ६७ ॥ क्षयं नीता हि
पृतना सा ते युगे महती मम ॥ यथा युधि जयेम त्वां यथा राज्यं भवेन्मम ॥ ६८ ॥ मम सैन्यस्य च क्षेमं तन्मे ब्रूहि पितामह ॥ ततोऽब्रवीच्छांतनवः पांडवान्पा-
ण्डुपूर्वज ॥ ६९ ॥ न कथंचन कौंतेय मयि जीवति संयुगे ॥ जयो भवति सर्वज्ञ सत्यमेतद्ब्रवीमि ते ॥ ७० ॥ निर्जिते मयि युद्धेन रणे प्यप पांडवाः क्षिप्रमपि
प्रहरध्वं यदृर्धायारोत्तयः ॥ ७१ ॥ अनुजानामि वः पार्थाः प्रहरध्वं यथासुखं ॥ एवं हि सुकृतं मन्ये भवतां विदितो ह्यहं ॥ ७२ ॥ हते मयि हतं सर्वं तस्मा-
देवं विधीयतां ॥ युधिष्ठिर उवाच ॥ ब्रूहि तस्मादुपायं मे यथा युधि जयेमहि ॥ ७३ ॥ भवंतं समरे क्रुद्धं दंडहस्तमिवांतकं ॥ शक्तो वज्रधरो जेतुं वरुणो
यमस्तथा ॥ ७४ ॥ न भवान्समरे शक्यः सेंद्रैरपि सुरासुरैः ॥ भीष्म उवाच ॥ सत्यमेतन्महाबाहो यथा वदसि पांडव ॥ नाहं जेतुं रणे शक्यः सेंद्रैरपि सुरा-
सुरैः ॥ आत्तशस्त्रो रणे यत्तो गृहीतवरकार्मुकः ॥ ७५ ॥ ततो मां न्यस्तशस्त्रं तु एते हन्युर्महारथाः ॥ ७६ ॥ ॥ ॥ ॥ ॥ ॥

क्रीडिता हि मया बाल्ये वासुदेव महात्मना ॥ पांसुरूषितगात्रेण महात्मा परुषीकृतः ॥ ९२ ॥ यस्याहमधिरुह्याङ्कं बालः किल गदा
ग्रजः ॥ तातेत्यवोचं पितरं पितुः पाण्डोर्महात्मनः ॥ नाहं तातस्तव पितुस्तातोऽस्मि तव भारत ॥ इति मामब्रवीद्बाल्ये यः स वध्यः कथं मया ॥ ९४
कामं वध्यतु सैन्यं मे नाहं योत्स्ये महात्मना ॥ जयो वास्तु वधो वा मे कथं वा कृष्ण मन्यसे ॥ ९५ ॥ वासुदेव उवाच ॥ प्रतिज्ञाय वधं जिष्णो पुरा
भीष्मस्य संयुगे ॥ क्षत्रधर्मे स्थितः पार्थ ॥ कथं नैनं हनिष्यसि ॥ ९६ ॥ पातयैनं रथात्पार्थ क्षत्रियं युद्धदुर्मदं ॥ नाहत्वा युधि गाङ्गेयं विजय
स्ते भविष्यति ॥ दृष्टमेतत्पुरा देवैर्गमिष्यति यमक्षयं ॥ यद्दृष्टं हि पुरा पार्थ तत्तथा न तदन्यथा ॥ न हि भीष्मं दुराधर्षं व्यात्ताननमिवान्त
कं ॥ त्वदन्यः शक्नुयाद्योद्धुमपि वज्रधरः स्वयं ॥ जहि भीष्मं स्थिरो भूत्वा शृणु चेदं वचो मम ॥ यथोवाच पुरा शक्रं महाबुद्धिर्बृहस्प
ति ॥ १०० ॥ ज्यायांसमपि चेद्वृद्धं गुणैरपि समन्वितं ॥ आततायिनमायान्तं हन्याद्घातकमात्मनः ॥ १०१ ॥ शाश्वतोऽयं स्थितो धर्मः क्षत्रि
याणां धनंजय ॥ योद्धव्यं रक्षितव्यं च यष्टव्यं चानुसूयता ॥ १०२ ॥ अर्जुन उवाच ॥ शिखण्डी निधनं कृष्ण भीष्मस्य भविता ध्रुवं
दृष्ट्वैव हि सदा भीष्मः पाञ्चाल्यं विनिवर्तते ॥ १०३ ॥ ते वयं पुरतस्तस्य पुरस्तात्पि शिखंडिनं ॥ गाङ्गेयं पातयिष्यामि उपायेनेति मे मतिः ॥ १०४ ॥
अहमन्यान्महेष्वासान् वारयिष्यामि सायकैः ॥ शिखण्डिपि युधां श्रेष्ठं भीष्ममेवाभियोधयेत् ॥ ५ ॥ श्रुतं हि कुरुमुख्यस्य नाहं हन्यां शिखण्डिनः ॥

प्रजानां पांसवे नानस्यात्कथं तन्मे वद प्रिये॥ भवान्हि नो बलो पायं वद वीतु स्याम्प्र माधव:॥६३॥ भवंतं समरे वीर विषये मत्व पंवये॥ न हि ते सुक्ष्मम प्य
स्यापं धर्मं कुरुपितामह:॥६४॥ मंतं लेनैव धनुषा हत्यमेसंयुगे भारत॥ आदादानं संधानं विकर्षंत धनुर्नव॥ पश्याम त्वां महाबाहो रथेस्स्ये मि वाथरं रथा
प्यतस्वा संहतारं प्रवीरहा न॥६६॥ को घचोक्ता हते जेतुं त्वां पुमान्भरतर्षभ:॥ ववर्षता शरवर्षाणि।सं पुगो वेषागं क्रुतं॥६७॥ त्वयेनी तपि
प्रतना स्तेयुगेमहती नम:॥ यथा युधिजये मत्वो यथ यथाजे मरांमम:॥६८॥ त्वमसेनस्य वस्ते मे तन्मेवू हिपितामह॥ ततो त्वबवीच्छंतत्न व: पांजवान् पा
डुपूर्वज ३८ नकपंचनकौंतेयस मिजीव त्रिसंयुगे॥ जेया भवति सर्वेस्म सत्संते तन्हवी मिते॥७०॥ निर्जितेन मयिवुधेन रणोप्य पथ्याण्ड्वा: क्षिप्रंनयि
प्रहरध्वं पदृधीयारणोतय:॥७१॥ अनुज्ञाता शिव: पार्था प्रहरध्वं यथासुखं॥ एवं हि सुकृतं मन्ये भवता विदितो स्पहं॥७२॥ हि सेन्म पिहतं सर्वतेस्मा
देवं विधीयतो॥ युधिष्ठिर उवाच॥ ब्रूहि तस्मादुपायं मे यथा युधि जयेमहि॥७३॥ भगवत्नसमे क्रुधं दंडहस्तमिवांतकं॥ पाक्यो कत्र्य राजेतुं वरुणा
थयस्त्मया॥७४॥ न भवानसमो शक्त सेन्द्रे रपि सुरासुरे॥ भीष्म उवाच॥ सत्यं तेतत्महाबाहो यथावदसि पांडव॥ नहं जेतुं रणे शक्य: सेन्द्रैरपि सुरा
सुरै:॥ आत्तशस्त्रो रणे यत्तो गृहीतवरकार्मुका:॥७५॥ ततो मां न्यस्तशस्त्रं सुयतेह नुर्महारथा॥७६॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰भी॰
२५६

निक्षिप्तशस्त्रे पतिते विमुक्तकवचध्वजे ॥७६॥ द्रवमाणे च भीते च तवास्मीति च वादिनि ॥ स्त्रियां स्त्रीनामधेये च विकले चैकपुत्रिणी ॥७७॥ अप्रशस्ते नरे चैव
न युद्धं रोचते मम ॥ इदं मे ऽभ्युदयं संकल्पं संकल्पं शृणु पार्थिव ततेः ॥७८॥ अमङ्गल्यध्वजं दृष्ट्वा न युध्येयं कदाचन ॥ य एष द्रुपदो राजन् तव सैन्ये महारथः
शिखण्डी समरामर्षी शूरश्च समितिंजयः ॥ यथाभवच्च स्त्री पूर्वं पश्चात्पुंस्त्वं समागतः ॥ जानन्ति च भवन्तोऽपि सर्वमेतद्यथातथं ॥ अर्जुनः समरे शूरः पुरस्कृ-
त्य शिखण्डिनं ॥८२॥ मामेव विशिखैस्तीक्ष्णैरभिद्रवतु दंशितः ॥ अमङ्गल्यध्वजे तस्मिन् स्त्रीपूर्वे च विशेषतः ॥ न प्रहर्तुमभीप्सामि गृहीतेषुः कथंचन ॥ तदन्तरं
समासाद्य पाण्डवो मां धनंजयः ॥ शरैर्घातयतु क्षिप्रं समन्ताद्भरतर्षभ ॥ न तं पश्यामि लोकेषु मां हन्याद्यः समुद्यतं ॥८५॥ ऋते कृष्णान्महाभागात्पाण्डवाद्वा ध-
नंजयात् ॥ एष तस्मात्पुरोधाय कंचिदन्यं ममाग्रतः ॥ त्वद्भूतमहतायातो गृहीतवरकार्मुकः ॥ मां पातयतु बीभत्सुरेवं ते विजयो ध्रुवं ॥ एतत्कुरुष्व कौन्तेय यथोक्तं ॥ स-
मम सुव्रत संग्रामे धार्तराष्ट्रान्सर्वान् समागतान् ॥८८॥ संजय उवाच ॥ ते तु ज्ञात्वा ततः पार्था जग्मुः स्वशिबिरं प्रति ॥ अभिवाद्य महात्मानं भीष्मं कुरुपिता-
महं ॥८९॥ तथोक्तवति गाङ्गेये परलोकाय दीक्षिते ॥ अर्जुनो दुःखसंतप्तः सव्रीडमिदमब्रवीत् ॥९०॥ गुरुणा कुरुवृद्धेन कृतप्रज्ञेन धीमता ॥ पिता-
महेन संग्रामे कथं योत्स्यामि माधव ॥९१॥

राम
२५६

॥ भा॰ भी॰ ॥
॥ २५५ ॥

भवंतः सहिताः सर्वे प्रनयामः मधुसूदनः॥ तेवयंसहिता गत्वा भीष्ममामधुसूदनः॥ नचिरात्सर्वमाप्रछ्येयंमंत्रंप्रछामकौर
वः सहस्पनिहितंवाक्यंसत्यमस्माकं जनार्दनः यथा च वक्ष्यते कृष्ण तथा कर्तास्मि संयुगे॥ ४९॥ सनोजयस्यदातास्यान्मंत्रस्यच
द्वहहृतः॥ पाखवाश्च विहीनास्त्वंतेनसंवर्धितावयं॥ ५०॥ तंवैपितामहंमध्यंहंतुमिछामिमाधवः॥ पितुर्यातरमिष्टंवैचधिगस्तुक्षत्र
जीवकां॥ ५१॥ संजय उवाच॥ ततो ब्रवीन्महाराजवार्ष्णेयः कुरुनंदनः रोचतेमेमहाप्राज्ञ राजेंद्र तववचभाषितं॥ ५२॥ देवव्रतः कृ
तीभीष्मः प्रेक्षितेनापिनिर्दहेत॥ गम्यतां सवधोपाय प्रष्टुंसागरगासुतं ५३ वक्तुमर्हतिसत्यंसत्वयाप्रष्टोविशेषतः॥ तेवयंतत्र
गछामीप्रष्टुंकुरुपितामहं॥ गत्वासनेनवंदृष्टंमंत्रंप्रछामिभारतः सोनोदास्यतिमंत्रंयंतेनस्यामहेपरान्॥ एवमामंत्र्य
तेवीराः पांडवेपांडुनंदनः॥ जग्मुस्तेसहितासर्वेवासुदेवश्चवीर्यवान् ५६ विमुक्तशस्त्रवाहुभीष्मः स्पंसततंप्रति॥ प्रविश्य
वतदाभीष्मंशिरोभिः प्रतिपेदिरे॥ ५७॥ रजयंतोमहाराजेपांडवा भरतर्षभे प्रणम्यशिरसाचैवभीष्मस्यसरणमभ्ययु॥ ५८॥ तानुवाचम
हावाहुभीष्मः कुरुपितामहः॥ स्वागतंतववार्ष्णेयस्वागतंतेधनंजयः ५९ स्वागतंधर्मराजायभीमायचयमयोस्तथा॥ किंवाकार्यंकरोम्यद्य
युष्माकंप्रीतिवर्धनं॥ ६०॥ सर्वात्मनापिकर्माणिप्रयद्यपिस्यात्सुदुष्करं तथापिकर्तास्मिगांगेयप्रीतियुक्तःपुनःपुनः॥ ६१॥ उवाचराजादीनात्मा

॥ राम ॥
॥ २५५ ॥

पितापुत्रमिमंसृष्टवा: कथंजयेयमसर्वेकथंराज्यंलभेमहि ६३

तव भ्राता मम सखा संबंधी शिष्य एव च ॥ मांसान्युत्कृत्य दास्यामि फल्गुनार्थे महीपते ॥ एष चापि नरव्याघ्रो मत्कृते जीवितं
त्यजेत् । एष नः समयस्तात तारयेम परस्परं ॥ समां नियुङ्क्षि राजेंद्र यथा योधा भवाम्यहं ॥ प्रतिज्ञातमुपप्लव्ये यत्तत्पार्थेन पूर्वतः ३५ ॥
घातयिष्यामि गांगेयमिति लोकस्य संनिधौ ॥ परिरक्ष्यमिदं तावद्वचः पार्थस्य धीमतः ॥ अनुज्ञातं तु पार्थेन मया कार्यं न संशयः ॥ अथ
फाल्गुनस्यैष भारः परिमितो रणे ॥ ३७ ॥ स हनिष्यति संग्रामे भीष्मं परपुरंजयं ॥ अशक्यमपि तु यो धिरणे पार्थः समुद्यतः ॥ ३८ ॥
त्रिदशान् वा समुद्युक्तान् सहितान् दैत्यदानवैः ॥ निहन्यादर्जुनः संख्ये किमु भीष्मं नराधिप ॥ ३९ ॥ विपरीतो महावीर्यो गतसत्वोऽल्प
चेतनः । भीष्मः शांतनवो नूनं कर्तव्यं नावबुध्यते ॥ ४० ॥ युधिष्ठिर उवाच ॥ एवमेतन्महाबाहो यथा वदसि माधव ॥ सर्वे ह्येते न पर्याप्ता
स्तव वेगविधारणे ॥ ४१ ॥ नियतं समवाप्स्यामि सर्वमेतद्यथेप्सितं ॥ यस्य मे पुरुषव्याघ्र भवान्पक्षे व्यवस्थितः ॥ ४२ ॥ सेंद्रानपि
रणे देवान् जयेयं जयतांवर ॥ त्वया नाथेन गोविंद किमु भी[illegible] प्रहारये ॥ ४३ ॥ न तु त्वामनृतं कर्तुमुत्सहे स्वात्मगौरवात् ॥ अयोध्य
मानः साहाय्यं यथोक्तं कुरु माधव ॥ ४४ ॥ समयस्तु कृतः कश्चिन्मम भीष्मेण संयुगे ॥ मंत्रयिष्ये तवार्थाय न तु योत्स्ये कथंचन ॥
दुर्योधनार्थे योत्स्यामि सत्यमेतदिति प्रभो ॥ स हि राज्यस्य मे देवो मंत्रस्यैव च माधव ॥ ४६ ॥ तस्माद्देवव्रतं भूयो वधोपायार्थमात्म
नः ॥ ॥

सोन्यस्कांश्च जितान्हत्वा निहत्य सप्तान्महारथान् ॥ चिंतयित्वा ततो राजा ध्रुवं श्राहाम्यो चयः ॥ ४ ॥ ततो वहारं सैन्यानां चक्रे राजा युधिष्ठिरः ॥ त
थैव तव सैन्यानामवहारो ह्यभूत्तदा ॥ ५ ॥ ततो वहारं सैन्यानां कृत्वा तत्र महारथान् ॥ न्यविशंत कुरुश्रेष्ठ संग्रामे क्षतविक्षताः ॥ ६ ॥ भीष्मस्य
समरे कर्म चिंतयित्वा तु पांडवाः ॥ नालभंते ततः शांतिं भीष्मवाणप्रपीडिताः ॥ भीष्मोपि समरे जित्वा पांडवान्सहसंजयान् ॥ पू
ज्यमानस्तव सुतैर्वंद्यमानश्च भारत ॥ न्यविशत्कुरुभिः सार्द्धं हृष्टरूपैः समंततः ॥ ततो युधिः सम्यभवात्सर्वं भ्रतप्रमोदिनी तस्मिन्नुरात्रिमुखे घोरे
पांडवा वृष्णिभिः सह ॥ सृंजयाश्च दुराधर्षा मंत्राय समुपस्थिताः ॥ १० ॥ आत्मनिःश्रेयसं सर्वे प्राप्तकालं महाबला मंत्रयामासुरव्यग्रा मंत्रनिश्च
यविकोविदाः ॥ ततो युधिष्ठिरो राजा मंत्रयित्वा चिरं नृपः ॥ वासुदेवं समुद्वीक्ष्य वचनं चेदमारदे ॥ १२ ॥ कृष्ण पश्य महात्मानं भीष्मं तु
ग्रपराक्रमं ॥ गजं नलवनानीव समुद्रंतं बलं मम ॥ १३ ॥ न चैवैनं महात्मानमुत्सहामो निरीक्षितुं ॥ लेलिह्यमानं सैन्येषु प्रवृद्धमिव पाव
कं ॥ १४ ॥ यथा घोरं महानागस्तक्षको विषपावकः ॥ तथा भीष्मो रणे क्रुद्धस्तीक्ष्णशस्त्रप्रतापवान् ॥ गृहीतचापः समरे प्रमुंचन्निशि
तान् शरान् ॥ शक्यो जेतुं यमः क्रुद्धो वज्रपाणिश्च देवराट् ॥ वरुणः पाशभृद्वापि सगदो वा धनेश्वरः ॥ न तु भीष्मः सुसंक्रुद्धो जेतुं श
क्यो महाहवे ॥ १७ ॥ सोहमेवं गते कृष्ण निमग्नः शोकसागरे ॥ आत्मनो बुद्धिदौर्बल्याद्भीष्ममासाद्य संयुगे ॥ १८ ॥

ARYA SAMAJ ... 1939

वनं प्राप्स्यामि दुर्धर्षं श्रेयो वै तत्र मे गतं ॥ न युद्धं रोचये कृष्ण हंति भीष्मो हि नः सदा ॥ यथा प्रज्वलितं वह्निं पतंगः समभिद्रुतः एकतो मृत्युमभ्येति तथाहं भीष्म
मेयिवान् २० क्षयं नीतोस्मि वार्ष्णेय राज्यहेतोः पराक्रमी ॥ भ्रातरश्चैव मे शूराः सायकैर्भृशपीडिताः ॥ मत्कृते भ्रातृसौहार्द्दाद्राज्यभ्रष्टा वनं गताः परिक्लिष्टास्तथा
कृष्णा मत्कृते मधुसूदन ॥ २२ जीवितं बहु मन्येहं जीवितं ह्यद्य दुर्लभं ॥ जीवितस्याद्य शेषेण चरिष्ये धर्ममुत्तमं ॥ यदि तेहमनुग्राह्यो भ्रातृभिः सह केशवः ॥ स्वधर्म
स्याविरोधेन हितं व्याहर केशव एवं श्रुत्वा वचस्तस्य कारुण्याद्बहुविस्तरं ॥ प्रत्युवाच ततः कृष्णः सांत्वयानो युधिष्ठिरं ॥ धर्मपुत्र विषादं त्वं मा कृथाः सत्यसं
गरः ॥ यस्य ते भ्रातरः शूरा दुर्जयाः शत्रुसूदनाः ॥ २६ ॥ अर्जुनो भीमसेनश्च वाय्वग्निसमतेजसौ ॥ माद्रीपुत्रौ च विक्रांतौ त्रिदशानामिवेश्वरौ ॥ मां वा नियुंक्ष्व
सौहार्दाद्योत्स्ये भीष्मेण पांडवः ॥ त्वत्प्रयुक्तो महाराज किं न कुर्यां महाहवे ॥ हनिष्यामि रणे भीष्ममाहूय पुरुषर्षभः पश्यतां धार्तराष्ट्राणां यदि
नेच्छति फाल्गुनः यदि भीष्मे हते वीरे जयं पश्यसि पांडव ॥ हंतास्म्येकरथेनाद्य कुरुवृद्धं पितामहं ॥ ३० ॥ पश्य मे विक्रमं राजन्महेंद्रस्येव
विक्रमे ॥ विमुंचंतं महास्त्राणि पातयिष्यामि तं रथात् ॥ यः शत्रुः पांडुपुत्राणां मच्छत्रुः स न संशयः ॥ मदर्था भवदीया ये मदीया ये तवैव ते ॥ ३२ ॥

This PDF you are browsing now is in a series of several scanned rare books and manuscripts from Sanskrit Academy, Hyderabad.

Address:

Manikeshwar Nagar Kaman,

Osmania University, Tarnaka,

Hyderabad, Telangana, 500007

https://sanskritacademy.net/

https://archive.org/details/@sanskrit_academy_hyd

The Academy is currently led by Director Shri Madhushan Penna.

His CV:

Prof. Penna madhusudan,

Director Sanskrit Academy, Hyderabad

Areas of interest

Yoga shastra, nyaya, yoga and vedanta philosophy.

Works

3 mahakavyas, 10 laghukavyas, 30 translations and 140 edited books

Sahitya Academy Awardee for Mahakavya on Gulabrao Maharaj.

Translated the Marathi Jnaneshwari in 9000 Sanskrit shlokas.

Honours

Honorary D.Litt by National Sanskrit University, Tirupati AP. for his unique contribution in Indian Philosophy.

-Vachaspati

-Yoga Ratna

-Shastra nidhi

-Utkrisht Sanskrit Pandit

-Yajna Surabhi

-Shastri (Karavir Peeth)

-Shastra Ratnakara

Awards

- Sahitya Academy award

- Maharashtra govt sadhana award

- Pt. Satvalekar award

- Pt. Latkar shastri award

- Pt. Ghatate award

- Somnath Trust Award with Gold Medal and title of Best Scholar

- Sribhashyam national award

and many other.

Foreign Travel

The Netherlands, Canada for World Sanskrit Conference 2018.

Indian embassy, Nepal 2023

DVDs on yoga, Indian philosophy and Sanskrit Literature.

mspenna67@gmail.com

Digitization by eGangotri Trust/Sarayu Trust, New Delhi

Funding for Digitization: Shri Ravi Parimi, Hyderabad